VIDYODAYA

for

1888

विद्योदयः

मासिक-संस्कृत-पत्रम्।

The Sanskrit Critical Journal

of

The Oriental [illegible] Institute,

Wo[illegible]

Engla[illegible]



श्रीहृषीकेशभट्टाचा[illegible]र्य शास्त्रि[illegible] सम्पादितः

भट्टपल्ली [illegible] प्रक[illegible]

कलिकाताराजधान्याम्।

नं० १२ पटलडाङ्गा ष्ट्रीट

प्राकृत यन्त्रे

श्रीनृत्यलाल चक्रवर्त्तिना मुद्रितः।

VIDYODAYA

for

1888

विद्योदयः

मासिक-संस्कृत-पत्रम् ।

The Sanskrit Critical Journal

of

The Orienta[illegible] Institute,

Wo[illegible]

Engla[illegible]

श्रीहृषीकेशभट्टा[illegible]ण शास्त्रि[illegible] सम्पादितः

१८८८ वत्सरीय विद्योदयस्य सूचीपत्रम् ।

THE CONTENTS OF VIDYODOYA

FOR

1888.

A BRIEF HISTORY

OF

THE VIDYODAYA

VIDYODAYA, the Sanskrit Monthly, first appeared in Lahore the Capital of the Punjab under the auspices of the Punjab University. It received help from the above-mentioned institution so long as Dr. G. W. Leitner, the founder of the University had a controlling hand over it, but as soon as the benevolent Doctor retired from his office the university at once stopped its aid inspite of the strong recommendation of Dr. Leitner himself and all the Sanskrit knowing members of the Senate. This was a crisis for the paper. Again the philanthropic Doctor came forward and saved the Journal with timely help from the fund of the Oriental Nobility Institute, Woking, London.—An association established by him for helping the Indian students going to England for the purpose of finishing their education.

Since January 1887 the Journal is being published from Calcutta. As the Editor now is in Calcutta, he has taken this opportunity to improve the condition of his Journal, He now consults the libraries of the Sanskrit College and the Asiatic Society of Bengal, Calcutta, where many works on every branch of the Sanskrit literature are stored; he has now an ample opportunity of consulting with the best Sanskrit scholars of Bengal. And he has collected lots of rare and unavailable Sanskrit works which he hopes to publish through the medium of the journal.

The public may easily understand the nature of the journal and the extent of work it undertakes from the following prosp

the subjects treated of in its January, February, March and April Numbers for 1888—

(1.) THE KSHITISAVANSAVALI CHARITRA, a chronicle of the ancestors of Krishnachandra, the famous Raja of Nuddiya or Navadwipa in Bengal, who ruled during the greater part of the last century, famous for his own erudition and the protection he granted to art and knowledge. This book is very rare. The only printed copy of it from which this reprint is made was published at Berlin in 1852 edited and translated by W. Pertsch. The following remarks of the editor on it would we think convey a clear view of the book—"It has so far as I know not been brought to light till now, and seems to be only representative in Sanskrit of a class of compositions which form a considerable part of the Bengali literature. From this circumstance together with the orthography and language charateristic of the time of its composition it derives its chief interest; its contents however likewise as affording a view, and it should seem a tolerably undistorted one of the relations, subsisting between the native Rajas and Mohammedan viceroys, is not without its share of interest."

Rev. J. Long at the very beginning of his article on the Chronicle of Krishnghurthus alluded to the book :—

The Germans are men of wonderful research, when we consider their labours in the departments of Physiology, Metaphysics, and History; they have launched successfully on the sea of Sanskrit literature and have yielded us from it many articles valuable for history, manners, and religion.

The work we undertake to notice is another specimen of German

research. The late Sir, R. Chambers, Chief Justiec in Bengal, ha
purchased a large number of Sanskrit mss. which his widow took t
England and offered for sale to the British government. but they decli
ned the offer. The king of Prusia then purchased them and this i
one of them. Calcutta Review Dec 1851 – Jun 1864.

(2.) THE MEGHADUTA OR THE CLOUD MESSENGER OI KALIDASA. Text and notes explaining the theological, his torical and geographical allusions with a literal Bengali tran lation and different readings with criticisms on them.

(3.) NARADA SMRITI OR THE LAWS OF NARADA with a extensive gloss. Narada Smriti is a code, the best of its class an throws light to the state of civil administration of the anc ent Hindu kings. Mitakshara, Viramitrodoya and sever other works on Hindu law recently compiled have alwa quoted authorities from it. The only printed edition a that a learned one, is Dr. J. Jolly's. But that book is cost —the present attempt is made to put the code before t public in a cheap and popular form.

(4.) A SANSKRIT TRANSLATION OF HAMLET TE PRINCE OF DENMARK. All efforts have been made keep the original sense unaffected in the translation.

(5.) Varnasrama Dharmasthapana, a discussion between Atheist, a Theist (Brahmo) and a Pundit; the Pundit ga victory at last and establishes the superiority of the Bra manic religion.

(6.) Vibahatattwa, the marriage System of the Hindus as v prevailing in the time of Manu.

7. A Pallaba inscription from Amaravati recently deciphered

Dr. E. Hultezesch of the Indian Archalological surveying Department, sent to the editor by the author himself.

(8.) SANKHYA TATTVA KAUMUDI a treatise on Saukhya philosophy by Vachaspati Misra with notes by the editor.

(9.) EKAKSHARA KOSHA or a dictionary of the words of monosyllables with various meanings.

(10) YOGAPHILOSOPHY Sutras of Patanjali with an old Commentary called Yogamaniprabha and English translaticu of the Sutras.

(11) Notice of new publications with Editorial remarks.

भवतः सर्व्वशास्त्रपारङ्गतान् विद्वद्वृन्दान् "अत्र मत्कृतानुवादे मधुलिह इव मधुविन्दून् विरलानपि भजत गुणलेशानिति।"

सेक्सपीरकाव्यानां हाम्लेट्काव्यं हि समुत्कृष्टतममिति प्रथमं तस्यानुवादे यत्नः क्रियते। अथ कदाचित् प्राक्तनपुण्यप्रभावादस्य प्रयत्नस्य साफल्यसिद्धिस्तदाऽन्यत्र तु दण्डापूपिकया स्वल्पेनैवायासेन सिद्धिलाभोभवितेति प्रथमतोगुरुकार्य्ये प्रवृत्तिर्न तावदुपहसनीया सुधीभिरित्यलमतिविस्तरेण।

नाटकाभिहितजनानामुल्लेखः।

क्लौडियस्	डेनमार्कदेशस्य राजा
हाम्लेट्	तस्य भ्रातुष्पुत्रः, पूर्व्वस्य राज्ञः पुत्रः
पोलनीयसः	लर्डचम्बर्लेन्
होरसीयः	हाम्लेट्नामकस्य मित्रं
लैरतेशः	पोलोनियसनामकस्य पुत्रः
वलटिमण्डः,	
कर्णिलीयस,	सभ्याः
रसनक्रः,	
गिलडष्टरनः	
ओसरोकः	कश्चित् सभ्यः
अपरः	सभ्यः
कश्चित् पुरोहितः	
मार्सिलसः, वरनर्डः	प्रहरिणौ
फ्रनसिको	कश्चित् सैनिकः
रोनलदः	पोलनीयसनामकस्य भृत्यः
सेनाध्यक्षः	राजदूतः
प्रेतात्मा	हाम्लेट्नामकस्य पितुः

फरटिनब्रसः	नरवे राजपुत्रः
गर्ट्रूडी	डेनमार्कदेशस्य राज्ञी हाम्लेट नामकस्य माता
ओफेलिया	पोलनीयसनामकस्य पुत्री

भूम्यधिकारिणः, तेषाम् स्त्रियः, राजकर्मचारिणः, सैनिकाः, नटाः, मृतदेहसमाधिस्थानखनकाः, नाविकाः, दूताः अपेर च भृत्याः ।

हाम्लेट्-चरितं ।

प्रथमाङ्कः ।

प्रथमदृश्यं--एल्सिनोर (स्थानविशेष) उपदुर्गम्

[ततः प्रविशतः स्वाधिकारस्थितः फ्रनसिकोनामा तमुपसर्पन् वरनर्ड्नामा च]

वर। कोऽस्ति तत्र ?

फ्रन। न ददेऽहमुत्तरं

तिष्ठ चात्मविवृतिं कुरु

वर। भूपः

जीवताच्चिरम्

फ्रन। अये वरनर्ड् ।

वर। सः—

फ्रन। त्वमेषि नियतं समये स्वे ।

वर। द्वादशी हि घटिकाऽचिरमेव

वादिता, फ्रनसिको भज तल्पम् ।

फ्रन। धन्यवादततयः सहहात्यै

अस्या एव, गुरु सम्प्रति शीतम्,

जात एष च महान् हृदि कम्पः

वर। रक्षिता नु भवताऽखिलशान्तिः ?

फ्रन। मक्षिका न विचलत्यपि काचित् ।

वर। सुष्ठु, तेऽस्तु, रजनी शुभदैषा

वीक्षसे पथि च मे सहकारौ

होरसीयमथ मार्सिलस्त्वं त्

प्रेषयेस्त्वमिह सत्वरमेतौ ।

[ततः प्रविशतः होरसीयः, मार्सिलसश्च]

फ्रन। तर्कये ननु शृणोमि ययैतौ

स्थीयतां नु खलु कोऽस्ति च तत्र ?

होर। वान्धवा जनपदस्य किलाऽस्य।

मार्। डेनवासिन्हितक्षत्मृजनाश्च।

होर। याहि सैनिक शिवस्तव पन्थाः।

अस्ति कोनु भवतामधिकारि।

फ्रन। वर्त्तते मम पदे वरनर्ड्ः।

अस्तु वां शुभनिशा,

इति निष्क्रान्त।

मार्। वरनर्ड!

वर। कथ्यतां किमिह तिष्ठति सोऽद्य

होरसीयः

होर। इह तत्कणिकैका।

वर। होरसीयवरमारसिलसाभ्यां।

स्वागतं।

होर। किमु पुनर्निशि चादर

वोच्चितं तदपि वस्तु।

वर। न किञ्चित्।

मार्। भ्रान्तिरेव लिखितेति च वक्ति

होरसीय इह नैव च किञ्चित्

विश्वसित्यपि च द्विः परिदृष्टे

दृष्टिभीषणभयङ्करूपे

तेन सार्द्धमहमानयमेतं

यामरक्षणविधौ निशि चाद्य

स्यात् पुनर्यदि समीच्चितमेत

द्रुपमस्य खलु लोनयनेषु

प्रत्ययस्तदनु तेन च जल्पः।

होर। नैव नैव तदिहैष्यति दृष्टिं

मार। आस्यतां, क्षणमिदं श्रुतियुग्मं

युष्मदीयमिव यत प्रतिरुद्धं

श्रोतुमस्मदभिवर्णितवृत्तं

दृष्टमत्र रजनीद्वयमादौ

वारमेकमभिमेत्तुमनुज्ञां

देहि नः पुनः—

होर। इहैव चास्यताम्।

श्रूयताममभिदधातु च सर्व्वं

वृत्तमेतदधुना वरनर्द्दः।

वर्णाश्रमधर्म्मस्थापनं।

पण्डितः। सति सामर्थ्ये दण्डविधानमुचितमेव

तदभावे तु परमेश्वरसविधे अभियोग एषः।

ब्राह्मः। अपराधः कः?।

पण्डितः। त्रिभुवनजनानामविज्ञातपरमेश्वराभिप्रायज्ञोऽहमित्येकः; प्रबलतराऽहङ्कारः। द्वितीयस्तु परमेशकरुणाविर्भूतवेदलब्धेश्वरज्ञाने सति परमेशसत्त्वाभिज्ञानं स्वतएव प्रवृत्तमस्माकमित्यहङ्कारश्च।

ब्राह्मः। जगत्कार्य्यदर्शनेनोद्भूतं सर्व्वेषां स्वभावसिद्धमीश्वरज्ञानं।

पण्डितः। वैदिकात् तान्त्रिकाद्वाक्यादुपदेशं विना गुरोः

स्वभावसिद्ध मास्तिक्यज्ञान ञ्चेत् नास्तिकः कथम्?।

नास्तिकः। हे पण्डित, अलोकेश्वरघटनारटनापटुवागसि

वेदवक्तृतया परमेश्वरपरमदयालुतागुणगरिम—

प्रकाशकोऽसि युक्त्या भक्त्या भुवनं भक्तीकरोसि च।

अयं ब्राह्मस्त्वितो भ्रष्टस्ततोनष्टः ।

ब्राह्मः । कथं ।

नास्तिकः । इतः पर प्रतारणावैफल्यान्नास्तिक्यात् परिभ्रष्टः, ततश्च पण्डितकथिताच्युतनियमसंस्थापकपरमेश्वरवेदवक्तृत्वादि दोष-कथनेन भक्तिनाशान्नष्टः ।

ब्राह्मः । सकोपं नास्तिकं प्रति, वदतिरे मूर्ख नास्तिक ब्राह्मः कथमभक्तः ? न हि न हि सहि परमेश्वरस्य परमभक्त एव ।

वर्णाश्रमाचारशून्योयथेष्टाचारवानहम् ।
ब्रह्मज्ञोऽस्मीति वादी च निर्भयोऽपि परत्र च ॥

नास्तिकः । अस्माकं गृहजातेन मतेन मतिमानपि ।
यथेष्टाचरणस्वास्थ्यं प्राप्याऽपि पतितोऽपथे ॥
नास्त्यास्तिके पथि स्वस्ति भीतिश्चैव पदे पदे ।
प्राप्तं सुखमपि त्यज्यं परकाल भयादिह ॥

ब्राह्मः । नव्या ब्राह्मा वयं धन्या ज्ञातवञ्चकवञ्चनाः ।
मनुष्यरचितोवेदोनास्माकं भयमेतदः ॥

नास्तिकः । भजन्ति कर्त्तार मवैधभावतो
भवद्विधा वाऽथ भवन्त एव वा ।
ये केऽपि युक्त्या परिमुक्तवेदा
स्ते नास्तिकाः सम्प्रति सम्मतोमः ॥

ब्राह्मः । एवं को वालकोमूर्खोजन्मस्वीयमपैतकं ।
वदन्त्यम्लानवदना यथानीश्वरनास्तिकाः ॥

नास्तिकः । सोपहासं वदति ।
वेददुर्गानतिक्रम्याचारम्लून् विजित्य च ।
ईशादिग्भ्रमतोगर्त्ते पतितो ब्राह्ममन्दिरे ॥
आलस्यतस्त्यजन् सर्व्वान् रचत्रपि समाजजान् ।
आस्तिको नास्तिको वाऽयं ब्राह्मे तु संशयोमहान् ॥

असारं वैदिकं मन्त्रं संपरित्यज्य यत्नतः ।
सारं मन्त्रीयमर्म्मार्थं गृहीत्वा वङ्गभाषया ॥
बोधगम्यं नवं वाक्यं कृत्वा राजगिरा पुनः ।
चमत्कारकरं सर्व्वं संस्कारं परिरक्षति ॥
ब्राह्मः प्रथमं वेदात् तत्पश्चाद्राजशास्त्रतः ।
महासभ्योऽभवत्तस्य: क्रमशोवेदनिन्दकः ॥
आसनं वसनं भोज्यं सभा चोपासनागृहम् ।
वर्त्तमानराजरीत्या राजवत्सुचितां तनोः ।
सङ्कीर्त्तनप्रणालीञ्च चैतन्यचरितामृतात् ।
गृहीत्वाऽसि महाभक्तः किन्तु मूलं न कुत्रचित् ॥
अशास्त्रीयमखृष्टीय मसरोक्तमिदं मतम् ।
निन्दत्यात्मपितुर्धर्म्मं श्रुत्वा हसति नास्तिकः ॥
पुनर्ब्राह्मं प्रति वदति नास्तिकः—
शौचाचारपरित्यागात् यथेष्टाचरणादपि ।
आवयोरैक्यमत्यं हि नास्त्यस्तीति वृथा कथा ॥

ऐक्यं रक्ष विपक्षतां परिहर, प्रतिमहाविद्यालयं साम्प्रतं
बालांस्तान् कुरु नास्तिकान् किमथवा ब्राह्मान् सतां निन्दय
रामं कृष्णमनीश्वरं वद पुनर्द्दोषांस्तयोर्द्दर्शय
विद्यादानमिषेण वेदजनितां श्रद्धां हर स्वेच्छया ॥
मा क्षीणोभव वारयोगतिथिषु क्लेशोपवासादिभि
र्भक्ष्याभक्ष्यविवेचनं परिहरन् स्वीयां स्त्रियं शिक्षय ।
एवञ्चेन्मत मावयोर्मतिमतां वृद्धिं प्रतिद्योतते
श्रौतं स्मार्त्तमपीह कार्य्यमखिलं नायासतोनश्यति ॥

नास्तिकोऽहं भवान् ब्राह्मस्त्वञ्चो न विचारतः ।
विरक्तो वैदिकाचारे स्वेच्छाचारानुरागवान् ॥
मनीषे सर्व्वेशे जगदतिविपन्नमग्नमिति किम् ।

अमरावती —

स्तम्भशासनलिपिः ।

अयमतीवज्ञतत्त्वहृदयेन डक्टर ई हुल्ज़े महोदयप्रेरितामरावतीस्तम्भशासनलिपिप्राप्तिं स्वीकृत्य तामेव लिपिमशेषतः पाठकेभ्य उपहरामः। इयं हि शासनलिपिः अमरावतीनगरे कस्यचिद्दष्टकोणस्य स्तम्भस्य त्रिषु पार्श्वेषु खादिताऽस्ति। सि वेल नामधेयेन च सम्प्रति स स्तम्भः समुत्पाट्य माद्राजाद्भुत दर्शनशालायामानीतोऽस्ति। स्तम्भाग्रभागस्तत्र शासनलिपेरंशविशेषश्च भग्नो बभूव। इयं हि लिपिरद्ययावदपठितवासीत् सम्प्रत्यस्मद्बहुमानास्पदीभूतमहोदयेन डक्टर हुल्ज़ेनामधेयेनास्या वन्यचातुर्यमाविष्कृत्याशेषतः पठिताऽसौ। अस्य पठनरीतिश्च मध्यात एव अतैः मादृशां शोकाग्रभागाश्च वर्त्तन्ते ततश्च स्तम्भस्य भग्नतया कश्चिद्भागो भग्नः।

लिपिरियं बोधिसत्त्वं नमस्कृत्य प्रारब्धा ततश्चात्र पल्लवानां पूर्वपुरुषानुक्रमः प्रदर्शितः। यथा

आदिपुरुषः ब्रह्मा

।

भरद्वाजः

।

आङ्गिरसः

।

सुधामा

द्रोणः

।

अश्वत्थामा । स हि मदनीनामाप्सरसः

पाणिग्रहणञ्चकार । ।

पल्लवः

अष्टमे श्लोके पल्लवशब्दस्य व्युत्पत्तिर्दर्शिता ततः पल्लववंशीयानां सप्तनृपाणां नामानि दर्शितानि ।

(१) महेन्द्रवर्म्मा (पल्लवपुत्रः)

(२) सिंहवर्म्मा प्रथमः (महेन्द्रवर्म्मणः पुत्रः ।

(३) अर्कवर्म्मा (२यस्य पुत्रः)

(४) उग्रवर्म्मा

(६) नन्दीवर्म्मा पञ्चमस्य श्रीसिंहविष्णुनामधेयस्य पुत्रः ।

(७) सिंहवर्म्मा द्वितीयः

गद्यभागादेतावन्मात्रं ज्ञायते यत् द्वितीयः सिंहवर्म्मा कस्या अपि दिग्विजययात्राया प्रति निवृत्य धान्यघटनामके कस्मिंश्चित्स्थाने समाजागम, ततः शेषांशोविध्वस्तः । पूर्व्वस्मिन् समये अमरावती नगरं धान्यघटकेतिनाम्ना प्रसिद्धमासीत् ।

श्रियं वरां वश्चिरमादिशंतु ते भवद्विषः श्री-
घनपादपांसवः [।] सुरासुराधीशशिखामणि-
त्विषामनांतरय्येऽ विलसन्ति संचये ॥ [१] बभूव धा-
तुः प्रथमादकल्मषो मुनिर्भरद्वाज इति श्रु-
तीश्वरः [।] ततोंगिरा नाम गिरापगोदधिस्तत-
सुधामेति मुनिर्व्विनिश्रुतः ॥ [२] ततस्समस्ता-
गमपारदृश्वा द्रोणाभिधानो मुनिरुग्रवीर्य्यः [।]

अतप्य यन्सोऽष्टतनुं ६ तपोभिर्व्वंशस्य कर्त्तुं स्त-
नयस्य हेतोः ॥ [३] प्रसादेन ततश्शंभोरश्वत्था-७
मेति विश्रुतः [।] प्रादुर्व्वभूव तेजस्वी प्रातर्भा-
नुरिवोदयाद्र ॥ [४] तपस्यतस्तस्य किलाप्सरोद्वता
सुरेन्द्रकन्या मदनीति विश्रुता [।] कदाचिदारण्यनि-८
वासिमन्दिरं दिदृक्षुरालोकपथं जगाम सा [८]
सरःप्रवातांवुजविस्खलप्रियावियोगभीतं९
कलहंसमण्डलं। अशोकभूमावुपविश्य
सस्पृहं विलोकयन्तीमुपतस्थिवानृषिं १० ॥ [६] उमे-
व शर्व्वं प्रबभूव नात्मनो निरोच्चितं ११ काममिव-
षिविषिनं १२। अथोभयं गाढनिवद्धभावकं
सुरांगनास्संगमयांवभूविरे ॥ [७] असूत काले सुर-
राजकन्या नाथं भुवस्सागरमेखलायां १३ [।] स पल्लवो-१४
घास्तरणे शयानं पिता सुतं पल्लव इत्यवादोः १५ (॥८)
महेन्द्रवर्म्मेति ततः क्षितीशः शूरस्ततोऽजायत
सिंहवर्म्मा ॥ ततोर्क्कवर्म्मा तदनुग्रवर्म्मा १६ श्री-

---

(६) अतर्पयत् सोऽष्टतनुं
(७) अश्वत्था
(८) अरण्यमिति साधु
(९) विस्खलत् प्रियः
(१०) दिदृक्षुः
(११) निरीक्ष्य तम्
(१२) वेषिणम्।
(१३) मेखलायाः
(१४) स पल्लवौ।
(१५) अवादीत्।
(१६) तदनुग्रवर्म्मा

सिंहविष्णोरथ नन्दिवर्म्मा ॥ [९] अनेकराजन्यशिरो-
मणिप्रभाविभातकल्पायितशार्व्वराह्स्थिति: (।)
स शिंहवर्म्मा समभूद्य उच्यते हर्याद्रिपाष्टादमलध्वको
जनै: ॥ (१०) स सागरावरामुर्व्वीं गंगांमौक्तिकहारिणीं १
र सुचिरं वीरो मेरुमन्दरकुण्डलां ॥ (११) अथ कदाचिद
रगिरिशिखरायमान १८ करिचरणनखरविदारितक-
नकदलचरतुरगखुरसुखसमुत्थितरजता-१९
पनीयवितानितनभस्थल: २० सकलमण्डलीकसाम-
न्तसमरवीरापरचितपार्षि पार्श्वपुरोनुरक्ताखि-
लदिग्विजयार्ज्जितयशा: स्थापनाय २१ सुमेरुशि-
खरमुपातिष्ठत ॥ तत्र किल निखिलधरणीतलप-
र्य्यटनजनितश्रमसपनिनीषु: कतिपयानि
दिनानि नीत्वा कनकतटरुहहरिचन्दनतरुच्छायानन्दि-
तहृदय: ततो भागीरथीमुत्तीर्य्य तथैव गोदावरीं क-
ष्णवेर्णां च २२ श्रीधान्यवटनगरमाजवीतरागभट्टारकम-
द्राक्षीत् (।) दृष्ट्वा सकुतूहलमखिलतत्रत्यलक्षणान-
(यु) क्ताधिदेवतास्सविनयमुपगम्याभिवन्द्यैकान्ते
* * धर्म्मदेशानामशृणोत् २३ (।) श्रुत्वा चापरजन्मानं
* * (भि) वन्द्येदमुवाच (।) अहमपि भगवन् भगवतो

* * (दि) कामिहैव मणिकमकरजतविचित्र' कल्प-
* * * (ए) वमुक्तो भगवानुवाच । साधु साधू उपा-
(सक सिंह) वर्म्मन् इतोपरमवद्दचे (त्र यी)-
* * * * * * ष्वेवेति (।) ततो (भि) वन्द्य * * * *
* * * * * * (धान्य) षदके * * * * * * *

हाम्लेट्-चरितम् ।

वर । तारकाऽपरदिशं चलितैषा
याबदुज्ज्वलयितुं गतरात्रौ ।
मरुतस्त्वनु नभस्तलमेत
इव यत्र तनुते निजरश्मिम् ॥
आस्व चाहमपि मार्सिलसोऽसौ
वादिताऽत्र समये घटिकैका ।

मार् । शान्तम् आः कुरु कथारसभङ्गम्
पश्य सोऽत्र पुनरागत एव ॥

(ततः प्रविशति प्रेतात्मा)

वर । साकृतिः खलु ! यथा मृतभूपः

मार् । होरसीय कृतविद्यतमोऽसि
मन्त्रयस्व तदनेन च किञ्चित्

वर् । किं दधाति न नरेश्वरसाम्यं ?
होरसीय निपुणं परिपश्य ।

होर। सत्य मेतदमुना त्वहमद्य
भीतिविस्मयरसाकुलितोऽस्मि।

वर। भाषितव्यमसुना सह,

मार्। तेन

होरसीय कलय त्वमथैनम्

होर। कोऽसि भोस्त्वमतिघोरनिशीथे
आदधान इह भीषणकस्त्रं
विग्रहं त्वरितडेननरेश-
दर्शमुद्भ्रमसि तत् कथयस्व
शापितोऽसि नु मयेश्वरपादैः

मार्। ज्ञायते समवधीरित एषः

वर। पश्य शीघ्रमपगच्छति चैव

होर। शापितोऽसि वद मे वद चैतत्

(निष्क्रान्तः प्रेतात्मा]

मार्। यात एव न च वक्ष्यति किञ्चित्

वर। होरसीय कथमद्य तवाऽयं
गात्रवेपथुरनुज्ज्वलकान्तिः ?।
नास्ति नः किमधिकं वचनेषु
भ्रान्तितोऽन्यदिह कस्तवतर्कः ?।

होर। शाप एष परमेश्वरपादै,
र्नाभविष्यदिह विश्वसनं मे
नाऽवलोकितमिदं यदि सर्व्वं
मात्मनः सुणिपुणाक्षियुगाभ्याम्।

सम्पद्यते अयमेव मुख्यः कल्पः। (२) अथ तीक्ष्णमनीषासम्पन्नतया स्वल्पेनैवानेहसा गृहीताधीतवेदस्य कस्यचिदतत्रावस्थस्यकर्तृपस्थितेः प्रागुक्तमुख्यकालापेक्षणाऽसम्भवे द्वितीयकल्पमाह त्र्यष्टवर्षोऽष्टवर्षाम्बेति अथवा त्र्यष्टवर्षः चतुर्विंशतिवर्षवयस्कः पुमान् अष्टवर्षां अत्रापि हृद्यामिति विशेषणं योज्यं लब्धावयवोपचयां हृष्टपुष्टाङ्गीमिति यावत् तादृशीं अष्टवर्षवयस्कां कन्यामुद्वहेत् अयमेवापत्कालः, सत्वरः विहितन्यूनदर्शवयस्को विहितन्यूनवर्षवयस्कां परिणेतुकामः सन् धर्म्मे गृहस्थधर्म्मे सीदति अवसादं प्राप्नोति, तयो गार्हस्थ्यं न समुज्ज्वलं भवतीत्यर्थः। एतस्मादेव कल्पद्वयात् कश्चिदपरोऽर्थोऽनुमीयते—यथा, मनुमते विवाहस्य मुख्यः कालः पुंसः त्रिंशद्वर्षं वयः, स्त्रियश्च द्वादशवर्षं वयः, आपत्कालश्च तयोर्यथाक्रमं चतुर्विंशतिवर्षं अष्टवर्षञ्च वयः। ततश्च पुंसश्चतुर्विंशतिवर्षवयसआरभ्य त्रिंशद्वर्षवयो यावत् कन्यायाश्च अष्टवर्षवयस आरभ्य द्वादशवर्षवयो यावत् विवाहस्य योग्यकालो भवति, एतस्यान्तरे यस्मिन् कस्मिन्नपि वयसि विवाहो भवितुमर्हति, किन्तु सर्व्वत्रैव कन्याया वयो वरवयसस्त्रिभागं भवेदिति। एतच्च योग्यकाल दर्शनपरं न नियमार्थमिति कुल्लुकोक्तिस्तु सम्यगनुमतैव कन्यायां हृद्येति विशेषणयोगात् कन्याया हृद्यत्वं (सर्व्वावयवोपचयजन्यमनोहारित्वं) एव विवाहे प्रथमं लक्षणीयं ततश्च द्वादशवर्षवयस्यपि यस्या नावयवोपचयजन्यमनोहारित्वस्तदर्थं कालहरणमावश्यकं एवं पुंसोऽपि त्रिंशद्वर्षे वयसि न वेदाध्ययनसमाप्तिस्ततस्तदूर्द्ध्वमेव तेन विवाहः कार्य्य इति निष्कर्षः। वचनमिदं प्रथमोद्वाहसंस्कार विषयकमेव। मृतभार्य्यस्तु त्रिंशवर्षवयस ऊर्द्ध्वं वर्त्तमानोऽपि यावत्सम्भवस्वत्रिभागवयस्कां कन्यामुद्वोढुं शक्नोतीत्यप्यव-

वर्णाश्रमधर्म्मस्थापनं ।

मृता जाताः पश्चान्मरणमपि भूयोजनुरनु ।
इतीत्थं संसारभ्रमणकटुधारैः प्रतिदिनं
नरांस्क्लिश्नान् खिन्नान् जगदधिपतिः पश्यति न किम् ?॥

पण्डितः । स्वकर्म्मफलभोक्तारो जीवा, नास्त्यत्र संशयः ।
तथापि परमेशानोऽभजन्तं तारयत्यसौ ॥

प्रारब्धं सञ्चितं किञ्चिदिह कृतसुकृतं किं किमन्यत् भविष्यत्
जन्मोत्थं कर्म्म तत्तत्कृतिपतितनरः क्वापि दुःखी सुखी क्व ।
भोगी क्वासौ व रोगी क्वच नृपतिरयं क्वाप्यसाधुः क्व साधु
रित्थं संसारचक्रे भ्रमति भ्रमति ये स्वधर्म्मोद्यमेन मुक्ताः ॥

ब्राह्मनास्तिकौ । भगवान् भजतां त्राता नाभजन्तं स तारयेत् ।
इयन्तु जगतां रीतिः स कथं करुणार्णवः ॥

पण्डितः । ईशोऽनादिरनादिरेव निखिला जीवाश्च सृष्ट्यादिकं
सृष्ट्याऽनादि, यतोविवेचनपरोदैवेषु जैवेषु च ।
वारम्वारमपारसर्गहृदयाविष्णुः प्रभुर्वत्सवत्
वेदैर्बोधयति प्रमत्तभुवनं मोहान्धनिद्रान्वितम् ॥

नह्येवं निष्ठुरकारी शिशुरिव सततं क्रीडतीच्छाविवेको
भूतैर्हन्त्यन्यभूतानि च कमपि कदा धारयन् भ्रंशयन् वा ।
विश्वेदं स्वीयकर्म्मानुगभुवनमतो न सृयम्भु, स्वयम्भूः
स्वादृष्टायत्तजीवोद्धरण सकरुणोज्ञानदाता पितेव ॥

ततः पण्डितं प्रति कोऽपि तत्त्वजिज्ञासुराह "यद्येवं नियति-वशा जीवास्तदाऽस्माभिः श्रेयः साधनं कथं किंकर्त्तव्यम् ? केनोपाय येन वा तेषां नियतिखण्डनं स्यात् ? ।

पण्डितः। अनेक जन्मजं पुण्यं भक्तिं जनयतीश्वरे।

सा भक्तिर्मुक्तिदा तेषां सदेशानियतिनाशिनी॥

सत्सङ्गाज्जायते भक्तिर्भक्त्या च स्मृतिरैश्वरी।

तया स्मृतयाऽभीष्टसिद्धिर्भवेच्च शरणं हरिः॥

तथाच विष्णुपुराणम्—

वर्णाश्रमाचारवता पुरुषेण परः पुमान्।

विष्णुराराध्यते पन्था नान्यस्तत्तोषकारणम्॥

तथा श्रीमद्भागवतेऽपि—

यः सेवते मामगुणं गुणात् परं

हृदा कदा वा यदि वा गुणात्मकं।

सोऽहं स्वपादाञ्चितरेणुभिः स्पृशन्

पुनाति लोकत्रितयं यथा रविः॥

अस्यार्थः—अथ स्वभक्तेर्महिमानमाह यः सेवत इति योमद्भक्तः हृदा निर्मलान्तःकरणेन गुणात् अव्याकृतात् परं मायातीतं अतएव अगुणं सत्त्वादिगुणरहितं मां सेवते योऽसावसौ पुरुषः सोऽहमस्मीत्यभेदेन भजते, यदि वा यद्वा कदाचित् लीलादिसमये गुणात्मकं विशुद्धसत्त्वोज्जितस्वरूपेण सर्वज्ञत्वादिस्वरूपेण विशिष्टं सन्तं मां सेवते योमद्भक्त उपास्ते स उभयविधोमद्भक्तः अहं सद्रूपएव अतः स्पृशन् सन् स्वपादाञ्चितरेणुभिः स्वपादलग्नरेणुभिः लोकत्रितयं त्रिभुवनं पुनाति, तत्र तत्र गमनेन तत्रावस्थितानां जनानां अज्ञानध्वान्तनिरसनेन तान् पवित्रीकरोतीति भावः। तत्र दृष्टान्तः, यथा महात्मको रविर्लोकानां प्राकृतान्धकारनिरसनेन पुनाति तद्वत्।

ताह। भो पण्डित वर्णाश्रमाचारवतां [illegible]

वेदशिरः सूरूप उपनिषद्वर्णितमरूपं ब्रह्म, उपनिषद्विरुद्ध रूपप्रतिपादकं शास्त्रं कथं प्रमाणम् ?

पण्डितः। केनोपनिषदं यस्य तत्रैव सुवर्णितं
इन्द्रादीनां देवानां ब्रह्मणो रूपदर्शनम्।

ततस्तौ आक्षानास्तिकौ वदतः—

"नानाजनरचितं सर्व्वं शास्त्रं ग्राह्यं कथं भवेत्।
परस्परविरुद्धं यत् तत् त्याज्यं वुद्धिमज्जनैः॥

पण्डितः। परस्पर विरुद्धं चेत् अपि तत् सत्यमेवहि।
अधिकारक्रमेणोक्तं तत्र कः संशयः सताम्॥

यदङ्गीयं भर्गः श्रुतिकुहरचारयत्नरुचितः
परं ब्रह्माद्वैतं स्मरति सुकृतिर्मुक्तिनिरतः।
परामुक्तेर्भक्तिर्भगवदनुरक्तिं जनयति,
जनं श्रीश्रीपाङ्ग तदतिरुचिरं दर्शयति च॥
घनीभूतब्रह्माप्यु तरुचिररूपं प्रकृतितः
परं तन्न प्राप्यं प्रकृतिगुणजातेन्द्रियचयैः।
अनन्यैका भक्तिर्जनमतुलशक्तिं जनयति
यया शक्त्या पश्यत्यनिशमपि तद्ब्रह्म वपुषा॥
यथा न स्पष्टाङ्गं चितिलगगतः पश्यतिजनः
परं पिण्डीभूतं भ्रहगतं मयाद्यो व्यङ्गलः।
पुनर्ज्योतिर्जालं विविधमपि तम् यन्त्रनयनो
जनानां दूरे यः सहि न सविधे वस्त्वनुभवः॥
भानुं पश्यत्यनेकाकृतिमपराकरोद्भूतपादोऽहश्च
एकोलोकः समालो-कयति मिहिरमा-लोकमात्रं अनोऽन्यः।
वाह्यस्थः पश्यतीमं गगनमणिमिवाश्चर्य्यतेजःप्रपुञ्जं
व्यक्ताङ्गं रक्तवर्णं भजति वरतनुं भक्तिभावेन भक्तः॥

अयमर्थः चामपदावज्योतिःप्रकाशितवस्त्वनुभवः सविधे यथा

न तथा दूरे यावज्ज्योतिःप्रचाराभावात् अतएव जनानां वस्त्वनुभवा विभिन्नस्वभावा दूर-सविधभेदात्। आधुनिकलौकिकालोकनं यथा--

“गच्छन् वाष्पीययानैः प्रथममिव जनः श्यामलं दूरदेशे
पश्चात्तं मेघजालं तदनुगिरिगणं शैलजातांश्च वृक्षान्।
शालं तालं तमालं दलफलकुसुमान्यत्र सर्वाः लताश्च
पश्यत्येवं क्रमात् तत्ततनयनजना ब्रह्मणोरामरूपम्॥

शाक्तः। भवतु वा भगवतोऽचिन्त्यशक्तितः कदाचित् साकाराविर्भावो भगवद्भक्तसविधे। किन्तु सर्वव्यापकस्यापरिच्छिन्नस्य सच्चिदानन्दमयस्य तु तुच्छकाष्ठादिनिर्मितपरिमितप्रतिमापूजने तुच्छत्वमिति निन्दैव।

पण्डितः। भानोर्भा जातुकाचे भवति तु नहती भानुतुल्ये मणौ या
ज्योतिः स्यात्तादृशे वपुषि च गठिते चिन्तिते सार एवं।
लिङ्गं सद्भक्तसंमार्जितातिरुचिरं मन्दिरं त्वद्विधाना
नैवं बिम्बं स्फुरद्भवति बहुविधं सन्निधः सत्क्रियेऽस्य॥
पूजाद्या प्राकृतैस्तैर्मणिकृतिरपि वा सच्चिदानन्दमूर्त्तेः
सन्तोषायास्य ना स्यात् यदि न सुसदृशी तादृशी यत्नजन्या।
सन्तर्यामिन्युदर्कं ... फलसाफल्यमेवं
नोचेत काष्ठशिलोर्व्वीचलतीति मयि स्वस्वरूपप्रकाशः॥

शाक्तः। सर्व्वज्ञस्य सर्व्वव्यापकस्यासीमकारुण्यरत्नाम्बुधेर्यन कुत्रापि येन केन प्रकारेणोपदृष्टा सम्भावनीया। किन्तु रामकृष्णाद्यवतारप्रतिमादिषु न तथा यथाखिलदेशप्रकाशकस्य सहस्रांशोः परमाणुपरिमितस्थल प्रकाशकत्वकथनेव अनन्तब्रह्माण्डैकनाथस्य अयोध्याधिपतित्वकथनेन निन्दा वा स्तुतिः? अपि च त्रिभुवनतिमिरान्तकस्य दिवाकरस्य परमाणुपरिमित स्थलगतध्वान्तविनाश

हाम्लेट्-चरितं ।

(पूर्व्वं प्रकाशितानन्तरम्)

सा भ्रुवोः कुटिलता सकृदेव
याहशीं नरपतिर्विततान ।
आजघान स यदा गुरुकोपो-
ल्लासचण्डसमरे हिमराशौ ।
चक्रशून्यशकटाहतदेहं
पोल-भूपतिमिदं खलु चित्रम् ! ॥ (१)

मार ।

त्रिः पुरेदृशगभीरनिशीथे
ह्येवमेव हतसैनिकवेशः ।
सञ्चरन् मृदुपदं पुरतो नः
पश्यतामपि तिरोदध एषः ॥

---

(१) यदा यस्मिन् समये स नरपतिः (मृतीराजा) हिमराशौ हिमानीभूतभूमौ गुरु-कोपोल्लासचण्डसमरे (गुरुर्महान् यः कोपः तस्य उल्लास उद्रेकस्तेन चण्डोभयङ्करो यः समरः तस्मिन्) चक्र शून्य शकटाहतदेहं चक्र शून्यं (हिमप्रधानदेशेषु गमनागमन सौकर्य्याय अचक्राएव शकटाः व्यवह्रियन्ते) यः शकटः तेन आहतोगुप्तोदेहोयस्य स तं ताहशरथाभ्यन्तरस्थितमित्यर्थः, एवं भूतं पोलभूपतिं पोलण्डदेशाधीशं आजघान, हतवान् तदा सकृदेकवारं याहशीं भ्रुवोः, कुटिलतां भ्रुकुटिं विततान कृतवान् अद्यापि

वीर । तत्त्वमत्र किमवैमि न जाने
मन्त्रतस्तु विभवो मनु यावान् ।
तावता समवधार्य्यत एत-
द्राज्यमेष्यति कमप्यभिमर्द्दम् ॥

मार् । साधु साम्प्रतमुपाविश चाऽत्र
यस्तु तत्त्वमवगच्छति गूढम् ।
व्याकरोत्विह स मे ननु कस्मा-
दप्रमादनियमैः पुररक्षा
खेदयत्यनुनिशिथिनि पौरान् ?
प्रत्यहं किमु विधीयत एष
रीतिजातदहनायुध सङ्घः ?
नीयते रणहिताखिलवस्तु
शिल्पदेशनिपुणिप्रभवं वा ?
ब्राह्मणाः किमु जना हटतो वा
योजिता जलनिधेरुपकूलम्
पोतकर्म्मणि तथा श्रममुग्रं
कुर्व्वते खलु यथा न विशेषो
वारतो रविदिनस्य परेषाम् ?
किं त्वरा श्रमजलं कलयन्ती
कारयत्यपि निशां दिवसस्य
सङ्गिनीं निखिलकार्य्यसु ! कोऽद्य
व्याकरिष्यति ममाऽखिलमेतत् ? (२)

---

(२) साधु साम्प्रतं अत्र मत्पार्श्वे उपाविश उपविष्टोभव । तु पुनर्योऽत्र इह अत्र

घोर।   वस्तुमेतदलमस्मदहमेव

(याहशी जन कथा चरितेह)।

अस्मदीयनृपतिः स्वरितः (२) सः

यस्य रूपमधुनाऽपि च दृष्टम्॥

स कदाचित् (सुविदिता भवद्भिरपि सा कथा)।

प्रश्नान् कथयतु, कस्माद्धेतोः अप्रमादनियमैः (प्रमादोऽनवधानता, न प्रमादः अप्रमादः अप्रमादः स च नियमाश्च तैः कारणैः पुररक्षा (नगररक्षणं) कर्त्री अनुनिशिनिशि निशि निशि पौरान् पुरवासिनोजनान् खेदयति कथं पुरवासिनोजना अप्रमत्ता नियमपूर्व्वकञ्च निशि निशि नगरं रक्षन्तः खेदं प्राप्नुवन्तीत्येकः प्रश्नः, प्रत्यहं प्रतिदिनं एष रीतिजात दहनायुधसङ्घः पित्तलनिर्म्मिताग्न्यस्त्रसमूहः उ भोः किं कस्मात् विधीयते प्रस्तूयते क्रियते इत्यर्थः, इति द्वितीयः प्रश्नः। वा किम्वा भिन्नदेशविपणिप्रभवं रणहितानेक-वस्तु युद्धोपकरणवस्तुजातं नीयते अत्रानीयत इत्यर्थः इति तृतीयः प्रश्नः, उ भोः किम्वा कथम्वा प्राकृता इतरे श्रमजीविनो जना हठतः बलात् अनिर्देश्यकुलं पोतकर्म्मणि पोतनिर्म्माण संस्कारादिकार्य्ये योजिता नियोजिताः सन्तः तथा उग्रं उत्कटं अविच्छिन्नमिति यावत् श्रमं कुर्व्वते अनुतिष्ठन्ति यथा परेषां अपरेषां ग्रहाणां वासरो रविदिनस्य विशेषेण अनुभूयत इति शेषः खृष्टधर्म्मावलम्बिनां रविवासरोहि विश्रामदिवसः इति अन्यवारेभ्यो रविवारस्य वैशिष्ट्यं प्रसिद्धं, किन्तु ते कथं तस्मिन्नपि श्रमं कुर्व्वन्तीति चतुर्थः प्रश्नः। किं श्रमजलं श्रमाविश्यजन्यस्वेदं कलयन्ती उत्पादयन्ती त्वरा व्यग्रता निशां अपि रात्रिमपि अखिलकर्म्मसु दिवसस्य सङ्गिनीं सहचरीं कारयति गमयति कथं वा जना त्वरया रात्रिन्दिवमेव कर्म्माणि कुर्व्वन्तीति पञ्चमः प्रश्नः। श्रीजनः अस्य जनः एतत् सर्व्वं व्याकरिष्यति सविस्तरं कथयिष्यति इति भावः।

(३) स्वर्गतः।

फर्ट्टिन्न्डसनामधेयेन नारवे-पतिनेर्ष्यया ।
प्रोद्भिन्नगर्व्वेणाङ्गतोवन्द्वयुद्धाय नोदितः ॥
यत्राहवे महातेजाः (ख्यातोऽत्र तु तथैव यः)
भूपोऽस्माकं सत्त्ववान फर्ट्टिन्डसनिधं रिपुम् ।
येनाकारि पणस्तत्र वैधः कौलिन्यमोदितः
मुद्राङ्कणाङ्कितस्यैव "यद्यहं निहतस्तदा
जेतस्याद्राज्यमखिलं भविते"ति, नृपस्तु नः
रीत्या तयैव "राजार्द्धं मामकोऽभिभवे भवेत् ।
शत्रो"रिति पणं कृत्वा तच्च पत्रेऽलिखत् स्वयम् ।
ततश्च निहते शत्रौ तद्राज्यं नोऽनृपे स्थितम् ॥
साम्प्रतं तनयः शत्रोर्यथाजातोऽब्ददोयुवा ।
निराश्रयान् स्वदेशीयान् क्षुद्रानुद्धतचेतसः ।
केवलेनान्नदानेन स्वच्छ्यान् समकल्पयत् ॥
न्ययोजयत् पुनश्चैतान् तस्मिन् साहसकर्म्मणि ।
भृशं यद्रोचते तेभ्यस्तद्धि नान्यत् (प्रतीयते
यथाऽस्माकं क्रिया दृष्टा) राज्यस्यास्य ग्रहादिह
तस्य सर्व्वस्व, यत् पूर्व्वं पित्रा तस्यापहारितम् ॥
अतस्तस्य परैर्वश्यैः प्रचण्डभुजविक्रमैः ।
एतदेव तर्कयेऽहं युद्धोद्योगस्य कारणम् ।
एतदर्थं यावनरक्षा कार्य्योऽस्माकं नियोजनम् (४) ।
एतन्मूला त्वरा चेहक् सर्व्वत्र जनताश्रमः ॥

---

(४) एतदंशस्येतिहासरूपत्वादनघ सैवानुवादः कृतः ।

॥ स तु दीर्घकालनैरन्तर्य्यसत्कारासेवितोदृढ़भूमिः ॥ १४

पदच्छेदः । स, तु, दीर्घकाल-नैरन्तर्य्य-सत्कार-आसेवितः, दृढ़भूमिः ।

पदार्थः । सः अभ्यासः तु पुनः (शङ्कानिरासार्थः) दीर्घकालं बहुकालं आसेवितः सम्यक् अनुष्ठितः, नैरन्तर्य्येण अविच्छेदेन आसेवितः, सत्कारेण तपसा, ब्रह्मचर्य्येण, विद्यया श्रद्धया च आसेवितः सन् दृढ़भूमिः अतीव स्थिरो भवति ।

अन्वयः । स्पष्टम् ।

भावार्थः । बहुकालं सन्ततं तपो-विद्या-ब्रह्मचर्य्यश्रद्धान्वितं यथातथा चित्तवृत्ते र्निरोधे अभ्यासः करणीयः, यत स्तेनैवोपायेन अभ्यासस्य दृढ़ता भवति ।

English—When the exercise is continued long and is begun with proper preliminary operations is well grounded.

वृत्तिः-तु शब्दः शङ्कानिरासार्थः सोऽभ्यासो दीर्घकालं तपोब्रह्मचर्य्या विद्याश्रद्धारूपसत्कारेण चासेवितो दृढ़संस्कारः स व्युत्थान संस्कारैर्नाभिभूयते किन्तु स्थितिसमर्थो भवतीत्यर्थः । अथेतरेण, तपसा ब्रह्मचर्य्येण श्रद्धया विद्ययात्मानमन्विष्येति श्रुतिः सत्कारं दर्शयति । वैराग्यस्वरूपमाह—

॥ दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥१५॥

पदच्छेदः । दृष्ट-आनुश्रविक-विषय-वितृष्णस्य, वशीकार-संज्ञा, वैराग्यम् ।

पदार्थः। दृष्टः ऐहिकः, अनुश्रवः वेदस्तत आगत आनुश्रविकः वेदबोधितः स्वर्गादिः दृष्टाश्च आनुश्रविकाश्च दृष्टानुश्रविका दृष्टानुश्रविकाश्च विषयाः (भोग्यजातानि) दृष्ट विषयाः स्रक्चन्दन वनितादयः आनुश्रविकविषयाः स्वर्गभोगादयः तत्र वितृष्णः, तृष्णा रहितः तस्य वशीकार संज्ञा, चित्तस्य स्वाधीनता, वैराग्यं विगतोरागोयस्य तस्य भावः वैराग्यम्।

अन्वयः। वशीकारसंज्ञैव वैराग्यं कथ्यत इति शेषः।

भावार्थः। ये दृष्टविषया नाम ये विषयाः संसारे प्रत्यक्ष मुपलभ्यन्ते ये स्वर्गादिविषयाश्च वेदादिभिर्निरूपिताः तेषु चित्तं यत् आसक्तं न भवति येन च योगिनः स्वाधीनं चित्तं विद्यते तद्वैराग्यम्।

English—When the mind ceases seeking all worldly as well as heavenly pleasures and when it has a control over it such conditon is called) self abenegation.

वृत्तिः—यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाव्यतस्तः तत्र रागादीनां चित्तस्थानां कषायाणां विषयेष्विन्द्रियप्रवर्त्तकानां या कायप्रयत्नो यतमानसंज्ञा वैराग्यं ततः पक्वानां केषांचित् कषायाणां वक्ष्यमाणेभ्यो विरागावधारणं व्यतिरेकसंज्ञा वैराग्यं, ततः पक्वानां सर्वेषामिन्द्रियप्रवर्त्तनाऽसमर्थानां मनस्यौत्सुक्यरूपेणाऽवस्थानमेकेन्द्रियसंज्ञा वैराग्यं, स्त्रियोऽन्नपानमैश्वर्यादिषु दृष्टेषु, गुरूच्चारणमनुश्रवः श्रवणं यस्य सोऽनुश्रवोवेदः तदुक्तत्वात् आविकेषु स्वर्गादिदिव्यविषयेषु सर्वेषु विनाश परिताप साऽतिशयत्वा द्भयादिदोषाणामभ्यासेन साक्षात्काराद्विदृष्णस्योपेक्षा बुद्धिर्वशी-

भारतीयभूतभविष्यदवस्थानुध्यानम्।

"मुक्तिर्नाम कैश्चिद् भारतीयविद्वद्भिरतीव साधु समालोचिता, यतस्तैः परं ब्रह्मणा सह जीवात्मनां पुनरभिन्नतया सङ्गतिरेव मुक्ति-रित्युपकल्पितम्। मानवस्य परमात्मनः प्रभूतिर्हि सततमेव तं पुनः स्वप्रभवभूमिं प्रत्येतुं प्रवणयति, संसारवृत्त्यनुसरणोद्यदापज्जा-लेषु चोपलब्धेषु तस्मै समुचितं साहसमर्पयति, तथा परमात्मना सह पुनः सायुज्यमेव सर्व्वप्रयत्नानामखिलकर्म्मणाञ्च मुख्यं फल-मित्यवधारयितुञ्च प्रवर्त्तयति। अनेनैव हेतुना भारतीयविधि-नियमाचारव्यवहाराणां स्वाभाविकं धर्म्मप्रावण्यं, भारतीयमनु-ष्याणां वर्त्तनञ्च [illegible] दम्भशून्यमिति तर्क-यामः" (p. 475)

"यूरोपीयाद्वैतवादोऽपि, यः खलु ग्रीसदेशीयदार्शनिकनिचयै-रवस्थापितः, प्राच्याद्वैतवादस्य समुज्ज्वलज्योतिषामग्रे तथैव प्रक्षीणो हीनप्रभश्च प्रतीयते यथा माध्यन्दिनप्रचण्डमार्त्तण्ड-किरणप्रवाहाणामग्रे वह्निविस्फुलिङ्गः। (p. 520)

"यूरोपीय दर्शनविदां ये खलु प्रगाढचिन्ताशालिनः समभवन्, ते सर्व्व एव प्राक्तनप्राच्यसाहित्यस्य प्राधान्यं सर्व्वदा स्वीचक्रुः। बहवो ग्रीसदेशीयकवयः प्राच्यसाहित्यस्य प्राधान्यं परिपुष्णन्त एव प्रख्याता बभूवुः। नव्यकवीनां मध्ये दान्टेनामधेयः कविः स्वदेशीयैरत्यन्तमादृतोऽपि बहुशः प्राच्यकाव्यरीतिमनुससार" (p. 525)

"भारतीयसाहित्यरत्नखनीनामुत्खननेन, भारतीयकाव्यकोष समुद्घाटनेन तथा भारतीयदर्शनतत्त्वानुसन्धानेनैवाद्याप्यविदि-

"फ्रेडारिक स्लेगेल नामा कश्चित् स्वकीयपुरातननवसाहित्येतिहासविषयकनिबन्धजातेषु पञ्चमे निबन्धे (p. 125) त्वेव मचीकथत्। "दर्शनतत्त्वशास्त्रालोचनसमुत्सुकानामिदानीं ग्रर्मण्यदेशीयाः पूर्वं ग्रीस देशीयाश्च सम्यक् प्रसिद्धा अभवन्। भारतवर्षीयास्तु कदाचिदेतेभ्योऽपि सर्वेषामग्र्यं स्थानं भेजिरे। भारतस्यापरशास्त्रेषु दर्शनानां सर्वोत्कर्षं प्रति नास्ति काचिद्विमति"रिति।

एम् भिक्टर कौजिन् नामा कश्चित् फ्रान्सदेशीयदार्शनिकः १८२८-९ वर्षयोः पारिस्नगरे विश्वविद्यालये आधुनिकदर्शनेतिहासविषयानि कानिचिद्व्याख्यानान्यकरोत्। तत्र स एवमवदत्—

"यदा वयं साभिनिवेशं प्राच्यदेशजातानि विशेषतो भारतीयानि साहित्यदर्शनान्यधीमः यानीदानीं यूरोपखण्डे सर्वतः शनैः प्रचारमालभन्ते, वयन्तत्र कांश्चिदभ्रान्तसिद्धान्तानवलोकयामः येषामग्रे यूरोपीय बुद्धिचातुर्य्यमकिञ्चित्करमिव प्रतिभाति, वयञ्च जानुस्पृष्टमहीतलाः प्रणता भवामः, जानीमहे च पूर्वदेश एव सर्वोच्च दर्शनशास्त्राणां जन्मभूमि" रिति (p. 32)

"भारतीय दर्शनग्रन्थदर्शितोदारतत्त्वेषु साभिनिवेशं मनः समर्पयत। वस्तुतो भारतीयदर्शन शास्त्राण्यसंख्यविधानि सन्ति ततश्च तेषामध्ययनेन दर्शनशास्त्रेतिहासाध्ययनफललाभस्तेनैव अतोऽस्य मनुजवर्य्याणांस्वाभाविकी प्रतिभा एवंविधोन्नतफलानि प्रसुषुवे ते खलु सर्वथाऽस्मत्समादरमर्हन्ति" (p. 316)

"उत्तरमीमांसादर्शनं यत् खलुवेदान्तनाम्ना प्रसिद्धं तद्धि विशेषतोवेदानां मन्त्रार्थानुद्देश्यञ्चालम्ब्य विरचितमपि जागतपदार्थतत्त्वतो निर्णिनाय, ततस्तत्र प्रकृतदर्शनशास्त्रलक्षणमन्वयं लभते (p. 318)

एदिन्मान्त यान्त हान्त वधक्षणुश्वसां न सा ।
अकगीदवमीद्वैव [illegible] ।
अवधीदक्षणीदश्वसीदयमीत्, गुम्फतां ।
लङ लुङ [illegible] हृद्धि रिष्यते ।
इङ्—अध्यैत, अध्यैष्ट, अध्यैष्यत, क्रमादिति ।
स्यात् कर्त्तरि पद्यतेस्त लङा चिण् उदपादि सः ।
दीपी, बुध्य, जनी, प्यायी, तायृपूर्व्वस्तु वा तथेण् ।
स चादीपि, अदीपिष्ट, अजनि, अजनिष्ट च ।
कर्म्मकर्त्तृ कर्म्मभावे लङ् लच् लिजगङापरम्मा
कर्त्तृत्वात् कर्म्मकर्त्तु र्य तत्रापि च अगादयः ।
स्वयमेवाख्यायि धर्म्मो ह्रदोऽभेदि स्वयं सिचा ।
मध्वलेहि कर्म्म सचा अकार्य्यवाच्यभावि तैः ।

एदित् एदिदादीनां या पूर्व्वोक्ता हृद्धिर्न स्यात् । कगी वरणे टुवम उद्गिरणे [illegible] सिंसागत्योः क्षणु हिंसायां श्वसप्राणने । गुम्फतां तु अगुम्फीत् [illegible] । [illegible] तु [illegible] ॥ लङलुङ । [illegible] लङलुङ् लङ्लृ [illegible] अमादेर्हतौ [illegible] हृद्धिरिष्यते । कर्त्तरि । [illegible] कर्त्तरि तकारः लङा-सह चिण् भवति । [illegible] पर-स्मै तकारो न [illegible] । [illegible] । दीपी । दीपी दीप्तौ बुध अवगमे बुध्य त्यनेन दिवादित्वं सूचितं । [illegible] ताय्र संताने [illegible] आप्यायने [illegible] कर्त्तरि तकारः लङा [illegible] चिण् वा स्यात्, [illegible] ? [illegible] । कर्म्म । कर्म्म-कर्त्तरि [illegible] भावे [illegible] विहितस्तकारः [illegible] सिचा [illegible] चिण् स्यात् । कर्म्म कर्त्तृत्वपि कर्त्तृत्वात् [illegible] कर्त्तृत्वाद्वि-[illegible] । [illegible] [illegible] पग्। अभेदीति तथैव । [illegible] । [illegible] अथानीत्यत्र कर्म्मणि [illegible] भावे लङ् ।

दुहस्नुनमस्नुतोर्नेमोपेनादुग्ध गौर्यथा।
न ब्रूणन्त सन्नन्तानां तोपि इण् कर्मकर्त्तरि।
आत्मने कर्म्मकाणाञ्च ग्रन्थग्रन्थोस्तपेरधे:।
अवोचत स्वयं धर्म्मः कटोऽचीकरत स्वयं।
स्वयमेवाचिकीर्षिष्ट तत्पयोव्यहृत स्वयं।
अग्रन्थिष्ट स्वयं मान्यमग्रन्थिष्ट तथा स्वयं।
स्वयमेव अतप्तोग्निररुद्धः स्वयमेव गौः।
दुहाजन्ताश्चवादोहि गौरकारि घटः स्वयं।

इतीडादिलुङपादः।

अथात्मने पदं वक्ष्ये धातुभ्यस्तु समासतः।
ङिद्यानायानुदात्तेत्त्वः स्यात् कर्त्तर्य्यात्मनेपदम्।

दुहा। दुहप्रपूरणे अनुपूर्व्वं तपसन्तापे णमप्रह्वत्वे शब्दे ष्णु प्रस्रवणे। एषां भावे कर्म्मणि च विहितस्तकारः सङादिभिः सह इण् न स्यात्। अदुग्धेतिसिज्लोपः। नव्रूणन्त। ब्रूञोणिङन्तस्य सनन्तस्य च कर्म्मकर्त्तरि विहितस्त इण् न स्यात्। एवमात्मनेपदाकर्म्मकाणां ग्रन्थ ग्रन्थोस्तपेरधेश्चधातोः कर्म्मकर्त्तरि वाच्ये विहितस्त इण् न स्यात्। अवोचतेति ब्रूञवचोवोच इत्यनेन अग्वोच। वचनस्य शब्दप्रकाशनत्वात् कर्म्मस्थक्रियत्वं। अन्तर्भूतण्यर्थत्वाद्वा। ब्रूग्रहणात् वक्तेरवोचीत्येव भवति। अचीकरतेति णिङन्तात् लुङ्त कर्त्तरि विहितेनऽकर्त्तर्य्यपि भवत्येव तस्यापि कर्त्तृत्वात्। व्यहृतेति कर्म्मकर्त्तर्य्येवात्मनेपदं। अस्यैव कर्म्माच्च इत्यात्मनेपदं अत एवात्मनेपदकर्म्मकोऽयमिति परिचयमात्रं ज्ञेयं। अत्र सिचोलोपः। अतप्तेति तपसंतापे सङ्लोपः। अरुद्धेति रुधिरावरणे सिचोलोपः दुह्यते दुहधातोरजन्तधातोश्च कर्म्मकर्त्तरि विहितस्तकारः सङादिभिः सह इण् वा स्यात्। अदोहीति सचा सह इण पक्षान्तरे अदुग्धेति।

सांख्यतत्त्वकौमुदी ।

गुरुपाठादनुश्रूयते इत्यनुश्रवो वेदः एतदुक्तं भवति श्रूयत एव परं न तु केनचित् क्रियत इति तत्र भव आनुश्रविक इति तत्र प्राप्तो ज्ञात इति यावत् आनुश्रविकोऽपि कर्म्मकलापो दृष्टेन तुल्यो वर्त्तत इति ऐकान्तिकात्यन्तिकदुःखप्रतीकारानुपायत्वस्योभयत्रापि तुल्यत्वात् । यद्यपि चानुश्रविक इति सामान्येनाभिहितं तथापि कर्म्मकलापाभिप्रायो द्रष्टव्यः विवेकज्ञानस्यापरानुश्रविकत्वात् तथाच श्रूयते आत्मा वा अरे ज्ञातव्यः प्रकृतितो विवेक्तव्यः न स पुनरावर्त्तते इति (१) ।

(१) वेदस्य भ्रमप्रतारणादिदोषनिरासफलिकाऽपौरुषेयत्वलाभायानुश्रवपदोपादानमित्याह तदुक्तमिति न केनचित् क्रियत इति । प्रकृतितो विवेक्तव्य इति ज्ञातव्य इत्यस्य विवरणम् नचायं श्रुतिपाठः ।

अस्यां प्रतिज्ञायां हेतुमाह स ह्यविशुद्धिक्षयातिशययुक्तः अविशुद्धिः सोमादियागस्य पशुवीजादिवधसाधनता यथाह स्म भगवान् पञ्चशिखाचार्य्यः स्वल्पसङ्करः सपरिहारः सप्रत्यवमर्ष इति । स्वल्पसङ्करः स्वल्पेन ज्योतिष्टोमादिजन्मनः प्रधानापूर्व्वस्य पशुहिंसादिजन्मनानर्थहेतुना अपूर्व्वेण संकरः सपरिहारः कियतापि प्रायश्चित्तेन परिहर्त्तुं शक्यः । अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्म्मविपाकसमये च पच्यते तथापि यावदसावनर्थं सूते तावत् सप्रत्यवमर्षः प्रत्यवमर्षेण सहिष्णुतया सह वर्त्तत इति मृष्यन्ते हि पुण्यसम्भारोपनीतस्वर्गसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम् (२) ।

(२) अस्यां प्रतिज्ञायां अनुष्ठेयः कर्म्मकलाप ऐकान्तिकात्य-न्तिक दुःखनिवृत्त्यनुपाय इत्यान्तिकायां। सङ्करः संसर्गः सामान्या-धिकरण्यमिति यावत्। केचित्तु अस्य सङ्करः सपरिहार इत्येवं पठन्ति। तस्यार्थं तु

अस्य: प्रधानफलाधिकरणकालापेक्षयाऽल्पकालावच्छिन्नत्व-प्रयोजकः, सङ्करः प्रधानापूर्वस्य पशुहिंसादिजन्यापूर्व्वेणानर्थ-हेतुना मिश्रणं तेन प्रधानफलाधिकरणव्याप्तिः दुःखजनकेन पाद-त्वं पशुहिंसाजन्यापूर्वेणेति सूचितम्। प्रधानापूर्वस्य सांक-र्य्याभिधानात्तु प्रायश्चित्तनिवर्त्त्यत्वमस्य पशुहिंसादिजन्यस्येति। ननु तस्य फलभागित्वे प्रायश्चित्तपरिहार्य्यत्वमङ्गाह सपरिहार इति स पश्वादिवधजन्यः पूर्वोक्त अनर्थः प्रत्यवायः परिहारार्थमाह प्रायोऽपीति कियता अंशेन प्रायश्चित्तेन प्रायश्चित्तादिना, आदि-पदेन फलादिकं ग्राह्यम्, अत्र सङ्करत्व नाशकस्य तत्पुरस्कारकर्त्तृ-नाशात् फलेन नाशकत्वे तूभय सम्बन्धिनाशादित्यवधेयम्। केचित्तु परिहारेण प्रायश्चित्तेन सह वर्त्तत इति सपरिहार इत्याहुः तन्न परिहर्त्तुं शक्य इति ग्रन्थविरोधात् साहित्यस्य समभिव्याहृत क्रियान्वयिना एककालीनत्वस्य प्रधानाङ्गसङ्करस्य कर्म्मक्रियाया असम्भवात्। नन्वनुष्ठानुष्ठेयप्रायश्चित्तेन तत्रापि कथं तेन साङ्कर्य्य मित्यपेक्षायामाह यथेति। प्रायश्चित्तमपोत्थापिना प्रायश्चित्तानुष्ठानं समुच्चीयते। तथाच कृतेऽपि प्रायश्चित्ते तत्रापि वीजादिवधसम्ब-न्धेन तत्रापि साङ्कर्य्यदुष्परिहारमिति भावः।

प्रधान कर्म्मविपाकसमय इति विपच्यत इति विपाकः फलं तथाच प्रधानारब्धफलसमय इत्यर्थः पच्यत इति संहृत्यानुवर्त्त-नीयं। क्वचित् पच्यत इति पाठः दुःखरूपेण परिणमते दुरितेन दुःखं सूयते तथा तत्सङ्घातप्रधानापूर्व्वेण स्वल्पदुःखमेव सुखं जन्यत इति भावार्थः।

पातञ्जलयोगसूत्रम् ।

॥ तत्परं पुरुषख्यातेर्गुण-वैतृष्ण्यम् ॥ १६ ॥

पदच्छेदः ।—तत्-परं, पुरुषख्यातेः, गुण-वैतृष्ण्यम् ।

पदार्थः । तत्परं तस्मात् (पूर्वोक्तात् वैराग्यात्) परं उत्कृष्टं अथवा तत् वैराग्यं, परं उत्कृष्टं, पुरुषख्यातेः पुरुषः, आत्मा, तस्य ख्यातिः ज्ञानं तस्मात् आत्मसाक्षात्काराद्धेतोः, गुणवैतृष्ण्यम् गुणेभ्यः, गुणेषु गुणानां वा वैतृष्ण्यम् तृष्णाविरहः । गुणाः सत्वादयः ।

अन्वयः । पुरुषख्यातेर्गुणवैतृष्ण्यम् तत्-परम्, तत्, परमिति वा ।

भावार्थः । वैराग्यं द्विविधं एकं विषय-वैराग्यम् । अपरञ्च गुण-वैराग्यम् । तत्र प्रथमं तावत् पूर्वस्मिन् सूत्रे निरूपितं अत्रास्मिं गुणवैराग्यं निरूप्यते । पुरुषख्यातेः आत्मसाक्षात्कारात्, विजयदोषदर्शिनः जनस्य पुरुषदर्शनाभ्यासादित्यर्थः गुणेभ्यः कार्य्यसहितेभ्यः सत्वादिगुणेभ्यः यत् वैतृष्ण्यं निष्पृहत्वं विरक्ततेति यावत् तदपि वैराग्यम्, तच्च तत्परम् पूर्व्वस्मादुत्कृष्टम् अन्ये तु तदिति वैराग्यम् परामृश्यते तेषां मते पुरुषख्यातेर्गुण वैतृष्ण्यं यत् (वैराग्यम्) तच्च परमित्यन्वयः *। पूर्व्वोक्ताच्छेषं, पुरुषपदमत्रबुद्धेरप्युपलक्षकमिति विज्ञान-भिक्षुस्तथाहि तन्मते पुरुषख्याते-रित्यस्य आत्मद्वयाऽन्यतर-साक्षात्काराभ्यासादित्यर्थः आत्मद्वयं बुद्धिपुरुषद्वयं । शुद्धं चित्तं वृत्ति-रहितं यदात्मनि लीयते तद्गुणवैतृष्ण्यमुत्कृष्टं वैराग्यमित्यर्थः ।

---

* एतस्मिन्मते प्रथमं विषये वैराग्य मभ्यसनीयं ततःपरं गुणेषु वैराग्यं करणीयं । गुणवैराग्यञ्च ज्ञानादिसपेक्षा ।

English--After this by the knowledge of the spirit the mind suceceds in being above desiring the qualities.

वृत्तिः—पूर्व्ववैराग्यमुत्तरवैराग्यहेतुः, तथाहि वच्यमाणयोगाङ्गानुष्ठानादनतिशुद्धचित्तस्य विषयेषु दोषदर्शनाद्वशीकारसंज्ञक वैराग्ये सति गुर्व्वागमावगतस्य पुरुषस्य या ख्यातिस्तदभ्यासाद्धर्म्म मेघाख्य ध्यानरूपाभिहितान्तविध्यस्ततमोरजोमलं चित्तं सत्त्व मात्रशेषमपि प्रसन्नं भवति सोऽयमतिशुद्धचित्तधर्म्मः प्रसादो धर्म्ममेवस्योत्तरावधिः तस्यैव फलीभूतः परगुणेभ्यो वैलक्षण्य वैराग्य मुच्यते यं मुक्तिहेतुसाक्षात्कारं वदन्ति मोक्षविदः यस्योदये प्रक्षीण सर्व्वक्लेशो विधूताशेषकर्म्माशयः कृतविवेकख्यातावप्युपेक्षकः कृतं कृत्यं प्राप्तं प्रापणीयमिति मन्यते योगी, यदनन्तरमेव चित्त मसंप्रज्ञातं संस्कारमात्रशेषं भवति तत्परं वैराग्यं वितमस्कस्य रजोलेशमलस्य चित्तस्य धर्म्मः यतः प्रकृतौ लीना ऐश्वर्य्यमनुभवन्ति यथोक्तवैराग्यात् प्रकृतिलय इति एवमभ्यासवैराग्ये निरूप्य तत्साध्यन्निरूपयन्नादौ संप्रज्ञातं चतुर्विधं दर्शयति ।

निरुद्धचित्तवृत्तेः सम्प्रज्ञात असम्प्रज्ञात इत्यवस्था-पार्थक्यं प्रति किं कारणमित्याशङ्काह ।

॥ वितर्क विचारानन्दास्मितानुगमात् सम्प्रज्ञातः ॥ १७ ॥

पदच्छेदः । वितर्क-विचार-आनन्द-अस्मिता-अनुगमात् सम्प्रज्ञातः ।

पदार्थः । वितर्कः स्थूले आलम्बने चित्तस्य सन्निवेशः समाधानं वा, स्थूलकारणीभूत सूक्ष्मे विषये चित्तस्य समाधानं विचारः, इन्द्रिये चित्तस्य समाधानं आनन्दः । आत्मना सह बुद्धेरेकात्मिकाज्ञानमस्मिता आभिरवस्थाभिः अनुगमः सम्बन्धः, तस्मात् हेतोः

सम्प्रज्ञातः संप्रज्ञायते अस्मिन्निति, यस्मिन् पुरुषख्यातिरूपं यत्किञ्चिज् ज्ञानं विद्यत इत्यर्थः।

अन्वयः। वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः कथ्यत इति शेषः।

भावार्थः। अनन्तवृत्ति सङ्कुलस्य चेतसो युगपत् सर्व्ववृत्ति निरोधाऽसम्भवात् तेषामकैकशो निरोधोविधीयते। अत एकवृत्तिनिरोधादारभ्य सत्वपुरुषान्यतरख्यातिरूपैकसात्त्वस्थावस्थान पर्य्यन्तं चित्तस्य यावती अवस्था सा सम्प्रज्ञातशब्दवाच्या। सम्प्रज्ञातस्य संप्रज्ञायते अस्मिन्निति व्युत्पत्त्या सालम्बन एव। किञ्चालम्बन भेदादेवाऽस्य वितर्कादिचतुर्द्धा भेदः। यदा स्थूलं भूतमालम्ब्य समाधिः प्रवर्त्तते, तदा वितर्क इति सवितर्कः समाधिः यथा प्राथमिको धानुष्कः स्थूलमेव लक्ष्यं विध्यत्यथ सूक्ष्मं एवं प्राथमिको योगी स्थूलमेव पाञ्चभौतिकं साक्षात्करोति ततः सूक्ष्मम्। स्थूले कृतकार्य्यः स्थूलं परित्यज्य तत्कारणीभूत सूक्ष्मपञ्चतन्मात्रालम्बनेन समाहितो भवति एवंभूतः समाधिः सविचारः। ततस्तानपि सूक्ष्मपदार्थान् परिहृत्य इन्द्रियाण्यालम्ब्य समाधिमनुतिष्ठति, इन्द्रियाणि खलु प्रकाशशीलतया सत्वप्रधानादहङ्कारादुत्पन्नानि, सत्वं सुखमिति तान्यपि सुखानि ततश्च तदालम्बनकः समाधिः सानन्द इति कथ्यते। ततस्तान्यपि परित्यज्यात्मानमालम्ब्य समाहितो भवति एषः समाधिः सास्मितः कथ्यते। एतासु चतुर्विधासु विचारवितर्कौ ग्राह्यविषयौ, आनन्दः ग्रहणविषयः अस्मिता च ग्रहीतृ विषयः।

English – Because knowledge reflection, joy and self consciousness follow one another, (Contemplation is called) mixed or sampra-

वृत्तिः—एवमभ्यासवैराग्ये निरूप्य तत्साध्यनिरूपणस्यादौ संप्रज्ञातं चतुर्विधं दर्शयति-वितर्केति। यथा लोके प्राथमिको धानुष्कः स्थूलमेव लक्ष्यं विध्यति पश्चात् सूक्ष्मं तथा प्राथमिको योगी स्थूलमेव शालग्रामादिकं ध्यानेन साक्षात्करोति स स्थूलसाक्षात्कारो वितर्कः तस्य स्थूलस्य कारणं पञ्चतन्मात्रादिकं सूक्ष्मं तस्य ध्यानेन साक्षात्कारो विचारः। इन्द्रियाणि स्थूलानि तेषां-ध्यानेन साक्षात्कार आनन्दस्तेषां कारणं बुद्धिः पुरुषेण सहैकीभूता सत्यस्मिता तस्या ध्यानेन साक्षात्कारोऽप्यस्मितोच्यते। तत्र स्थूलं सूक्ष्मञ्च ग्राह्यं, इन्द्रियाणि ग्रहणानि अस्मिताख्यो ग्रहीता तेषु च ग्रहीतृग्रहणग्राह्येषु ध्यानपरिपाकः संप्रज्ञातयोगः स च वितर्कविचारानन्दास्मितास्वरूपैश्चतुर्भिरनुगमाच्चतुर्विधः सवितर्कः सविचारः सानन्दः सास्मित इति। अत्र यथा घटज्ञानं घटविषयं तादात्म्यात् तथा स्थूलयोगः स्थूलसूक्ष्मेन्द्रियास्मिताविषयकः सूक्ष्मयोगस्त्रिविषयकः, अन्यौ द्व्येकविषयाविति विशेषो भाष्यज्ञापितः। तत्र घटज्ञानं यथा घटाविषयं तद्वत् सूक्ष्मादियोगाः स्थूलाद्यविषया इति मन्तव्यम्।

भोजवृत्तौ तु इन्द्रियेषु सवितर्कमुक्ताऽहङ्कारे सानन्दो महत्तत्त्वे सास्मितेत्युक्तम्। तत्राहमिति विषयवेदकोऽन्तःकरणमहङ्कारः। अन्तर्मुखं सत्त्वमात्रे महत्तत्त्वे लीनं सत्त्वमात्रप्रकाशकमस्मितेति तयोर्भेदः ग्रहीता पुरुषः* अधुना सोपायमसम्प्रज्ञातमाह।

---

* आसियाटिक सोसाइटि मुद्रितायां भोज वृत्ताविदं न दृश्यते। तथाहि तत्र भावना च भाव्यस्य विषयान्तर परिहारेण पुनः पुनर्निवेशनं, भाव्यञ्च द्विधा ईश्वरस्तत्त्वानि च।

OF HINDUISM

(Its polytheism)

BY

Dr. G. W. Leitner, Oriental Instiitute, Woking.

The polytheism of Hinduism is an unexplored mine of historical and scientific truths, which yet awaits the impartial labour on a scarcely trodden field. Even for the masses there is no idolatry in one sense of the term. Every idol, indeed, is, by its very grotesqueness or peculiarity, a proof that the divine can *not* be represented except symbolically or conventionally; not that, as we think, it *is* so represented by the Hindus It is the sacrificial dedication that makes the so-called idol an object of worship, and I have not yet found the Hindu who looked upon the stone or figure as the very God Himself, just as little as I have found a Roman Catholic who looked upon a painting or sculpture of Christ on the Cross as the very Christ who was crucified 1800 and odd years ago.

हिन्दुधर्म्मावलम्बिनां वहुदेवतोपासनातत्त्वं हि वैज्ञानिकैतिहासतत्त्वरत्नानां काप्यदृष्टपूर्व्वा खनिर्भवति। येदानीमप्यकृष्ट पूर्व्वा भूमिरिव जनानां पूर्णपरिश्रममाकाङ्क्षति। हिन्दुधर्म्मावलम्बिनामितरेष्वपि जनेषु कुत्रप्यनुगतपौत्तलिकतायाः प्रचारो नास्ति। सर्व्वा देवप्रतिमा हि स्वविशेषाऽवयवैः शिष्टपरम्परासेवितताहृशप्रतिमासन्तरेण परमेश्वरप्रतिविम्बप्रकाशने कश्चिदपरः पन्थाः अस्तीति प्रमाणयन्ति, न तु यथा वयं तर्कयामः हिन्दुधर्म्मावलम्बिभिरपि तथा परमेश्वरस्य प्रतिमा क्रियते। पूजोपकरणसामग्रीति ज्ञात्वैव तैः प्रतिमाः पूज्यन्ते, मया एतावत्कालपर्य्यन्तं न को ऽप्येवं हिन्दुधर्म्मावलम्बी दृष्टः येन प्रतिमैव परमेश्वराभिन्नतया परिगृहीतः। यथा रोमान्‌काथोलिक् सम्प्रदायिभिः खृष्टस्य प्रतिमा

समालोचनम् ।

जयपुरविलास, मुक्तकमुक्ताख्यौ सारस्वतमिति त्रितयं श्रीकृष्ण-रामकविकृतम्। वयं पुस्तकमेतदधिगम्यातिकृतज्ञहृदयाः संवृत्ताः। ग्रन्थकृत्कविर्विद्वांश्च अस्य विज्ञप्तिपद्यादारभ्यान्तिम-श्लोकं यावत् सर्व्वत्र ग्रन्थकर्त्तुः शक्तिः स्फुटतयाऽव स्थिता। तथाहि विज्ञप्तिपद्यं—

प्राज्ञाः पुस्तकमर्पयामि किमिदं काव्यं प्रणेताऽस्य कः
श्रीकृष्णोऽस्मि तदेतदाकुलतया दोषैर्न रोचिष्यते।
एवं चेत् क्रियतां विशुद्धिरथवा प्रत्नेऽपि काव्ये पुन
र्दोषाः कुत्र न सन्ति सन्ति यदि तन्नृत्तेन्त संतोषतः॥

ग्रन्थकृत् परिचयः।

अस्तीह भरतवर्षे पुष्करमथुराख्यतीर्थयोर्मध्ये।
निजरुचिजितनिखिलपुरं विभवभरं जयपुरं नगरम्॥
शिवपुरमिव सकुमारं वैद्यस्थानमिव यच्च रससारम्।
स्वरिव बहुचमत्कारं पातालमिव कविसत्कारम्॥
अनेकविधवाणिज्यसमुत्सुकवणिक्वरम्।
नालीनिर्गतपानीयधारासंसिक्तचत्वरम्॥

किं बहुना।

विद्यते बहुधा यस्मिन्नुद्यानेषु वियोगिता।
खड्गेषु कोशनिष्ठत्वं हरिणेषु कुरङ्गता॥
किं च यत्र वरीवर्त्ति कंदर्पे दर्पकश्रुतिः।
नीरधौ निम्नगासङ्गो व्रते मण्डपसत्क्रिया॥
तत्रासीद्भट्टमेवाडो गुर्जरो भूमिनिर्जरः।
चन्द्रोज्ज्वलयशाः श्रीमाँल्लक्ष्मणाभिधो भिषक्॥

रोगनिग्रहनिश्चिन्तजनगीतमहामहाः ।
ततः श्रीकुन्दनः कुन्दकीर्तिः सूनुरजायत ॥
यस्मै श्रीरामसिंहाख्यो राजा कूर्मकुलेश्वरः ।
दत्तवान्पाठशालायामुच्चकैर्वैद्यकासनम् ॥
वैद्यवाचस्पतेस्तस्य त्रिवारोढत्रियोषितः ।
प्राप्तलक्ष्मीविलासस्य द्वावभूतां सुतौ कवी ॥
तत्र श्रीकृष्णरामोऽहं ज्येष्ठः श्रेष्ठयशोरुचिः ।
अलंकारि चमत्कारि काव्ययुग्ममकल्पयम् ॥
तदिदं विदुषां प्रीत्यै प्रकटीकर्तुमुत्सुकः ।
श्रीनारायणभट्टेभ्यो नमस्कृत्य न्यवेदयम् ॥
मुद्रापणविशोधाभ्यां टिप्पणीकरणेन च ।
तैरस्म्युपकृतस्तेभ्यः किं ददानि नमोऽन्तरा ॥
अथवा गुणगुम्फश्रीस्तेषां सालंकृतिः कृतिः ।
मत्कृतेरुपरि न्यस्ता श्रयतां शेखरश्रियम् ॥
अन्यकारि तावद्भट्टश्रीनारायणपण्डितानां सम्मतिः
'साहित्यामृतसागरप्रमथने निर्व्याजमन्थाचलः
स्फारस्फूर्जितगद्यपद्यकविताकान्तारकण्ठीरवः ।
रोग्यारोग्यविधिप्रबुद्धधिषणो लक्ष्मीविलासास्पदं
श्रीमत्कुन्दननन्दनो विजयते श्रीकृष्णरामः कविः ॥'१

अथ तस्मिन् पण्डितशिवदत्तस्य—

'काव्यं यदीयं क्रहमम्बरं वा सुवर्णचित्रोज्ज्वलमाविभाति ।
स नन्दनो नन्दतु कुन्दनस्य श्रीकृष्णरामः कविरामकामः ॥'
अथायोध्यकगोलवादिद्विवेदकविदुर्गाप्रसादस्य—
'उद्यत्काव्यलक्ष्मीवलयितवपुषां स्वर्गवाराङ्गनाना-

सौरभ्यं कुङ्कुमे यत्पयसि विमलता यान्वहो तत्समस्तं
मित्रैकत्रैकलितुं चेदभिलषसि तदा पश्य लक्ष्यस्य काव्यम् ॥'

अतः परं श्रीपर्वणीकरोपाख्यनारायण-सुश्लोकाः जयपुरराज-प्रशंसापदादशकमस्ति, तत्रापरान् पञ्च श्लोकानुद्धरामः ।

अष्टाभिः किल दण्डनोतिनिपुणैः सत्प्राड्विवाकैः समं
मध्येसौधमनुत्तमासनगतः कार्याणि कुर्वन्नृणाम् ।
विष्णुर्भू पवपुर्विधाय किमसौ दिक्पालयुक्पालय
तेत्रवं भ्रान्तिमतो मनाङ्न कुरुते कांस्कानयं भूमिपः ॥
दिक्पाला इव दिग्गजा इव तथा वस्वाख्यदेवा इव
शृङ्गारादिरसा इव प्रविलसद्योगप्रतीका इव ।
राजन्ते रमणीयविष्टरगताः श्रीकान्तिचन्द्रादयः
श्रीमन्माधवसिंहवीरनृपतेरष्टौ महामन्त्रिणः ॥
रक्तः सर्वजनेषु शत्रुनिकरे कालो यशोमण्डले
शुक्लः कान्तहरित्प्रतापविभवैर्गौरः शरीरेण च ।
विद्वन्मण्डलमण्डने च कपिशश्चित्रैश्चरित्रव्रजैः
श्रीमन्माधवसिंहवीरनृपते त्वं सर्ववर्णाश्रयः ॥
प्रक्षिप्तैरितरेतरेण बहुभिः पैष्टातकै रेणुभि-
र्मध्ये वीथिरजस्वलामिव महीं कुर्वन्करीन्द्रे स्थितः ।
क्रीडत्येष पुरोगतैश्च गुरुभिः पार्श्वद्वये बान्धवैः
श्रीमन्माधवसिंहभूपतिलको वासन्तिके वासरे ॥
यज्ञैर्देवगणान्धनैर्द्विजगणान्मानैस्तथा बान्धवा-
न्न्यायैः पौरगणान्वधूगणमथ स्नेहेन संमानयन् ।
पुत्रैः पौत्रगणैः सुखान्यनुभवन्शृण्वन्कृतीर्मादृशां
श्रीमन्माधवसिंहवर्मनृपते जीयाः समानां शतम् ॥

अत्र ग्रन्थोऽयमितिग्रन्थस्य उपादेयो वर्त्तते। (१) जयपुरवि-लासः, अत्र जयपुरनगरसौन्दर्य्यवर्णनं ग्रन्थेन साधुतया सम्पादितम्। मुक्तकमुक्तकाली, तत्र च सप्तसराः सन्ति, देवतास्तवनं नाम प्रथमः सरः, समस्यापूरणं नाम द्वितीयः सरः, उद्दीपनवर्णनं नाम तृतीयः सरः, अथ शृङ्गारवर्णनं नाम चतुर्थः सरः, काव्यमालाप्रशंसा-नाम पञ्चमः सरः, हास्यवर्णनं नाम षष्ठः सरः, सङ्कीर्णवस्तुवर्णनं नाम सप्तमः सरः (२) सारशतकं तत्रादौ रघुवंशसारः यत्र २१ श्लोकाः सन्ति, अथ कुमारसम्भवसारः यत्र २२-३८ श्लोकाः सन्ति, अथ किरातार्ज्जुनीयसारः तत्र ३९-५७ श्लोकाः सन्ति, अथ शिशु-पालवधसारः अत्र ५८-७८ श्लोकाः सन्ति, अथ नैषधीयचरित-सारः तत्र ७९-१०१ श्लोकाः सन्ति।

ग्रन्थोऽयं नव्यकविकृतोऽपि सम्यक् प्राचीनतामावहति। अथवा यादृग्गुणविसद्भावेन प्राचीनकाव्यानामनुकारं इहाऽपि तेषां सर्व्वेषां बहुलतयाऽवस्थानादस्य मनोहारित्वमिति। वस्तुतो ग्रन्थस्यास्य प्रशंसामन्तरेण न किमपि वक्तव्यमवलोक्यत इति तूष्णीम् स्थित्वा वयं ग्रन्थकर्त्तुर्दीर्घजीवनमाशास्महे।

भारतीयभूतभविष्यद्वख्यानुध्यानम्।

टि कक्वर्ण टमसन् महोदयमुद्रितभगवद्गीतावतरणिकायाः सप्तदशपृष्ठे लिखितमस्ति "अस्मिन् ससागरधरामण्डले स्वल्प संख्यका एव विषयाः स्वीयशास्त्रेषु दर्शनानां सम्वर्द्धनपरिपोषणा-द्यर्थं स्वनामगौरवमर्हन्ति। ग्रीस्भारतवर्षदेशयोरेव तथाविधं गौरवं सम्भाव्यते सम्भाव्यन्ते चान्यदेशदर्शनशास्त्राण्येतद्देशद्वय-जातदर्शनशास्त्रमूलान्यथवैतदीयवर्त्मतत्त्वप्रकारान्तराणीति।

डक्टर मोक्षमूलरनाममहोदयेन स्वकीयप्राच्यसंस्कृतेतिहास विषयकप्रस्तावे चैवमवादि।

"हिन्दुजातिर्हि स्वभावतोदर्शनानुशीलनपरा" इति (p. 31)

"मानवीयवैज्ञानेतिहासेषु भारतवर्षं हि प्रथमं स्थानं भजते" (p. 31,32)

स एवाविष्कर्त्ता ... [illegible]

सप्नामके ग्रन्थे चैवमलिखत्। हिन्दुजातीया नामेमं वाह्याड़-म्बरपूर्णचेष्टासंकुलं संसारं प्रति न दृष्टिक्षेपञ्चक्रुस्तेषां दृष्टिस्तु नियतं शान्तिपूर्णं विज्ञानमयं लोकं पश्यतिस्म। प्राचीनहिन्दुवं-शीया हि स्वभावतो दार्शनिका आसन्। भारतवर्षमपहाय पृथिव्या नान्यत्र कुत्रचित् प्रदेशे तादृशमनुष्या निवसन्तिस्म। Vol 1 page. 66)

भारतवर्षीयानां चित्तं हि केवलं धर्म्मस्य दर्शनशास्त्राणाञ्च-सेवायां पुष्टिसाधने, सम्यगनुशीलने च व्याप्तं भवति। धर्म्म-भावदर्शनतत्त्वानुशीलनानि च यथा भारतवर्षीयाणामन्तर्वेद्धमू-लानि नहि तथान्यदेशीयानाम् (16p.67)

आर्कविषप्टम्सन् कृतलज् अव् थट्स् नामकपुस्तकस्य भारतीय तर्कविषयकपरिशिष्टे स एव प्रसिद्धशिष्टोत्तमोव्याजहार—"इति-हासाध्ययनेन वयमेतन्निर्णेतुं शक्नुमोयत् प्रथमं ग्रीसदेशीया हिन्दु-जातीयाश्च तर्कव्याकरणविषयकनियमशास्त्राण्याविष्कृत्तास्तस्यग-नुशीलयाञ्चासुश्च।

पूर्व्वोल्लिखितोभयजातीयमनुष्या एव प्राकृतोक्तप्रतिभासम्पन्ना: सन्तोमानसवृत्तिव्यापारनियमान्, भाषातत्त्वनियमांश्च विशेषरी-त्याऽधीतवन्त इति प्रतीयते।

सेकेन्दर नामा ग्रीसदेशीय: सम्राट् भारतवर्षे हि प्राय: सर्व्वा-नेव मनुष्यान् दर्शनशास्त्रानुशीलनपरानवलोकयामास। ततश्च हिन्दुतर्कशास्त्रस्य ग्रीसदेशीयआरिसतोतल्कृततर्कशास्त्रेभ्य: प्राची-नताऽनुमीयते, अनुमीयते च ग्रीसदेशीयदर्शनशास्त्राणां हिन्दु-दर्शनशास्त्रमूलतेति। (p. 283)

हिन्दुदर्शनशास्त्राणि सर्व्वत: सम्पूर्णानि। तेषु सर्व्वत्रैव विस्त-रशस्तर्क प्राकृतपदार्थधर्म्मतत्त्वानि स्वालोचितानि सन्ति।

सर्व्वेषां दर्शनानामपवर्ग एव मुख्योद्देश्यतया समालोचित:। तस्यापवर्गस्याऽवगमे ज्ञानस्य च कारणतोपकल्पिता।

वर्णाश्रमधर्म्माख्यानम् ।

जानकीविरहजनितशोकव्याकुलत्वकथनेन निन्दा वा स्तुतिः ? अपि च त्रिभुवनभजमानजनत्रासविनाशनपुरःसरचतुर्व्वर्गप्रदानैक दक्षपरमेश्वरस्य सीतोद्धरणहेतुकपिकुलसहायत्वकथनेन निन्दा वा स्तुतिः ? अपि च आद्यन्तरहितस्य सनातनस्य परमेश्वरस्य दशरथस्यौरसात् कौशल्यागर्भजातत्वकथनेन निन्दा वा स्तुतिः ? इत्यादिनानाप्रकारजीववत्व्यवहारशालिनि साधनचतुष्टय सम्पन्नजनकर्त्तृकतत्त्वमसीतिमहावाक्यार्थज्ञानजनित तत्त्वज्ञान लब्धात्मतत्त्वजीवस्येव रावणमायामोहनिवारकब्रह्मवाक्यसंस्मृतात्मतत्त्वे रामे नास्माकमीश्वरबुद्धिर्नैवं तदीयप्रतिमाद्यधिकरणकरघुनायकपूजनेनेश्वरपूजनसिद्धिः ।

पण्डितः । ईश्वराभिप्राय एषः ।

"अविज्ञातस्य विज्ञातो भविष्याम्यसतां सताम् ।
अवजाननसन्नश्येत् जानन्मुच्येत सन्नितः ॥"

हन्तुं दुष्टानशेषान् दशवदनमुखान् स्थापयन् धर्म्मसेतून्
साधूंस्रातुं परात्माऽभवदखिलमनोरामरामाऽवतारः ।
कार्य्ये सिद्धे विरिञ्चिः स्वयमपि च शिवः प्रार्थयामास रामं
पूता भूता धरेयं स्वतनुरनुगतं विष्णुलोकं स्वमेहि ॥
अब्धौ सेतुं विधायाऽखिलतरणमतींस्तारयामास सर्व्वान्
स्वीयान् भक्तानयोध्याश्रितसकलनरान् मुक्तिकामान् पशूंश्च ।
गत्वा तीरे सरय्वा भयद भवनदीं गोष्पदीकृतय रामः ॥
प्रेम्णा पारं चकार स्वयमपि सतनुर्विष्णुकोषं प्रविष्टः ॥
यन्नाम स्मृतिमात्रतो हनुमता संलङ्घितः सागरो
यस्याज्ञा श्रुतिमात्रतः कपिवरैः सेतुः कृतः सागरे ।
सोऽयं रावणनाशनत्रिभुवनत्राणाय नारायणो
नास्तिक्यान्धतया त्वया नरसमो रामः समालोकितः ॥

अध्यात्मरामायणरामहृदये शिवोमासम्वादं भवत्प्रश्नानुरूपंपश्य-
ब्रह्मणोहि प्रतिष्ठाहममृतस्याऽव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥

स्वामिकृतटीका। तत्र ब्रह्मणोहीति, हि यस्मात् ब्रह्मणोऽहं प्रतिष्ठा प्रतिमाघनीभूत ब्रह्मैवाऽहं यथा घनीभूतः प्रकाश एव

सूर्य्यमण्डलं तदितरदिवार्थ:। तथा शाश्वतस्य सनातनस्य धर्म्मस्य ऐकान्तिकस्य नित्यस्य च अहं प्रतिष्ठापक इत्यर्थ:।

सान्द्रतारतम्येन व्याप्यव्यापकोऽनल: ।
सान्द्र एव हि वर्त्तिस्तरलो दूरत: क्रमात् ॥
विशेषस्थानगे काचे तरलो गाढ़तां गत: ।
यस्मिन् काचे स्वयं वह्निर्व्यक्त: सेवानुरूपत: ॥
यथा तथैव तद्ब्रह्म गाढ़तारस्वरूपत: ।
अन्तरामन्तरहितं सर्व्वव्यापकमच्युतम् ॥
अप्राकृते मनोहारिरूपं रूपविवर्ज्जितम् ।
प्राकृते किन्तु तत्रापि स्वाऽवतारप्रकाशितम् ॥
भक्तीनां तारतम्येन प्रतिमादिषु तादृशं ।
स्मरन् सजन् लसन् पश्यन् पुरुष: पुरुषार्थभाक् ॥
न तु वा प्राकृतं चित्तं कथमप्राकृतं भजेत् ।
जीवन् पारत्रिकं देहं न चाप्नोति न संशय: ॥
न च जाग्रदवस्थायां स्वप्नदर्शनसम्भव: ।
न याति चाक्षुषं ज्योति: सर्व्वत्रैव वयोहतम् ॥
काचोपहितचक्षु: सर्व्वं पश्यत्यसंशयम् ॥
प्राकृतं चित्तमेतत्तु कदाचिन्नैव पश्यति ॥
सर्व्वत्र पर्व्वदा ब्राह्मी सत्ता युक्त्यास्ति शाश्वत: ।
तत् सत्तानुभवोनैव सर्व्वदा सर्व्ववस्तुषु ॥
नष्टेन्द्रियादृष्टवशात् कृपया परमेश्वर: ।
काचसृष्टिं करोत्येवं भक्तानां कामद: प्रभु: ॥
नानाऽवतारो भगवानभवच्च युगे युगे ।
काचोपनिहितं चक्षुर्यथा पश्यति चाक्षरम् ॥
तथाऽवतारनिहितं मन: पश्यति चाक्षरम् ॥
भक्तिर्हि-सर्व्वलोकानां मातेव हितकारिणी ।
वर्णाश्रमस्थितानान्तु तपोयोगादिभिर्गति: ॥
कलौ वर्णाश्रमरता: प्रायेण मनुजा नहि ।
तेषां भक्तिं विनानाऽन्यां गतिं पश्यामि कामपि ॥

इति वर्णाश्रमाचारधर्म्मसंस्थापने प्रथम:
परिच्छेद: ।

ञित्स्वरितेच्च ङिद्वच्च स्यात् कर्त्रर्थक्रियाफले ।
तत्र बुधादिभिर्नोङित् प्रयोज्यः कर्मणि ङन्तकः ।
बुधयुधेङ्नशजनीङ्द्रुस्रावणे प्रु प्रापणे ।
स्रु स्यन्दने च पानार्थदिव्यद्धर्मसकर्मकाः ।
अचेतनकर्तृकास्ते सकर्मका बुधादयः ।
तथा चेतनकर्तृत्वे पादिवर्ज्या अकर्मकाः ।
पा धेट दम्ब नृतोदन्ताङ्यसुपरिमुहाङ्यमः ।
वसत्यद्दिवसस्त्वैते पादयस्त्ववुधादयः ॥

अथात्मने प्रकरणं । अयित्यादि अनुदात्त इत् इत्यस्य सोऽनुदात्तेत् । ङितोयनान्तात् अथान्तात् अनुदात्तेतश्च धातोरुत्तरे कर्त्तर्यात्मने पदं स्यात् । शेते वोभूयते एधते । ञित् । कर्त्रर्थक्रियाफले विवक्षिते ञिद्धातुश्च ङिदिव स्यात् । ङित्त्वस्वाद्दात्मनेपदं भवतीत्यर्थः । डुधाञ्धातु पठते । अकर्त्रर्थत्वे तु दधाति पठति । यद्यपि सर्व्वेषामेव धातूनां कर्त्रर्थमेव फलं भवति फलाकाङ्क्षां विना कर्त्तुः प्रवृत्त्यसम्भवात् । तथापि फलशब्देनात्र कर्त्तुरुद्देश्यं प्रधानं फलमभिधीयते । नतु तद्धातुक्रियाजन्यं विक्लित्त्यादिकं तद्धात्वर्थरूपं । यदुद्दिश्य क्रिया आरभ्यते तदेव प्रधानं फलं । यथा यागक्रियायां यजमानस्य स्वर्गाप्तिः । पाकक्रियायां विक्लित्तिस्वादर्थं तत्प्रवृत्तेः । दक्षिणावेतनादीनां गुणप्रधानत्वमिति गोयीचन्द्राशयः । भोक्तुं पचतीत्यत्र तु शब्देनैव भोजनमभिधीयते तदेव प्रधानं । विक्लित्त्यर्थं पचतीत्यत्र तु शब्दार्थोधातुना द्योत्यते स एवाच प्रधानमुद्देश्यत्वात् । पचतीत्यादौधात्वर्थत्वे सति उद्देश्यत्वं क्रियाफलमुच्यते । नात्र दोषः तव कोर्त्तिलता नाथ वेष्टितं भुवनत्रयं । फलं विश्वोपकारान्वै धत्ते पर्व्वणीत्यत्र तु वेष्टितमिति कर्म्मोपदानेपि भावे क्त इति विष्णुमिश्रादयः । कोर्त्तिलता कर्त्री फलं धत्ते इत्यन्वयः । फलशब्देनात्र सुख्यातिरुच्यते । हृद्धिरूपं फलं मुख्यं लताव्यितं तेनाऽत्र कर्त्रर्थक्रियाफलसिद्धिः । विश्वोपकारस्तु धात्वर्थरूपमप्रधानफलंद्योतकं । पर्व्व शब्देनात्र संक्रान्त्यादिरुच्यते अयमर्थः सुधीगम्यः । तत्र । तत्र कर्त्रर्थ-

स्वार्थणिङामात्मनेव धातुपाठदर्शोऽब्रवीत् ।
कर्त्रर्थे तत्फले येषां ज्ञातं स्यादात्मनेपदं ।
उपपदावगत्यां तत्तेषां भवति पाक्षिकं ।
प्राक्कर्म कर्तृतायां तु अकर्त्रर्थक्रियाफले ।
अध्यार्थोणिङि ङिच्च स्याद्धस्त्यारोहयते नृपं ॥

क्रियाफले प्रयोजकणिङन्ते बुधादिभिन्नोधातुर्ङित् स्यात् । वाचयते पाठयते । बुधादीनां बुधेत्यादिना । बुध अवगमे युधसंप्रहारे इङ अध्ययने नश अदर्शने जनीप्रादुर्भावे । चलनार्थत्वेन द्रुप्रुङस्रुवां बुधादित्वसिद्धावप्याह द्रुद्रावणे इत्यादि । पानार्थाः पा धेट पीङ-स्नुञः । भुज्यर्थास्त्वदादयः । चलनार्थाश्चलगम स्रु द्रु स्रुङादयः । ते इति बुधादयः इत्यर्थः सकर्म्मका अचेतनः कर्तृकाश्च यदास्युस्तदा बुधादयः स्युः । एवं चेतनकर्तृत्वे परोक्तान् पादीन् त्यक्त्वा अकर्म्म-कास्तथा बुधादयः स्युः । पादिगणमाह पाधेटेत्यादिना । स्वार्थे । स्वार्थणिङ चुरादिणिङन्ताः तेभ्योऽत्र कर्त्रर्थक्रियाफले आत्मनेपदं स्यादिति धातुपाठदर्शी धातुबोधोऽब्रवीत् । कर्त्रर्थे । स्वरितञित्वात् कर्त्रर्थक्रियाफले आत्मने पदं ज्ञातमित्यर्थः तदेव समीपोच्चारितपद कल्पितं भवति सुयत्रमित्युपपदं । प्राग् । प्रागित्यव्ययं नाम । ध्याय-त्यर्थादन्यस्य धातोर्णिङुत्पत्तेः प्राक्कर्म्मणः प्रयोजके णिङि कर्तृत्वे सति अकर्त्रर्थक्रियाफले कर्त्तरि वाच्ये आत्मने पदं स्यात् । अकर्त्रर्थोऽ-यमारम्भः । आरोहति हस्तिनं नृप इति प्राक्कर्म्मणः प्रदर्शकं वाक्यं स्मर्त्तव्यं । ननु हस्तिनः कर्म्म कर्तृत्वात् कर्म्मवद्भावात् आत्मनेपदं सिध्यत्येव यगस्य तु नमादित्वात् यगपि न स्यात् किंलक्षणेनेत्यत आह अथास्त्वन्तेति । अस्यार्थः यदि न्यग्भवनं हस्ति कर्म्मणि समवेतं तथापि प्राधान्येन न्यग्भावनायाः कर्तृस्तता न्याय्या । नात्म । आत्मनः शब्दस्य प्राक्कर्म्म कर्तृत्वे आत्मनेपदं न स्यात् । घातयत्यात्मा स्वय-मेवात्मानं । नापि । प्राक्कर्म्मकर्तृत्वे सति प्रयोजकणिङन्तात् पुनर्णिङि आत्मनेपदं न स्यात् हस्तिपकानारोहयमाणं हस्तिनं प्रयुङ्क्ते इति वाक्ये आरोहयति हस्तिना हस्तिपकान् महामात्रः ।

हाम्लेट् चरितम्।

ततः प्रविशति प्रेतात्मा। *

हीर। शीर्षमास्य ननु सम्प्रति पश्य
कां दिशं पुनरसावभियाति (१)।
पृच्छ्यतेऽद्य नु मया यदि चाऽयं
शोषयेदपि रुषा मम कायम् (२)
प्रेत तिष्ठ यदि तेऽकिमपि स्या
दस्फुटं स्वरमथ स्फुटवाक्यम्।
देहि मे प्रतिवचःकिमु कार्य्यं
किञ्चिदत्र तव येन सुखं वा
सम्भवेन्मम च मङ्गलमत्र॥ (३)
आश्रितो यदि भवान् निजदेश-
भावि दैवहननस्य च [illegible]।
सूचकोऽस्ति यदिह प्रतिकर्त्तुं
ज्ञातपूर्व्वमलमस्तु (४)वदाशु॥

---

* इतः पूर्व्वमपि वरनर्ड् हीरसीववाक्ययोः सम्यक् सङ्गत्यभावादनुवादे तदखारस्य-शङ्कया परित्यक्तमस्माभिः।

(१) ननु भोः सम्प्रति जीर्षं आस्य असौ पुनः कां दिशं अभियाति पश्य। इत्यन्वयः।

(२) यदि च अयं रुषा मम कायं शोषयेत् अपि तथापि अद्यतु मयाऽयंपृच्छ्यते इत्यन्वयः।

(३) हे प्रेत तिष्ठ यदि ते तव किञ्चिदपि अस्फुटं रुतं अथवा स्फुटं वाक्यं स्यात् तदा मे वक्ष्यमाण प्रश्नस्य प्रतिवचो देहि कं... किमु ... उ भोः किञ्चित् वस्तु कार्य्यं करणीयं येन कृतेन अद्य अत्र भुवि तव सुखं मम च मङ्गलं सम्भवेत्।

(४) यदि भवान् निज देश-भावि दैवहननस्य स्वदेशभविष्यद्दैवपीड़नस्य सूचकः असि यत् दैवहननं पूर्व्वं ज्ञातं प्रतिकर्त्तुं अलं योग्यं अस्तु, तत् कथ्यताम्।

मृतखात्ययि[illegible]निर्जीवितकाले
सञ्चितः किमथवा भवताऽस्ति ।
[illegible] येन परेताः
सञ्चरन्ति मरणोत्तर मित्थं
[illegible] भुवने जनवादः । (५)

(नेपथ्ये कुक्कुटशब्दः)

[illegible] तिष्ठ वदैतत्
आर्यवीर [illegible] मार्सिलस त्वम् । (६)

बर । इह चाऽत्र ।

होर । ——ननु सोऽत्र ।

मार ।—— गतोऽसौ

गौरवाकृति ममुं प्रति नोऽसा
[illegible] बलात्कृतिरेषा
निष्फलाहुतिरिवैव तु वायौ ॥
तद्भुजोद्यतिरमुं विनिहन्तुं
हास्यमेव जनयत्यतिमात्रम् । (७)

---

(५) भो अङ्ग वद अथवा भवता अधिजीवितकालं जीवितसमये मृतखात्तः भूमिगर्भे अर्थराशिः सञ्चितः येन हेतुना इह भुवने मर्त्यलोके परेताः मरणोत्तरं नित्यं इत्थं अनेन प्रकारेण सञ्चरन्ति एष जनवादः ।

(६) अयि भो मार्सिलस त्वं एतं [illegible] ।

(७) अमुं गौरवाकृतिं प्रति नः अस्माकं एषा बलात्कृतिः भाविता तु इह प्रेते वायौ इव आहुतिः निष्फला तत् तस्मात् अमुं विनिहन्तुं भुजोद्यतिरतिमात्रं हास्यं एव जनयति ।

वर । वत्स, विद्युदिव लक्षित एष
उद्गतश्च चरणायुधनादः ।

होर । तद् भयप्रदनृपाकृतिमेत्य
दुष्टमानव इवापगतोऽसौ ।
एतदस्ति बहुशः श्रुतपूर्वं
प्रातराणकसमश्चरणास्त्रो
यावदुच्चपरिकम्पिनिनादैः
जाग्रतं दिनधवं कुरुतेऽत्र,
तस्य चोदयमतः परिचिन्त्य
सूद्रता जगति तेऽखिलभूताः
ये च यत्र विषये विचरन्ति
सागरानलधरागगनेषु
तत्र तत्र निभृता निवसन्ति ।
सत्य मद्य तु समर्थित एष
सोऽमुनानिजपुरीजनवादः (८) ।

मार । अद्य कुक्कुटरवं त्वनुभूय
सद्य एवहि तिरोदध एषः
अस्ति चान्य इह मानववादः

---

(८) भयप्रदनृपाकृतिं एत्य दुष्टः पापकारी मानव इव असौ प्रेतः तत् तस्मात् कुक्कुट नादात् अपगतः पलायितः । एतत् बहुशः श्रुत पूर्वं अस्ति एतत्किं इत्याशङ्क्याह चरणास्त्रः कुक्कुटः [illegible] समः प्रभात पटह इव यावत् अत्र भुवि उच्चपरिकम्पिनिनादैः दिनधवं सूर्यं जाग्रतं कुरुते तावत् अतः कुक्कुट[illegible] सूर्यस्य उदयं परिचिन्त्य जगति ते सूद्रता भूता ये च सागरानलधरागगनेषु यत्र विषये निवसन्ति तत्र तत्र निभृताः सन्तोनिवसन्ति इति बहुशः श्रुतपूर्वं सत्यं स एष जनवादः अद्य अमुना प्रेतेन निजपुरः समागतः समर्थितः । इत्यन्वयः ।

यावदेति समयः स च यत्र
जन्म पर्व्व सुमहत् क्रियते न
स्तातुरत्र भुवने खलु तस्मिन्
कुक्कुटोऽह्नि निशामभिरौति
तेन तत्र निशि नापिच कश्चि
द्भूतयोनिरिह सञ्चरतीति
सम्भवन्ति चणदाः चणदाश्च
नाऽपि वाऽशुभ फलं वितरन्ति
कुग्रहा अधिनरं न च कश्चित्
मायया निशि परी हरतीतः।
डाकिनी सुमधुरैरपि मन्त्रैः
नोनरं निजवश्यं विदधाति ॥
तेन पूततर एष च काल
ईशनिःसृतदयाश्रित पूर्णः।

होर। ज्ञातं सर्व्वं मयैतत् क्वचिदपि च तथा निश्चयश्चापि तेषु
पश्शे यं चाद्यसन्ध्याऽरुणकरनिकरा रक्तरूपा चकास्ते।
नैशप्रालेयविन्दुप्रकरधवलितोत्तुङ्गशृङ्गोदयाद्रौ
तत्स्थामोऽस्मान्निवृत्ता वयमपि च तमीयामरक्षाविधानात् ॥
श्रोतव्यश्चोपदेशो मम निशि यदिहा-लोकितं सर्व्वमेतत्
वाच्यं हाम्लेटनाम्ने नरपतितनयायैव यूने च शङ्के।
मुकोऽस्मास्वद्ययोऽस्मान्नरपतितनयेनालपिष्यत्यनेन
अस्मिन् वः सम्मतिश्चेत् कथयत नश्चिद स्नेहकार्य्यानुरोधात्।
मार। एतद्धि कार्य्यमस्माभिः प्रातरद्यैव मे मतिः।
यदैवोद्वेगशून्यं तं द्रक्ष्यामः सत्त्वमेव च ॥

प्रथमाङ्कः ।

नाशाश्रयेऽमितपराक्रमसूर्य्यवंशे
प्रायः सुधाकरकुले च विहीनसत्वे ।
उच्चैस्तरां यवनपीड़ितमार्य्यधर्म्म
मेकः समुद्धरति कङ्कणभूमिपालः ।

वीर । आकर्ण्य सोल्लासम् सर्व्वथा खल्वियमव्यभिचारिणी भारती ।

नाशाश्रये इत्यादि श्लोकं पुनः पठित्वा स्थाने खलु भरतकुलाना मिवकुशोभषा ।

तथाहि—

वीर्य्योज्ज्वलद्रुवनभूपयशोविकन्तुं
देवद्विजानकुमतः परिरक्षितुञ्च ।
कीर्त्तिस्रजा तदनुभूषयितुं दिगन्त
कोन्यः क्षमेत भुवने शिवजीनृपेन्द्रात् ।

इति । तद्यावत् महामायामन्दिरादाचार्य्योपदेशमादाय प्रतिनिवृत्ताय देवपाददर्शनार्थं प्रस्थातुकामाय अस्मत् समाजपतये श्रीसम्भयूरेश्वराय प्रवृत्तिमेतामावेदयामि ।

इति निष्क्रान्तः विष्कम्भकः ।

ततः प्रविशति राजा विभवतश्च परीवाराः । (नेपथ्ये वैतालिकः पठति, जयति जयति देवः ।

अम्भोदैर्जलबुद्बुदैरिव धरालैर्भूपैरमुनानिशं
प्रादुर्भूय क्षणमेव दर्शितगुणैः काले पुनर्लीयते ।
एका केवलमार्य्यवीर जगतामानन्दमुल्लासिनी
कीर्त्तिस्ते नृपमौलिवन्दितपद त्वां जीवयन्तीस्थित

राजा। मन्त्रिणमुद्दिश्य। तन्त्रजित्! निपुणमालक्षितं युष्माभिः जयसिंहस्य राज्ञः पुनर्दुर्गाक्रमणं प्रति यथा व्यवसित-मिति ?

तन्त्र। देव सम्यगेवालक्षितास्माभिः क्षत्रिय भूमिपते रस्मदुत्सादनाय बद्धपरिकरा महती वाहिणी पुनर्नगरीमभिचलितेति।

राजा। सरोषोल्लासम्। ननु कथ्यतामुपेक्षिता इति, कात्र पुनरस्माकं विचारणा, अग्रे सरतु शिवजी वाहिणी, अयमेव हि महाराष्ट्र सैनिकानां शुभएवावसरः, समरशिरसि प्रतिपक्षक्षपणाऽद्वितीयवीर्य्यसम्मानप्रदर्शनस्य पश्य तन्त्रजित्।

पूर्व्वं ये रणभीरवः प्रतिभटा दूरं रणात् ताड़िताः
सैन्यैर्मा यवनेश्वरस्य न ततः श्लाघासहेऽस्मद्बलम्।
योद्धुं योऽयमुपागतोऽद्यनृपति वीर्य्योज्ज्वलन्नारत
स्तच्चेत् हारयितुं भवेन्ममचमूः श्लाघ्या तदा शूरता॥

तन्त्र। देव! एवमपि चिरभीरुजनविजयविशेषोल्लासितानामसम्पादितनिरतिशयशूरोचितसमराभिनयानामस्मत्सेनाभटानाम यत्नसम्पादितरिपुविद्रावणविक्रान्तवलवदुपायीभूत निशितशस्त्र-निकराः परिहाय चिरसमरालाभसमुपचीयमानजाड्यम् मलीभावञ्च विशदप्रभाभिरुज्ज्वलयिष्यन्ति दक्षिणापथवियदन्तर-मिति।

राजा। तथ्यमेवैतत् अन्यदपि पश्यतु भवान्।

त्यक्तस्वार्थचयैः स्वधर्म्मनिकृतिप्रोन्मूलनाकाङ्क्षया
सङ्ग्रामाङ्गनमापपतद्भिरधुनास्माभिर्यदेषां क्षुधा।
संवर्द्धा निजदासभावदृढ़ता सम्पादनप्रार्थिनाम्
चक्रानामपि तन्मनीषिनिकरेऽस्माकं यशोहृद्ग्ये।

तन्त्रजित्। स्वामिन् उपपन्नमिदम् सर्व्वथैव

तथाहि—

अनासक्तिः स्वार्थे जननवसुधा मङ्गलविधौ
गरीयान्नायासो जनमहितधर्म्मे प्रणयिता।
इदानीमस्माकं सकलमिदमेषां गुणगणैः
परीक्षायां विद्वद्धृदि कमपि भावं जनयति॥

राजा। तन्त्रजित्, एवं चिरप्रार्थितगौरवख्यापिकामाशायति मपेक्ष्य समरभुवमवतीर्णानामस्माकं काऽस्तु एवं मन्ये पराजयोऽपि परिणमति जयएव।

प्रविश्य दौवारिकः देव अयमागतः।

राजा। अये कः?

दौवा। तत्रभवतः ब्रह्माचार्य्यस्य सकाशादनुज्ञामुपादाय मन्त्रिप्रवरो मयूरेश्वरः।

राजा। अविलम्बं प्रवेशय तम्।

यथा ज्ञापयति देव इति निष्क्रम्य प्रविश्य मयूरेश्वरेण सार्द्धं दौवारिकः भट्टक एष खलु देवस्त्वदागमनं प्रतीक्षमाण एव तिष्ठति तदुपसर्प।

मयूरेश्वरः। उपसृत्य जयति जयति स्वामी।

राजा। भद्र! मयुरेश्वर! अपि तत्र भवन्तोऽस्मद्गुरवः अव्याहत कुशलाः?

मयु। देव! आवर्जितदैवानां तत्रभवतां कुतोऽकुशल सम्भावना?।

राजा। अथ किमर्थाय मह्यम् किमादिशन्ति गुरुचरणाः?

मय। देव आदेशस्तेषां पत्रिकायामस्या अवगन्तव्यः। इति राज्ञे पत्रिकामर्पयति।

राजा। गृहीत्वा वाच्यतामिति तन्त्रजितः अर्पयति।

तन्त्र। गृहीत्वा वाचयति।

स्वस्ति विविधविरुदावलीविराजमानमानोन्नतमहाराजा-धिराजश्रीश्रीमहाराजकौशलेश्रीलक्ष्मीसिंहजी वर्द्धिष्णो विधाय विहिताशिषां परम्परामिदमावेदयति ब्रह्मानन्द स्वामी ।

क्षपायां घोरायां तव नियति दृष्टौ प्रतिहितौ
जगद्वन्द्यामम्बां नयनपथयातामकरवम् ।
तयोक्तं श्रीलाभः शिवजिन्नृपते स्वर्द्धिं भविता
नचेदस्त्राण्येष क्षिपति समधर्म्मो नृपवरे ॥

राजा । आकर्ण्य क्षणमनन्यमनाइव स्थित्वा । मयूरेश्वर किमेतत् ? ।

मयू । महाराज ! किमन्यत् अनेन खलु भगवन्निदेशेन ।
बाल्ये व्याकुलचित्तता गुरुकुले सह्याद्रि शृङ्गेऽजने ।
कैशोरे नितरामनल्प विषयेषूत्साहजप्रेरणा ।
तारुण्ये समराङ्गने स्वभुजाये विश्वास दार्ढ्यं यशः
सर्व्वस्वं ननुदैव वामललिता दस्मात् सुर्व्वं हृतम् ।

राजा । मयरेश्वर इदमयथा यच्च मादिशन्ति गुरवः ननु विचार्य्यतां कथमित्थमपि सम्भाव्यते ।

पश्य

क्षिपद्गङ्गास्रोतोविहितसलिलक्रीड़नविधिः
निवृत्तिः स्वप्नेऽपि प्रदिशति यदीयां गुरुरुजाम् ।
विपद्वन्धुर्यस्योन्मदरिपुवलाक्रान्ति जनिता
जनः सोऽयं भूत्वा रिपुपदनतस्तिष्ठतु कथम् ॥

क्षणं तुष्णीम्भूत्वा सरोषं ।

अन्यच्च भोः केयं सन्धिकथा पापनिवर्हैरमीभिः ।
अद्यापि भारत भुवः प्रभवामि लोके
व्यद्याप्यनार्य्यलघता हृदये चकास्ति ।

धातुसूत्रं ।

यथाख्यस्य क्रिया प्राधान्यात्मकाय फलरूपिणी ।
कर्त्तृस्थाऽत: कर्म्मवत्त्वं [illegible] ॥
नात्मन: कर्म्मकर्त्तृत्वे नापि ण्यन्तात् पुनर्णिङि ।
हनं हित्वा तु शब्दार्थं ङित्क्रियाव्यतिहारत: ।
यस्योपपदमन्योन्येतरेतरपरस्परं ।
तमसंविवहेतार्थमसंप्रहृत्वधार्थकं ॥
हित्वाऽत्र धातवोऽन्ये [illegible] स्वत: ।
आत्मनेपदिन: सर्व्वे [illegible]भावकर्म्मणो: ॥
धात्वर्थ: केवलोभाव: सा क्रिया भावनापि च ।
नैमित्तिकात्मनेपदं तत्तद्धातौ प्रतिष्ठितं ॥

यथाख्यस्येति अस्यार्थ: यदि व्यञ्जनं कर्म्मणि समवेतं तथापि प्राधान्येन [illegible] कर्त्तृस्थता नग्याख्या ॥ नात्म । आत्मन: शब्दस्य प्राक्[illegible] आत्मनेपदं न स्यात् । [illegible] स्वयमेवात्मानं ॥ नापि ॥ [illegible] कर्त्तृत्वे [illegible] णिङन्तात् पुनर्णिङि आत्मनेपदं न स्यात् । हस्तिपकान् [illegible] हस्तिनं प्रयुङ्क्ते इति वाक्ये [illegible] हस्तिना हस्तिपकान् महामात्र: ॥ हनं ॥ क्रियाव्यतिहारे हनधातुं सन्त्यज्य अन्ये धातवो ङितो भवन्ति । अन्योन्यशब्द इतरेतरशब्द: परस्परशब्दश्च यस्योपपदं स्यात्तं धातुं [illegible] इत्यर्थ: गतार्थधातुं तथा संप्रह-[illegible] हिंसार्थकं धातुञ्च हित्वा अन्ये धातवोऽत्र क्रियाव्यतिहारार्थे ङित: स्यु: । व्यतिसंक्षिपन्ते खला: [illegible] क्रियाया [illegible] इत्यादिषु व्यतिहसन्ति, व्यतिपठन्ति, एवमन्योन्यं व्यतिलुनन्ति अन्योन्यं लुनन्तीत्यर्थ: । अन्योन्यस्य व्यतिलुनन्ति अन्ये चान्यस्येतरार्थ: । एवमितरेतरमितरेतरस्य परस्परं परस्परस्य । एवं व्यतिगच्छन्ति, संविवहस्य तु व्यतिसंविवहन्ते मार्गा: एवं व्यतिघ्नन्ति, संप्रहृअस्तु व्यतिसंप्रहरन्ते योधा: । आत्मने । भावकर्म्मणोर्वाच्ययो: । केवलं द्वितीय: । या क्रिया सैव भावना ॥ नैमित्तिकमुपसर्गादियोगे यथासम्भवं आत्मनेपदगणमध्ये तत्तद्धातौ प्रति-

यथा क्षिपा प्रतिवहत् परस्मैपदभागिनः ॥१०॥
इत्यात्मनेपदविवृतिः ॥ अथ क्रियाफलं ॥

धातोरर्थः क्रियैवैका साध्या सिद्धा तु सत्ववत् ।
व्यापारो भावना सैवोत्पादना कृतिरेव सा ।
एकार्था ह्येकरूपातो न भिन्ना तत्विरुद्धया ।
भाष्ये त्वतीन्द्रिया प्रोक्ता कार्य्याद्यै रनुमीयते ॥
भर्तृहरिभट्टोऽप्याह ॥
गुणभूतैरवयवैः समूहः क्रमजन्मनां ।
बुद्ध्याप्रकल्पितोभेदः क्रियेति व्यपदिश्यते ॥

एका सती द्विधा। साध्या सिद्धा च, वाक्यसमापिकाक्रियान्तराना काङ्क्षिणी या सा तिङ्दिन्ता क्रिया क्वचित्क्त्वल्यप्शानवस्थानक्तवत्वन्ता सिद्धा तु क्रियान्तराकाङ्क्षिणी क्तान्तादिका। सा सिद्धा पुनः सत्ववत् द्रव्यमिव संख्याकारकत्वक्रियाद्याश्रयाऽपि भवति उक्तञ्च भाष्ये । कृद-भिहितोभावोद्रव्यवत् प्रकाशते इति अस्यार्थः । कृत्प्रत्ययेनोक्तः भावः क्रिया द्रव्यं विशेष्यमिव प्रकाशते । द्रव्यं यथा सुवाद्याधारस्तथा कृदाद्यभावोपि। पाकाः सन्ति, पाका दृश्यन्ते। सा क्रिया वैयाकरण-मतसिद्धा व्यापारात्मिका । मीमांसकमतसिद्धा भावनाभिधा। एवं न्यायमतसिद्धा कर्तुर्यायामरूपा कृतिरिति। ननु कथं सैका पाकान्त र्वर्त्तिन्योहि नमनोन्नमनादयो ज्वलनाधिश्रवणादयश्च बह्व्यः क्रिया दृश्यन्ते तस्मादाह एकार्थ इति। एकधातुवाच्यत्वे न एकरूपैव भवति। एकोऽर्थोयासामितिविग्रहः । रूप्यते ज्ञायते येन तद्रूपं यथा पाकत्वं तदैकोधर्म्मस्तदवच्छिन्नायाः क्रियाः नमनोन्नमनत्वादिभिर्नाना-त्वेपि पाकधातूपस्थाप्यत्वे न तदेकधर्म्मावच्छिन्नत्वादेकैव व्यवक्रियते अन्यथा प्रतिग्रासोच्छिष्टभोजनप्रायश्चित्तापत्तेः । तद्विशेषणंस्यापि बहुवचनप्रसङ्गाच्च । हि यत एकरूपा अतस्तद्विरुद्धाया पचते नमनो न्नमनादिक्रियानां परस्परविरुद्धानां विजातीयधर्म्मावच्छिन्ना या पाकक्रिया सा न भिन्ना कूटस्थै कत्वे न एकैवावगम्यते॥ भाष्यमिति॥ गुणविशेषणं। क्रमजन्मनामधिश्रयणादिक्रियाणां समूहः कलापः । अवयवैरिति विशेषणे तृतीया । नानात्वेपि खले कपोतपातएक-लक्षणा क्रियैवैकोच्यते ॥

सांख्यतत्त्वकौमुदी ।

(३) न च मा हिंस्यात् सर्व्वा भूतानीति सामान्यशास्त्रं विशेष शास्त्रेण अग्नीषोमीयं पशुमालभेतेत्यनेन वाध्यत इति युक्तं विरोधे हि वलियसा दुर्वलं वाध्यते न चेहास्ति कश्चित् विरोधः भिन्नविषयत्वात्। तथा हि मा हिंस्यादिति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्वमपि अग्नीषोमीयं पशुमालभेतेत्यनेन तु पशुहिंसायाः क्रत्वर्थत्वमुच्यते नत्वनर्थहेतुत्वाभावस्तथा सति वाक्यभेदप्रसङ्गात्, न चानर्थ हेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः हिंसा हि पुरुषस्य दोषमावच्यति क्रतोश्चोपकरिष्यतीति। क्षयातिशयौ च फलगतावप्युपाये उपचरितौ क्षयित्वञ्च स्वर्गादेः सत्त्वे सति कार्य्यत्वादनुमितमिति। ज्योतिष्टोमादयः स्वर्गमात्रस्य साधनं वाजपेयादयस्तु स्वाराज्यस्येत्यतिशययुक्तत्वम् युक्तञ्च परसम्पदुत्कर्षो हीनसम्पदं पुरुषं दुःखाकरोतीति। अपाम सोममसृता अभूमेति चामृतत्वाभिधानं चिरस्थेमानमुपलक्षयति यदाहुः आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति अतएव च श्रुतिः न कर्म्मणा न प्रजया न धनेन नैके अमृतत्वमानशुः । (३)

(३) ननु जुहोतीति सामान्यशास्त्रं यथा पदे जुहोतीति विशेषशास्त्रेण वाध्यते तथा मा हिंस्यात् सर्व्वा भूतानीति पशुहिंसा निषेधविषयकं सामान्यशास्त्रं अग्निषोमीयं पशुमालभेतेत्यनेन पशु हिंसाविधायकविशेषशास्त्रेण वाध्येत इत्याशङ्क्याह न चेति। माहिंस्यात् सर्व्वा भूतानीति सामान्यशास्त्रस्य अग्निषामीयं पशु मालभेतेति विशेष शास्त्रेण वाधेन युक्तः तत्र हेतुमाह विरोधाभावा दिति जुहोतीति दृष्टान्ते समानविषयत्वरूपविरोधेन सामान्यशास्त्रस्य वाधेऽप्यत्र विरोधाभावात् वाधासम्भव इति भावः। ननु

हि यस्मात् [illegible] [illegible] [illegible] [illegible] दुर्बलौ
मीणप्रमाणगानि वाक्यानि। एवं विरोधस्तु समानविषय एव भवति
अत्र तु मा हिंस्यादग्निषोमीयमिति द्वयोर्भिन्नविषयत्वात् न कश्चि-
द्विरोधोऽस्तीति भावः। एतदेवोपपादयति तथाहीत्यादिना,
तथाहीत्यत्र तथाचेति क्वचित् पाठः। तथाहि हिंसायाः परस्य
वाविरुद्धपुरुषानिष्टजनकत्वं क्रतूपकारत्वबोधकत्वं भिन्नविषयत्वात् न
विरोध इति तात्पर्य्यार्थः, अक्षरार्थस्तु मा हिंस्यादिति हिंसानिषे-
धेन हिंसायाः अनर्थहेतुभावो गम्यते हिंसा अनिष्टकारिणीतिमा-
त्रार्थं गम्यते न तु अक्रत्वर्थं तं क्रतुर्थम् तदर्थमपि हिंसां न कुर्य्यादि-
तार्थस्तु न ज्ञायते। एवं "अग्निषोमीयं पशुमालभेत" इतिवचनं यज्ञार्थं
पशुहिंसाया [illegible] गम्यते न तु तया विधिहिंसया कश्चि
द्दोषो न भवतीति प्रत्याय्यते। तथा सति पशुहिंसायाः क्रत्वर्थत्वे अनर्थ
हेतुत्वाभावे च सति एवं मा हिंस्यादिति निषेधेन हिंसाया अनर्थ
हेतुत्वे क्रत्वर्थाभावे च सति वाक्यभेदप्रसङ्गः एकैकस्मिन्नपि वाक्ये
वाक्यद्वयापत्तिः स्यात् न त्वेकेन वाक्येन भावार्थोवुध्यते। वाक्य-
भेदकल्पनायां च दोषः स्यात्। किञ्च मा हिंस्यादिति निषेधस्य
वैधहिंसातिरिक्त हिंसा परत्वे युधिष्ठिरादीनां स्वधर्म्मेऽपि युद्धादौ
ज्ञातिवधादिजनितपापपरिहाराय प्रायश्चित्तश्रवणानुपपत्तेः। तथा
"तस्माद् यास्याम्यहं तात दृष्ट्वेमं दुःखसन्निधिं। त्रयीधर्ममध-
र्माढ्यं किंपाकफलसन्निभमित्यादि महर्षिवचनविरोधापत्तेश्च।

ननु यज्ञार्थहिंसाया दोषावहत्वे यज्ञादिकर्म्माणि परित्याज्या
नीत्यत आह त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः। यज्ञदान
तपः कर्म न त्याज्यमिति चापरे इति विधि निषेधमूलकमतभे-
देन विप्रतिपत्तिमुपन्यस्य निश्चयं शृणु मे तत्त्यागे भरत सत्तम
यज्ञोदानं तपः कर्म न त्याज्यं कार्य्यमेव तत्। यज्ञोदानं तपश्चैव
पावनानि मनीषिणामिति

पातञ्जलयोगसूत्रम् ।

विरामप्रत्ययाभ्यासपूर्व्वः संस्कारशेषोऽन्यः ॥ १८

पदच्छेदः । विराम-प्रत्यय-अभ्यास-पूर्व्वः संस्कार-शेषः अन्यः ।

पदार्थः । विरामोवृत्तीनामभावस्तस्य प्रत्ययः कारणं तस्य अभ्यासः तदनुष्ठानपौनःपुन्यं तदेव पूर्व्वः यस्य स कश्चनसंस्कारः शिष्यतेऽस्मिन्निति अथवा संस्काराणां शेषोऽस्मिन्निति संस्कारशेषः अन्यः पूर्व्वोक्तसम्प्रज्ञातविलक्षणः ।

अन्वयः । अन्यः विराम प्रत्ययाभ्यासपूर्व्वः संस्कारशेषश्च भवतीतिशेषः ।

भावार्थः । इह चतुर्विधश्चित्तस्य परिणामः, व्युत्थानं समाधिप्रारम्भः, एकाग्रता, निरोधश्च । तत्र क्षिप्तमूढ़े चित्तभूमी व्युत्थानं विक्षिप्तभूमिः सत्त्वोद्रेकात् समाधिप्रारम्भः, एकाग्रतानिरुद्धे तु पर्य्यन्तभूमी । प्रतिपरिणामश्च संस्काराः । तत्र व्युत्थानजनिताः संस्काराः समाधिप्रारम्भजैः संस्कारैर्हन्यन्ते । तज्जाश्चैकाग्रजैः, निरोधजनितैरेकाग्रताजाः संस्काराः स्वरूपञ्च हन्यते । यथा सुवर्णसम्बलितं ध्मायमानं सीसकमात्मानं सुवर्णमलञ्च निर्द्दहति एवमेकाग्रताजनितान् संस्कारान् निरोधजातः स्वात्मानञ्च निर्द्दहन्ति । इत्येवं रूपः संस्कारशेषः अथवा कश्चनः संस्कारोऽन्तर्लीन एव शिष्यते परन्तु कदाचित् व्युत्थाने तदनुरूपकार्य्यदर्शनात् इति संस्कारशेषः ॥ अन्यः असम्प्रज्ञातः । सूत्रस्य फलितार्थस्तु कृतवैराग्याभ्यासं चित्तं निरालम्बनं निर्व्विषयमभावप्राप्तमिव वृत्तिरूपकार्य्याकरणात् मृतकवद्भवति । इति

On being destitute of all activity, by mens of previous exercise he accomplishes the other kind of contemplation. Some influences still adheres to him.

राग्यं तदभ्यासः पूर्व्वं उपायो यस्य स तथा अनेन पदेनोपाय उक्तः अन्यः असंप्रज्ञात समाधिः संस्कारशेषः परं हि वैराग्यं सम्प्रज्ञात संस्कारानप्यभिभूय स्वसंस्कारं शेषयति स निर्व्वीजः समाधिः निरालम्बनत्वात् कर्म्मयोगानामभावाच्चेत्यर्थः। अयमसंप्रज्ञातो द्विविधः भवप्रत्ययः उपायप्रत्ययश्च तत्राद्यो मुमुक्षुभिर्हेयः।

भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥ १९

पदच्छेदः। भव-प्रत्ययः विदेह-प्रकृति-लयानाम्।

पदार्थः। भवन्ति जायन्ते जन्तवोऽस्मिन्निति भवोऽविद्या संसारो वा प्रत्ययः कारणं यस्य (निरोधसमाधेः) सः तादृशः निरोधसमाधिः, विदेहा देवाः येषां चेतसि स्वकारणे लीने परम परितोषो भवति न परमात्मदिदृक्षा वर्त्तते ते प्रकृतिलयाः विदेहाश्च ते तेषां विदेहप्रकृतिलयानाम्।

अन्वयः। विदेहप्रकृतिलयानां भवप्रत्ययो निरोधसमाधिर्भवतीति शेषः।

भावार्थः। ये खलुयोगिनः अविद्यादिकमनात्मानं आत्मत्वेन मन्यमानास्तत्रैव निरोधं अनुतिष्ठन्ति ते विदेहाः प्रकृतिलयाः। तेषां मोक्षाभावात् पुनरपि संसारे पुनरावर्त्तनं भवति।

The Yogis however who can be absorbed in the contemplation of noumenal existence know the world.

वृत्तिः। भूतेन्द्रियाणामन्यतमस्मिन् विकारेऽनात्मन्यात्मभावनया देहपातानन्तरं भूतेन्द्रियेषु लीनाः षाट्कौशिकदेहशून्या विदेहाः अव्यक्त महदहङ्कारपञ्चतन्मात्रेषु प्रकृतिषु आत्मत्वभावनया लीनाः प्रकृतिलयाः तेषां चित्तं संस्कारमात्रशेषमित्यसंप्रज्ञातः स तु भवप्रत्ययः, भवन्ति जायन्ते अस्यां जन्तव इत्यविद्या भवः, अनात्मन्यात्मत्वबुद्धिः स प्रत्ययो हेतुर्यस्य स तथा ; अविद्यामूलोऽयं योगोऽन्त्यवत्फलः यदाह वायुः—

"दशमन्वन्तरानीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रं त्वभिमानिकाः।
बौद्धादशसहस्राणि तिष्ठन्ति विगतज्वराः।
पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः।
पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते"॥

येषां विवेकख्यातिर्नास्ति तेषां चित्तं लीनमप्युत्थाय संसारे पतति सुप्तचित्तवदिति भावः। अधुना द्वितीयोपायमाह।

श्रद्धावीर्य्यस्मृतिसमाधिप्रज्ञापूर्व्वक इतरेषाम् ॥ २०

पदच्छेदः। श्रद्धा-वीर्य्य-स्मृति-प्रज्ञा-पूर्व्वक इतरेषाम्।

पदार्थः। श्रद्धा चेतसः सम्प्रसादः, वीर्य्यं उत्साहः, स्मृतिः ध्यानं, समाधिः एकाग्रता, प्रज्ञा प्रज्ञातव्यविवेकः; एते श्रद्धादयः पूर्व्वं उपाया यस्य स श्रद्धादिपूर्व्वकः इतरेषाम् मुमुक्षूणां योगिनाम्।

अन्वयः। इतरेषां समाधिः श्रद्धावीर्य्यस्मृतिसमाधिप्रज्ञापूर्व्वकोभवतीति अन्वयः

ते खलु नव योगिनो मृदुमध्याधिमात्रोपाया भवन्ति। तद् यथा—मृदूपायो, मध्योपायो, अधिमात्रोपाय इति। तत्र मृदूपायोऽपि त्रिविधः—मृदुसंवेगः, मध्यसंवेगः अधिमात्र संवेगश्च इति। तथा मध्योपाय, स्तथाधिमात्रोपाय इति।

भावार्थः। तत्र श्रद्धावतो वीर्य्यं जायते, योगविषये उत्साहवान् भवति, सोत्साहस्य पाश्चात्यासु भूमिषु स्मृतिरूपजायते, तत्स्मरणात् मनः समाधीयते, समाहितचित्तस्य भाव्यं सम्यग्विजानाति। एतेषां अभ्यासात् पराच्च वैराग्यात् असम्प्रज्ञातः समाधिर्भवतीतिभावः।

The Yogis obtain pure contemplation by means of faith, heroism, memory, contemplation and discrimina-

वृत्तिः। एतेषां मुमुक्षूणां योगिनां श्रद्धादयः [illegible] [illegible] ख्यातिपूर्वकोऽयमुपायप्रत्ययः। ते चोपायाः प्राणिनां प्राक्संस्कार-बलात् मृदुमध्याधिमात्रभेदास्त्रिविधा भवन्ति। तथा च योगिन स्त्रयो भवन्ति (१) मृदूपायः, (२) मध्योपायः (३) अधिमात्रोपाय इति तत्र मृदूपाय स्त्रिविधः (१) मृदुसंवेगो (२) मध्यसंवेगः (३) तीव्रसंवेग इति। एवमितरावपि त्रिविधौ भवतः, एवञ्च नव योगिनो भवन्ति। तेषां चिरं चिरतरं क्षिप्रं क्षिप्रतरं सिद्धयो भवन्ति उपायतारतम्यात् तत्र केषांचित् क्षिप्रतरं सिद्धि-रित्यत आह।

अधिमात्रोपायानां तीव्रसंवेगानामासन्नः॥ २१

पदच्छेदः। अधिमात्र-उपायानां तीव्र-संवेगानां, आसन्नः।

पदार्थः। अधिमात्रः अतिशयः अधिकपरिमाण इति यावत् उपायः श्रद्धादयः अधिमात्र उपायो येषां ते तेषां, तीव्र अतिशयः, संवेगः वैराग्यं उपायानुष्ठाने शीघ्रता वा, तीव्रः संवेगो येषां ते तेषां आसन्नः सन्निहित अनायासलभ्य इति यावत्।

अन्वयः। अधिमात्रोपायानां तीव्रसंवेगानां योगिनां असम्प्र-ज्ञातसमाधिरासन्न इतिशेषः।

भावार्थः। उपायाः श्रद्धादयः ते च प्राग्भवीयसंस्कारादृष्ट वशात् मृदुमध्याधिमात्रा येषां ते प्रागुक्ताः। संवेगो वैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयसंस्कारवशादिति च पूर्व्वमुक्तम् तेषां यादृशां क्षेपीयसी सिद्धिस्तान् दर्शयति। अधिमात्रोपायानामिति सूत्रेण। नवयोगिमध्ये चरमाणामेवासन्नोऽसंप्रज्ञातो भवतीत्यर्थः। भाष्यकारस्तु न केवलं समाधिलाभः किन्तु समाधिफलं मोक्षोऽपि, तथाहि विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि। इत्यादि विष्णु-पुराणस्मरणात्। अत्र कश्चिदधिमात्रोपायानामिति सूत्रमध्येऽन्न प्रवेशयति।

Unto these penetraiton is great the accomplishm-ent of coutemplation is easy.

वृत्तिः संवेगो वैराग्यं येषां तीव्र उपायाश्चाधिमात्रा स्तेषां

SIR GEORGE BIRDWOOD ON COMMERCE AND CASTE IN INDIA AT THE ROYAL INSTITUT.

Before the discoveries of Botta and Layard at Nimrud (calah), Khorsabad (Dar Sargina), and Koyunjik (Nineveh), we could trace back the line of the development of Greek art Eastward to certain point, and then there was a void; and we could trace back the line of the development of ancient Hindu art Westward to a certain point, and again there was a void. But now, after the exhibition that has been opened to us by the exhumation of the palaces of Assur-nazir-pal (Nimrud), and Sargon (Khorsabad), and Sennacherib (Koyunjik), of the arts of Mesopotamia in the eighth and ninth centuries B. C., we see at a glance that this country was the common centre of origin of the arts of both Greece and India; and it was through the seaborne commerce of the Phœnicians, and the overland commerce of the Hittites between Nineveh and Ionia, that the arts of Assyria were carried Westward, at the critical moment of the nascence of Hellenic nationality; and through the commerce of the Babylonians that they were carried Eastward into all the countries of the Indian Ocean. Not only the arts, but the whole civilisation and culture of the old World were, have ever since remained, profoundly affected by commerce of the East and West with Mesopotamia during the period of

almost contemporaneously with Nebuchadnezzar, the enlightened commercial policy pursued in Egypt by Psammetichus I. succeeded at last in uniting in one general organisation the commerce previously carried on independently in the Mediterranean Sea and the Indian Ocean. It was thus that the Indian drugs, which still hold the chief place in the pharmacopæias of Europe, first found their way from the East into the West; and that the Egyptian doctrine of the transmigration of souls and the Chaldan system of astronomy were ntroduced into India. More than this. The Isralites taken into captivity by Shalmaneser IV., and Sargon, and Esarhaddon, became scattered over all Media and Persia, while the Jews who were transported by Nebuchdnezzar into Babylonia, there gradually obtained the mastery of the international commerce developed by the Babylonians, through nearly 2,000years, between Mesopotamia and Central and Southern Asia on the one side, and Anterior Asia Greece, and Italy and Northern Africa on the other; and in this way the religious and moral teachings of the Jews were carried over the whole of the Old World known to antiquity. The old ethnic religious ideas of the Pagan nations then participating in the trade with Mesopotamia in turn reacted on Judaism, and thus, while Hinduism in India became internationalised as Buddism, Judaism became internationalised wherever it was propagated through Hellenic agencies, as Christianity, and wherever it was not influenced by Hellenism as Mahomedanism. We worship God, as the one only deity, and under His Hebrew name of Jehovah, entirely through the wide vogue and authority given to the religion of the Jews in the eighth and seventh centuries B.C., through the cosmopolitan commerce of Mesopotamia. With regard to the economical and political aspects of Indan commerce.

all things, good is strangely, fatally mixed with evil. I use the terms of the old Babylonian theology, and am possibly misled by them; for, after all, good and evil may be mere phenomena of the physical law of antagonism, as recently expounded by the illustrious Sir William Grove, operating in the moral world. But I certainly fear the effects on India, of that country becoming an active participator in the commerce of modern Europe. The whole organisation of society in India —I mean India of the Hindoos—is co-operative, and not competitive, as in Europe. The Hindoos are an Aryan people, like ourselves' but located in a tropical climate, in which it is impossible for them to develop their manhood to its fullest physical capabilities, or to maintain themselves at all except under a system of exclusive privilege such as that secured to them by the Code of Manu. I am satisfied that if once the caste system of the Code of Manu, by which the race of Brahmanical Hindoos has been formed, and which is true palladium of India of the Hindoos—I am most apprehensive that when it has once been brought into familier contact with our competitive civilisation particularly as represented by our ruthlessly aggressive free trade commerce, the most powerful agency through which the universal solvent of Darwinism, the law of the survival of the strongest (not "fittest") is operating on the political developments of our age—I fear it must give way in the unequal struggle, and bring down with it the whole fabric of Hindu society. Apart from the co-operatvie caste system, expressly devised for the protection of the weaker against the stronger, the race of Brahmanical Hindoos can not exist—in not the unprotected competition with the English or other European races. We have already had ample experience of the solvent action of free commerce on the social institutions of the peopie of India- It was the

Brahmanism. Buddhism was only triamplant in India so long as the trade between the East and West by way of the Persian Gulf and through Egypt prospered, namely, from about 500, B. C., to A. D, 500. When this trrde was broken up by the rise of the Mahomedan power in the seventh century A. D. Buddhism, which was internationalised, commercialised Hinduism, at once died out of India, and Hinduism every where re-established itself. The remarkable anticommercial spirit of the Code of Manu, as it was finally revised during the decline of Buddhism, cleary betrays the dread of the Brahmanical priesthood of the disintegrating action of the foreign trade of the time on Hindu society. The Brahmans are in the same fear of the evil consequences of the modern European trade with India. Some years ago I published in the Times some popular native ballads from Western India, giving the most pathetic expression to Brahmanical anxieties on that point. I confess, considering the debt India is under to the genius of the Brahmans, that I deeply sympathise with them, and to the fullest extent share in their anxieties. As an Englisnman, I accept free trade—the most tremendous weapon of Imperial dominion with which an ethnically powerful people could arm itself; but, were I a Brahman—one of the race that had made the India of the Hindoos, the India of a continuous history in literature and art of 3,000 years—if I could not resist it I should be driven to cry out in despair, "Fin- is India"

अस्यार्थः

सम्प्रति सार जर्ज्ज वार्ड्उड के, सि, आइ, इ, सि, एस, आइ नामधेयेन भारतीयचिरम्परागतवणिग्वृत्तिवर्णविभागयोर्विमची-कथत् ।

एवं हिन्दुजातीयशिल्पोन्नतेः प्रसररेखामपि वयं प्रतीच्यां कियद्दूरं यावदनुलोकयामस्ततश्चास्या विलोपः। परमिदानीं अस्तुरनाजरि पाल्, सरगन्, लेनाकरित्प्रमुखानां भूगर्भकवलितप्रासाद-खण्डोद्घाटनेन खृष्टप्राक्तनाष्टमनवमशताब्द्योरन्तरे मिसोपटा-मियादेशीयशिल्पकलानां क्वापि प्रदर्शन्यां प्रवृत्तायां वयं सकृ-द्दृष्टिक्षेपेनैव मिसोपटामियादेशस्य ग्रीसभारतीयशिल्पकलानां साधारणाकरत्वमवगच्छामः। हेलेनिक्जातीयानां जातीयता स्थापकाभ्युदयप्रारम्भे फिनिसीयदेशीयप्रवर्त्तितसामुद्रिकवणिक्-पथेन हिट्टिटाइट्जातीयानां स्थलसीमवणिक्पथेन चासीरीय शिल्पानां पश्चिमाभिमुखः प्रसरोऽभवत्। तेषां पूर्व्वाभिमुखः प्रस-रस्तु वाविलोनदेशीयैर्जनितः क्रमेण तस्य भारतसागरोपकूलवर्त्तिष्व-खिलेषु विषयेषु विस्तारो बभूव। निनेभानगरे सरगानिड् जाती-यानामभ्युत्थानकाले तृतीयनिवुकडनिजरनामकस्य वाविलन अधिपतेरनन्तरं (६०५-५६२ खृष्ट पूर्व्वाब्देषु) मिसोपटमियादेशेन सह प्राच्यपाश्चात्य देशीयानां वणिक्व्यापारप्रवर्त्तनेन तत्कालीन तस्य तस्य भूखण्डस्य न केवलं शिल्पकलाः परं ज्ञानसभ्यतेऽपि तत्तत् प्राच्यपाश्चात्यप्रदेशेषु नीताश्चिराय प्रचारं लेभिरे। निवुकड् निजरनामकस्य समये प्रथमसेमिटिकसनामधेयेन मिश्रदेशाधिपेन मिश्रदेशे वणिग्व्यापारविषयिणी या समुन्नतनीतिः प्रवर्त्तिता। सैव पश्चात् कृष्णसमुद्रभारतमहासागरयोः, पूर्व्वं परस्परमनपेक्ष्य प्रवर्त्तमानेषु वाणिज्यकार्य्येषु किमप्यैकमत्यं स्थापितवती। ततश्च तदानीं यूरोपप्रदेशेषु चिराय श्रेष्ठत्वमापन्नानां भारतीयौष-धानां प्रथमं पूर्व्वतः पश्चिमाभिमुखगमनं बभूव। तथा मिश्रदेश पूर्व्वं प्रसिद्धस्यात्मनः पुनर्ज्जन्मविषयकमतस्य कालडियनदेशप्रचलि-तस्य ज्योतिःशास्त्रस्य च भारतवर्षे प्रवेशोऽजायत। अन्यच्च,

जातीयाः मेडियापारस्यदेशयोः क्रमेण वंशपरम्परया विस्तारं प्राप्ताः, तथा निबुकडनिजरनामधेयेन वाविलनप्रदेशे निर्व्वासिता इहुदिजातीयाः क्रमेण वाविलनदेशीयैः २,००० वत्सरान् यावत् मेसीपटेमियामध्यदक्षिणासीयग्रीसइटा लीउदोच्याफ्रिकाप्रभृतिषुदेशेषु समुन्नतिं प्रापितस्य तत्तद्देशीयैः सह वणिक्व्यापरस्योपरि प्रभुतां लेभे। अनेन च क्रमेण इहुदिजातीयानां धर्म्मज्ञानयोरपि तत्कालप्रसिद्धेष्वखिलेष्वेव भूभागेषु विस्तारो बभूव।

मिसोपटेमिया देशीयवणिक्व्यापारसंघर्षेण सह तत्तद्देशीय चिराचरितधर्म्माणां इहुदीय धर्म्मेऽन्तर्भावो जातः। किन्तु यदा भारतवर्षे हिन्दुधर्म्मस्य वौद्धधर्म्मरूपेण परिणतिर्देशधर्म्मता च जाता तदा प्राचीनग्रीसदेशीयमनुष्यद्वारा इहुदीयधर्म्मोऽपि यत्र यत्र भूमिभागे प्रचारितस्तत्र तत्रैव खृष्टीयधर्म्मरूपेण देशधर्म्मत्वमवाप। यत्र तु ग्रीसदेशीयमनुष्यद्वारा न प्रचारितस्तत्र इस्लामधर्म्मरूपेणाऽस्य देशधर्म्मता बभूव। खृष्ट पूर्व्वीयाष्टमसप्तम शताब्द्योरन्तरे, यदा मिसोपटेमियादेशीयवणिक्व्यापारस्य सार्व्वत्रिकत्वं जातं तदा इहुदीयधर्म्मे परमेश्वरस्य यत् जिहोवेति नाम प्रथितमासीद्वयमद्यापि तं तेनैव नाम्ना समर्च्चयामः।

कथमत्र पार्थिववस्तुजातेषु शुभस्याशुभेन सह सम्मिश्रणं जात मित्यत्रैव मे गरीयसी चिन्ता। मयेदानीं वाविलनदेशीयधर्म्मशास्त्रवचनमात्रमनूदितम्, सम्भाव्यते च तैर्मे मनस्येवं भ्रान्तमत मुत्पादितम् यत इतः परमपरैः शुभाशुभयोर्नैसर्गिकनियमभाविपरस्परविरुद्धघटनाविशेषमात्रतयोपलक्षितिश्च सम्भाव्यते यथा धर्म्मतत्त्वानुसन्धिना विलियमग्रीव्‌नाम्ना केनचित् ख्यातयशसा पण्डितेन साम्प्रतमालोचितम्। यथा तथा भवतु अहं पुनर्भारतवर्षं प्रत्यहं

परिणतिमनुध्याय सुभृशं विभीम्येव। हिन्दुसमाजबन्धनं वर्णभेद-मूलं नतु युरोपीयवत् शक्तिसम्बद्धमनुगतम्। वयमिव हिन्दुधर्म्मावल-म्बिनोप्यार्य्यवंशसम्भूताः परमुष्णदेशाधिवासहेतोस्तेषां यौवने सम्पूर्णशारीर शक्तिलाभः सुदुष्करोऽभविष्यत् यदि तेषु तद्देशानुकूल मनुप्रणीतधर्म्मशास्त्रस्य प्रचारोनाजनिष्यत्। एतच्च मे मनसि निश्च-योवर्त्तते येऽयं मानवधर्म्मशास्त्रानुगतोजातिविभागो, (येन भारते वर्णाश्रमाचारः संस्थापितः, यश्च भारतीय हिन्दुधर्म्म मण्डपस्य स्तम्भरूपः) तस्मिन् खलुस्मत्समृद्धिमूलया स्वाधीनवणिक्व्यापारप्र-वर्त्तकया वलवत्तरया सभ्यतया सकृत् घनिष्ठसंघर्षमुपेयुषि "वलव-त्तरसंघर्षे दुर्व्वलस्य नियतः समुच्छेद" इत्यस्मद्वर्त्तमानराजनी-तिसमुन्नायकडारविनप्रदर्शितविश्वव्यापकनियमेन स्वयमेवोन्मू-लनमवाप्स्यति तदुन्मूलनेन सममेष हिन्दुसमाजमहामण्डपश्चाशे-षतोनिपतिष्यतीति। सर्व्वसामाजिकानुमोदितं कमपि स्थिरवर्ण-विभागमन्तरा वर्णाश्रम धर्म्मावलम्बितुं क्षणमपि जीवितुं न शक्नोति, अतोऽनेन वलवत्तरेण दुर्व्वलजीविकाक्रमणं निवारितम् यतः सर्व्वे सभ्यासभ्या वा स्वपुरुषपरम्परानुष्ठितां वृत्ति मेवानुसरन्ति। तथा इङ्लण्डवासिभिरपरैश्च यूरोपदेशीयैरिव भारतीयैः समृद्धिमूलाऽरुद्धप्रसरैवणिग्व्यापारे परिगृहीते वर्णाश्रम-धर्म्मावलम्बित्वं न चिरं स्थातुमर्हति। यथेच्छाजीवनप्रभावेण भारतीयचिराचाराणां विषमपरिणमनं ह्यस्माभिः परीक्षितपूर्व्वं, पुरा मिश्रमिसोपटेमियादेशीयपण्यव्यापारोहि भारते लब्धप्रवेशः क्रमेण जातिभेदेन सह वर्णाश्रमधर्म्ममुन्मूल्य तस्य स्थाने वौद्धधर्म्म मतिष्ठिपत्। वौद्धधर्म्मश्च भारते तावदेव स्वाधिपत्यं वितेने, यावत् पारस्योपसागरेण मिश्रदेशद्वारा प्राच्यपाश्चात्यदेशयोः परस्परं वणि-

डोमदेशीयशिल्पोन्नतिः प्रसारितामवलोकयामस्तदा सा विलुप्ता स च पूर्व्वोक्तोवणिग्व्यापारो भङ्गमाप, तदा वौद्धधर्म्मस्य यः खलु भारते हिन्दुधर्म्ममुन्मूल्य देशधर्म्मतामवाप्य चिरं स्थितः, सहसा विलोपं प्राप्तः। पुनरपि समन्तात् हिन्दुधर्म्मस्य प्रचारो-जातः।

वौद्धधर्म्मस्य पतनावस्थायां मानवधर्म्मशास्त्रस्य पुनः संस्कार-समये तस्य किमपि प्रतिवणिग्व्यापारप्रावल्यं कृतम्, तेन खलु शास्त्रसंग्राहकैः तदानीन्तनसमाजनेतृभिर्ब्राह्मणपुरोहितैस्तदानी-मपि वैदेशिकवाणिज्यस्य हिन्दुसमाजं प्रत्यनिष्टकारित्वमनु-भूतमिति स्पष्टं प्रतीयते। इदानीन्तन ब्राह्मणा अपि वर्त्तमान-यूरोपदेशीयैः सह भारतीयवाणिज्यात् तथैव बिभ्यति। इतः कियत् कालपूर्व्वं मया खलु कति भारतीयगाथाः पाश्चात्यप्रदेशात् देशीयः-टाइमस्नामके संवादपत्रे प्रकाशिताः, ता हि यूरोपीयैः सह व्यवहा-रेण भारतस्य क्रमशोहीनावस्थामाशङ्कमानानां ब्राह्मणाना मन्तर्गत करुणभावमभिव्यञ्जयन्ति। वस्तुतः ब्राह्मणैः स्वाकुण्ठितप्रतिभय भारतस्य यानि हितानि कृतानि तानि संस्मृत्य ममाऽपि तेषां सम-दुःखभागित्वं पूर्णतया समुदेति। किञ्चाहं यदात्मनःइङ्लण्डीय मनुष्यत्वं विचिन्तयामि स्वाधीनवाणिज्य मेवानुमोदयामि यतोऽत्र जातिभेदविचारादिकं नास्ति सम्बद्धव्यक्तिमात्रस्यैव तुल्याधिकारिव-र्त्तते। किन्तु यद्यहं ब्राह्मणः स्याम् यज्जातीयैर्मनुष्यैर्भारते हिन्दुधर्म्मस्य स्थापनं कृतं तथा २,००० वत्सरान् अविच्छेदेन शिल्पसाहित्ययो-रुन्नमनं कृतम्,अथच यूरोपीयवाणिज्यसम्भावितं भारतस्यानिष्ट-पातं निरोद्धुम् न समर्थः स्याम् तदा हताशापरीतएवमेवानुशोचेयम् 'भारतमिदमचिराद्विनाशमेष्यति'।

अथ दशकुमारकथासार: ।

अप्पय्यमन्त्रिरचित: ।

श्रीवागुमापरा: शान्तामेकवोरां महेश्वरीम्।
वन्यमाह्हितसौभाग्यसम्यक् सिध्यर्थमर्थये ॥
श्रीगणेश्वरमाराध्य श्रीमदप्पय्यमन्त्रिणा ।
दशानामपि कुमाराणां कथासारो विरच्यते ॥
अस्ति पुष्पपुरं नाम जगत्येषु महत् पुरम् ।
राजहंसाह्वयोराजा तच्छशासारिशासन: ॥
देवी वसुमती नाम बभूवास्य मन:प्रिया
धात्री वसुमतीमालं या रत्नाकरमेखला ।
मतिमान्सुमतिशर्म्मा च धर्म्मपालश्च धार्म्मिक: ।
श्रीमान् पद्मोद्भवश्चैते तस्यासन् सचिवास्त्रय: ॥
सुमति: सत्यशर्म्मा च तनयौ मतिशर्म्मण: ।
सुमित्र: कामपालश्च धर्म्मपालस्य नन्दनौ॥
सुमन्त्रसुश्रुतौ ख्यातौ श्रेष्ठौ रत्नोद्भवेऽपि च ॥
पद्मोद्भवस्यार्थपते: समभूवन् सुतास्त्रय: ।
सत्यशर्म्मा विरक्त: संस्तीर्थस्थानान्यसेवत ।
कामपालश्चचार क्ष्मामुलङ्घ्य वचनं गुरो: ॥
स च रत्नोद्भवोर्म्मीभिर्विहरन् जिहीर्षया ।
रत्नाकरं विवेशोर्व्वरा: पतिं शेषा: सिषेविरे ॥
कदाचिद्दर्शयामास स्वप्ने देवो द्विज: फलम् ।
तच्छ्रुत्वा द्रढयामास पुत्रलाभं स भूपति: ॥
केशवानुष्टहीतेन तेन स्वप्नफलेन च

अत्रान्तरे मालवेशो मानसारः पराजितः ।
शक्तिं लब्ध्वा महाकालात् पुनर्युद्धाय निर्ययौ ॥
ईश्वरानुग्रहं तस्य श्रुत्वा तु मगधाधिपः ।
मानी शूरतया युक्तो न व्यरंसीद्रणोद्यमात् ॥
आलोच्य मन्त्रिभिस्तेषां कलत्रैः सहितां प्रियाम् ।
विन्ध्यकान्तारसङ्केतं निनायाप्तजनैर्नृपः ॥
ततः ससैन्यो युद्धाय निरगात् सचिवान्वितः ।
रणोभून्मालवाधीशमगधाधीशयोर्महान् ॥
मालवप्रेषिता शक्तिर्मगधास्त्रैरलक्षिता ।
शूलिप्रभावतः सूतं छित्वा भूपममूर्छयत् ॥
स्यन्दनो जवनैरश्वैर्नीतो दूरे महत्तरे ।
विन्ध्याद्रिविपिनोद्देशे ससञ्ज घनशाखिनि ॥
युधि सर्व्वबले क्षीणे कान्दिशीकाश्च मन्त्रिणः ।
अवशिष्टायुषा दिष्ट्या विविशुर्विन्ध्यकाननम् ॥
पूर्व्वं सङ्केतमासाद्य सर्व्वे ते स्वपराजयम् ।
राज्ञ्यै विज्ञापयामासु र्नृपतेरप्यलक्ष्यताम् ॥
मूर्छागताञ्च तां देवीं ते कथञ्चित् सुबोधिताम् ।
युक्तिभिः साहसोद्युक्तां परिवार्य्य व्यवर्त्तयन् ॥
तस्मिन्नेव निशीथे स प्रसुप्ते सकले जने ।
प्राणत्यागाय निर्य्याता गुल्मौघान्तरिता सती ॥
" जन्मान्तरेऽपि मे भर्त्ता राजहंसो भवत्विति ।
पादपालम्बिलतिकापाशान्तर्गलिताऽब्रवीत् ॥
तत्क्षणे हिमशीतेन वातेन प्राप्तचेतनः ।
तच्छ्रुत्वा साहसन्देवि माकुर्व्वित्यभ्यधात् पतिः ॥
तत्स्वरेण पतिं ज्ञात्वा विलोक्य स्यन्दने स्थितं ।
सा हृष्टा सन्निधाम [illegible]

स्वनिवासवनोद्देशं ते चानीय महीपतिम् ।
ततो मन्त्रौषधैः सुस्थशरीरं तमकारयत् ॥
अमात्यबोधनोद्दीतमनःक्षतिरसौ नृपः ।
जगाम वाम देवर्षेराश्रमं स्वजनैः सह ॥
स तस्यानुग्रहं लब्ध्वा निवासांश्च तदाश्रमे ।
कल्पयित्वा दिनान्यत्र गमयामास कानिचित् ॥
श्रीराजवाहनं राज्ञी सुषुवे खे च भारती ।
तदोवाचेष जित्वारीन् पालयिष्यति गामिति ।
आयातो वामदेवर्षिस्तं दृष्ट्वा भाग्यवानयम् ॥
इति तत्पूर्व्ववृत्तान्तं ज्ञापयामास पार्थिवम् ।
सभार्य्यः साग्रजः शाम्बः पदे हंसस्य कस्यचित् ॥
प्राग्बबन्ध मृणालेन द्विमुहूर्त्तं सरस्तटे ।
तदानीं स मुनिर्भूत्वा प्रियापार्श्वेऽन्यजन्मनि ॥
द्विमासं शृङ्खलाबद्धो भूया इति शशाप तम् ।
शापात् स एव ते देव्यां जातो निस्तीर्य्य चापदां ॥
शत्रूंश्चिजित्य सर्व्वोर्व्वीपालकोऽयं भवत्विति ।
पश्चाद्विद्याधराधीशो भवितेत्युक्तवानृषिः ॥
कृताशिषि मुनौ याते तथा सर्व्वे मुदं ययुः ।
मित्रगुप्तः सुमित्रस्य प्रमतिः सुमतेः सुतः ।
इतरेषां बालका जाता रूपवन्तः सुतेजसः ॥
सामाद्युपायास्त्वारो मूर्त्ताइव चकाशिरे ।
अत्रान्तरे मुनिः कश्चित् समागत्य महीभुजे ॥
समर्प्य बालकं कञ्चित् कथयामास तत्कथाम् ।
" राजा प्रहारवर्म्मा ते देव्याः पुंसवनादिकम् ॥
द्रष्टुं गतः पुरा पुष्पपुरं प्रति समागमत् ।

आकर्ण्य स्वपुरं भूयोनिवृत्तोऽसौ तथा पथि ॥
किरातात् हृतसर्व्वस्वोऽद्भुतशिशुं कर्णे वने :
पुष्पार्थमेत्य तत्राहमद्राक्षं भोजयाहृतं ॥
प्रहारवर्म्मणः पुत्रं गृहाणेति मुनौ गते ।
कृत्वाऽवहारं समये तं देव्यै दत्तवान् नृपः ॥
अन्यदा कोपि भिल्लोनादर्शयत् कञ्चिदर्भकम् ।
प्रहारवर्म्मणः पुत्रस्त्वन्मित्रस्यैव निश्चयः ॥
मैथिले सद्मनं याते हृतभग्ने गते तदा ।
वने केनापि भिल्लेन दृष्ट्वा नीतो मदन्तिकम् ॥
इत्युक्त्वा राजहंसाय तन्ददौ स च भूपतिः ।
तस्योपहारवर्म्माख्यां चक्रे मित्रार्त्तिंदुःखितः ॥
कदाचिदागतः कोपि राजहंसाय सन्मुनिः ।
कञ्चित् कुमारकं दत्त्वा तद्वृत्तान्तमभाषत ॥
आगच्छता मया राजन् तव सद्मनि काचन ।
रुदती सार्भका वृद्धा दृष्टाचष्ट स्व-चेष्टितम् ॥
मगधेश्वरामात्यपुत्रो राजन् रत्नोद्भवाभिधः ।
पोतेनार्थार्ज्जकः कालयवनद्वीपमागमत् ॥
श्रेष्ठिनः कालगुप्तस्य सुवृत्तान्तस्य कन्यकाम् ।
विवाह्य व्यवहारेण बह्वर्थं लब्धवानसौ ॥
तस्मिन् स्वपितरौ द्रष्टुं प्रत्यावृत्ते महार्णवे ।
पोते च विधिना भग्ने ययुः सर्व्वे विशीर्णताम् ॥
सुवृत्तां गर्भिणीं तस्य पत्नीमायुष्मतीं तदा ।
कथञ्चितत् काष्ठमालम्ब्य भाग्येनाहमतारयम् ॥
मगधं तत्पतेर्जन्मदेशम्प्रति शनैर्मया ।
नीयमानाऽत्र विन्ध्याद्रिवने सुतमसूतसा ॥
प्रसवव्यथया तत्र गुल्मे स्रोऽठत्यत्रेतना ।
ततो बालकमादाय विचेतुं मार्गमागता ॥

धातुसूत्रम् ।

वाक्यं यथा । वाक्यञ्च साव्ययाख्यातं सकारकविशेषणं ।
एकतिङ्विशेष्यकं वापि क्रिया वा कारकान्विता ॥
वाक्यार्थोयथा ॥ वाक्यार्थः कारकाङ्क्षिधात्वर्थं एक एव सः ।
शाब्दबोधस्तु ॥ क्रियाविशेष्यकं शाब्दबोधं तिङ्स्वेव शाब्दिकाः ।
उक्तभेदं कृदादीनां तार्किकास्तं तिङादिषु ॥
अथ धातूनां सकर्म्मकत्वमकर्म्मत्वञ्च ।
शब्दोपात्तं कर्म्म यस्य समाख्यातः सकर्म्मकः ।
कर्म्मायुक्तोप्यनाकाङ्क्षो सर्व्वदा स्यादकर्म्मकः ।
तथा च भागुरिः ॥ धातोरर्थान्तरे वृत्ते र्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धे रविवक्षातः कर्म्मणोऽकर्म्मिकाक्रिया ॥
वाक्यपदीये भर्तृहरिः ॥

वाक्यमिति । साव्ययाख्याताभ्यां कारकविशेषणाभ्याञ्च सह-वाक्यं भवति । तार्किकास्तु एकतिङ् विशेष्यकं वाक्यमेकवाक्यमाहुः । अमरसिंहस्तु कारकेषु अन्वयनी एकैव क्रिया वाक्यमित्याह ॥ वाक्यार्थ उच्यते । कारकाकाङ्क्षिणः कारकान्वयिनोधात्वर्था एकएव वाक्यार्थः । धात्वर्था इत्यत्र एकएववाक्यार्थः । धात्वर्था इत्यत्र बहुवचनं क्रियाकूटाभिप्रायेण तथाच क्रियायाः षट्कारकाश्रितत्वं सूचितं । तदेवोक्तं जुमरेण कारकाकाङ्क्षिणोहि धात्वर्था वाक्यार्थ इति । क्रियाया ज्वलनादि नानात्वेन कर्म्म-करणाद्याश्रितत्वेऽपि कर्त्तुर्विवक्षितक्रियैव प्रधानं कर्त्तर्य्येव भाषते । करणादिवाच्ये तु प्राधान्यात् तत्तत् क्रिया खण्डशः कर्म्मकरणादावव-भासते इत्यपि सुधीगम्यं । शाब्दबोधस्त्विति । शाब्दभावार्थं शब्दजन्योपस्थितिः । शाब्दः तद्विषयकबोधो वाक्यार्थबोध इति यावदर्थः । क्रियेत्यादिशाब्दिकमते परतः कृदादीनामुक्तविशे-ष्यकं शाब्दबोधमाहुः । उक्तं गोयीचन्द्रेण आख्यातस्य यद्यपि क्रियासाधनञ्चोभयं वाच्यं तथापि मुख्यत्वात् क्रियैव प्रधानमिति साधनं कारकं मुख्यत्वात् साध्यत्वात् प्रधानं सर्व्वेषां विशेष्यं । तेन पठतिरूपं पचन्तिरूप मित्यादि सिध्यति स्तुत्यर्थकं रूपमिति

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ।
एकमात्र निष्ठतायामित्यर्थः गत्यादौ नातिव्याप्तिर्धर्मिभेदे
आश्रयभेदे ॥ अथोपसर्गाणां निरर्थकं ॥
उपसर्गास्तु धातूनां तात्पर्यार्थप्रदर्शकाः ।
चादिवद्द्योतकास्ते स्युर्न हि द्रव्याभिधायकाः ।
यद्द्रव्यं विशिष्यते लोके तत्तद्द्रव्यं विशिष्यते ॥
द्रव्यं शब्दवाच्यं प्रादीनां तदनभिधायकत्वात् ।
कीदृशो लिङ्ग इत्यर्थे कीदृशं निरितादिकं न स्यात् ।
अत एवोक्तं अद्रव्यवाचिनामव्ययानां लिङ्गसंख्याविनिर्मुक्तत्वमिति ॥

विशेष्यकमित्यर्थः । कृदादिपदार्थो हि कारकः । उक्तत्वेन कारकभावः सम्बद्धाश्च आख्याः । प्रत्ययादीनाञ्चतुर्णां शक्तत्वेन यदा वाक्यसमापकता तदाख्यातवच्छाब्दबोधः । अन्यथा उक्तविशेष्यकमिति प्रत्ययादीनां द्वैविध्यं । तार्किकमतमाह तिङादिष्विति तं तिङन्तादादिभिन्नत्वेन शाब्दबोधं । पश्य मृगो धावतीत्यत्र तु न्यायमते धावन्तं मृगं पश्येत्यर्थवत् धावनाश्रयं मृगं पश्येत्यर्थः कर्त्तव्यः । तिङ्प्रत्ययोस्तुल्यविषयत्वात् । एकवाक्यतासम्भवस्तु शाब्दबोधसङ्गत्यैव भवति । तदुक्तं । सम्भवत्येकवाक्यत्वे वाक्यभेदो नाङ्गीक्रियते इति फलितमिति सर्व्वसामञ्जस्यं । अथेति शब्दोपत्तिमुच्चरितशब्दादुपस्थितं विद्यमानमिति यावत् । अतो योग्यतामादाय दृष्टं भवतीत्यत्र अकर्मकादित्यनेन अविवक्षित कर्म्मत्वे भावे क्तो विहितः । समाख्यातो यौगिकार्थलब्धः । अतः समासपदे उक्तं विद्यमानं कर्म्म यस्येति । कर्म्मायुक्तः अविवक्षित कर्म्मा यथा चैत्रेण गतमिति । अनाकाङ्क्षी कर्म्मणि हाकाङ्क्षाशून्यः भवति शेते इत्यादौ ज्ञेयः । तथा चेति । वहप्रापणे स्यन्दने च । तत्र नदी वहतीत्यादौ चरणे कर्म्मकता । धात्वर्थेनेति स्रुङ्प्राणतयागे इत्यर्थे स्रवति नवलप्राणकर्म्मयोगस्य । एवं जीवप्राणधारणे इति जीवतीति । अत्र प्राणानां धात्वर्थेनोपसंग्रहादकर्म्मकता । प्रसिद्धेरिति आस्ते भवति शेते इत्यादावकर्म्मत्वेन प्रसिद्धः । कर्म्मणो विवक्षणादपि चैत्रो गच्छति तेन गतमित्यादावकर्म्मकत्वम्

दशकुमारकथासारः ।

अहं तद्धात्रिकाऽस्मीति ब्रुवाणैवागते गजे ।
अधावद्बालकं त्यक्त्वा मूढोऽहञ्चाभवन्तदा ॥
एवं बालकमादाय करिणोर्द्ध्वं व्यचिक्षिपत् ।
तत्क्षणानुमतं सिंहं दृष्ट्वा वन्यगजोऽव्रजत् ॥
पतन्तं गगनद्वारा तन्तु शाखास्थितः कपिः ।
गृहीत्वा स्वाश्रयशाखासु फलितरसदाऽस्थितत् ॥
तमेतमहमादाय सार्द्धं पल्लवसंस्तरैः ।
नियोगाद्वामदेवर्षेरन्वैषम्भवदन्तिकं ॥
इत्याख्याय मुनौ याते राजा [illegible] ।
शोचन् शुभेऽह्नि तन्नामं चक्रे पुष्पोद्भवाह्वयं ॥
वामदेवमुनेः शिष्यः सोमशर्म्मा कदाचनः ।
व्याहरत् पुरतो राज्ञः कमप्यारोप्य बालकं ॥
कावेरीतीरगुल्मेषु रुदती बालकान्विता ।
अभ्यभाषत पृष्टैका शम्भोरागच्छता मया ॥
मगधेशप्रधानस्य नन्दनोमतिशर्म्मणः ।
देशम्प्रापदमुं सत्यशर्म्माख्यस्तीर्थयात्रया ॥
समानकुलजां कन्यामाजहार स कुत्रचित् ।
कालीं नामोपयम्यापि तदनुत्पन्नसन्ततिः ॥
गौरीं नाम पुनस्तस्याः परिणीय सहोदरीं ।
तस्यामजीजनत् पुत्रमेनमस्यास्मि धात्रिका ॥
स्नानार्थमागता काली बालेन सह निर्जने ।
प्रवाहे पातयित्वा मामवासरदसूयिनी ॥

आयुःशेषतया लब्ध्वाह्वालं तोरमजीगमं ।
इत्युक्त्वा सा सखोलास्य विषेन विवशाऽभवत् ॥
अत्युत्क्रान्ता विषार्त्ता साऽभवदुत्क्रान्तजीविका ।
तदुपाख्यानविज्ञोऽहमुपानैषमिमं शिशुं ॥
मद्गुरोराज्ञया तुभ्यं दत्तोयमिति सोप्यगात् ।
तस्यापि सोमदत्ताख्यां विदधौ वसुधाधिपः ॥
अन्येद्युर्दिवसारम्भे देवी वसुमती विभोः ।
अग्रे कुमारकं कञ्चित् सन्निधाय व्यजिज्ञपत् ॥
अस्यामेव तमस्विन्यां कन्या काचिन्ममागता ।
आविर्भूय प्रदर्श्यैनमवादोदद्भुतां कथां ॥
मणिभद्रस्य यक्षस्य पुत्री तारावलीत्यहं ।
आत्मजोधर्म्मपालस्य कामपालः पतिर्मम ॥
तस्य सूनुरयं बालः कुबेरादेशतोमया ।
राजवाहनसेवार्थेऽभिहितस्तत्र साऽवदत् ॥
आख्याय कामपालस्य वृत्तान्तं पूर्व्वजन्मसु ।
अन्तर्भूता हि सा भर्त्तुरन्तिकं गन्तुकाम्यया ॥
इति देव्या वचः श्रुत्वा राजहंसो महीपतिः ।
तस्यार्थपालमित्याख्यां विदधे विधिपूर्व्वकं ॥

संवर्द्धितं वसुमतोमहिषी—प्रयत्नैस्तद्राजवाहनकुमारकपूर्व्वमित्थम् । राजा कुमारदशकं कवितास्त्रसुक्तमार्गाविनीतमितयौवनमप्यनन्दत् ।

इति श्रीमदप्पय्यमन्त्रिणा विरचिते दशकुमारचरितकथासारे
कथाप्रारम्भोनाम प्रथमपरिच्छेदः ।

अथ द्वितीयपरिच्छेदः ।

आदरेणोपवेश्यैतान् स मुनिः प्राह पार्थिवम् ।
राजवाहनदेवोऽयं विद्विषः शोधयिष्यति ॥
स्वेनैव भुजवीर्य्येण सम्प्रामान् परिशोष्य ते ।
ततो दिग्विजयायैव ससखः प्रेष्यतामिति ॥
अवन्तीसुन्दरी नाम मानसारस्य कन्यका ।
स्वयमेनं पतिं कृत्वा वधूस्तव भविष्यति ।
मुनिवाक्यात् सुतन्दिग्विजयार्थं न्ययुङ्क्त सः ॥
ततः पितृसमादिष्टः सहायसहितोऽत्वरान् ।
राजवाहनदेवोऽपि प्रतस्थे दिग्विजिगीषया ॥
गत्वाऽतिदूरमध्वानं क्वापि विन्ध्याद्रिकन्दरे ।
तत्र क्षताङ्कं चिह्नं अब्रह्मण्याकारं द्विजम् ॥
कान्तारे स्थितं कञ्चित् क्रूराकारं ददर्श सः ।
पृष्टः कुमारकेणाह ब्राह्मणश्च स्वचेष्टितम् ॥
पुराऽहं शवरैः सार्द्धमारब्धचौरकर्म्मणि ।
कदाचित् पथिकं कञ्चिद्ब्राह्मणं हन्तुमुद्यतान् ।
स्वजातिपक्षपातेन किरातान् प्रत्यवारयम् ॥
विवदन्तोमया क्रुद्धास्ते सर्व्वे मामताड़यन् ।
व्यथयाहङ्कृतप्राणो यमवासमसेविषम् ॥
नरकेन प्रवेष्टव्यस्त्वया विप्रोपकारिणा ।
आयुः शेषोऽस्ति ते चौर्य्यं नोकर्त्तव्यमतःपरम् ॥
इत्युक्तश्चित्रगुप्तेन प्राप्तोऽहं पूर्व्वविग्रहः ।
महत्वानुग्रहं लब्ध्वा चराम्यत्र ततः परम् ॥
इति व्याहृत्य भूपालमसावार्य्यं मिथोऽभ्रयात् ।
महानभावं निश्चित्य त्वां कमप्यर्थमर्थये ॥

दूरस्थएव गीते तद्रूपहस्तुं पिबेद्भवम् ।
सा चापाङ्गकृतकेन भिनत्ति हृदयं मम ॥
सङ्गीतानन्तरं भूयो विमृश्यचैव सा बिलम् ।
साधयित्वार्थिने देव मह्यन्त्वन्दातुमर्हसि ॥
इत्युक्तस्तेन तत्कार्य्यं सोऽनुमन्य गते रवौ ।
अहृष्टं निशि तत्रैव सुष्वाप सखिभिः सह ॥
निशीथे लिङ्गपूजार्थमागतां तां बिलवासिनीम् ।
कुमारं बोधयित्वाऽसौ दर्शयामास भूसुरः ॥
विघ्नः कार्य्यस्य माऽस्त्वेव सुहृदस्तान बोधय ।
शनैरुत्थाय तां कन्यामुपसृत्य जगाद सः ॥
निशीथे कुत आयाता सुभ्रु ब्रूहीति भाषिता ।
अदत्तप्रतिभाषैवावलेपाच्चाविशद्बिलम ॥
अगात् द्विजोपकारार्थमनेन बिलवर्त्मना ।
दुःखयन्तु न मित्राणि द्रागायास्याम्यहं पुनः ॥
इति तत्र बिलद्वारि विलिख्य नृपनन्दनः ।
तं महीसूरमादाय तां कन्यामनुवव्रजे ॥
सा च पातालमभ्येत्य पुरं काञ्चन निर्म्मितम् ।
प्राप्ता हर्म्यस्थले स्थिता बभाषे राजवाहनम् ॥
नमुचेर्दानवेन्द्रस्य तनयाऽहं पिता च मे ।
विष्णुना निहतोयुद्धे वैकुण्ठं सजनोऽव्रजत् ॥
एतच्चारु पुरं देव साम्प्र कः पालयेदिति
व्यजिज्ञपं मुकुन्दाय स चाज्ञापयतिस्म माम् ॥
भविष्यति पतिर्यस्ते स पुरं पालयिष्यति ।
तावद्विन्ध्यबिलद्वारि लिङ्गमाराधयेति च ॥
विष्णवाज्ञया तदारभ्य वसाम्यत्रैव पत्तने ।

सविद्यकथा ।

अथ राजा पारावारः पुनः पृच्छति, मुने सुबुद्धिकथा तावदाकर्णिता, संप्रति सविद्यकथां श्रोतुमिच्छामि । श्रुत्वा मुनिः कथयति, तद्‌यथा—

सविद्यस्य कथां श्रुत्वा विद्यासु वलते मनः ।
विद्याभ्यासपरस्यापि यशः पुण्यञ्च जायते ॥
सविद्यो विद्यया युक्तस्ताश्च विद्याश्चतुर्दश ।
प्राधान्यन्तु द्वयोस्तासां विद्यानां शस्त्रशास्त्रयोः ॥
उत्तमं हि धनं विद्या दीयमाना न हीयते ।
राजदायादचौराद्यैर्ग्रहीतुं नापि शक्यते ॥
पुरुषं साहसाक्रोशादज्ञ्नायासकारिणम् ।
लक्ष्मीर्विमुञ्चति क्वापि विद्याऽभ्यस्तं न मुञ्चति ॥
किं तस्य मानुषत्वेन बुद्धिर्य्यस्य न निर्म्मला ।
बुद्ध्याऽपि किं फलं तस्य येन विद्या न सञ्चिता ॥
सविद्यः पुरुषश्रेष्ठो यत्र कुत्रापि तिष्ठति ।
तत्रैव भवति श्रीमान् पूजापात्रञ्च भभुजाम् ॥
आसक्तोरीतिरभ्यासोदेवताभक्तिरेव च ।
चत्वारोमुनिभिश्चोक्ता विद्योपायाः पुरातनैः ॥
पङ्क्तिले पामरग्रामे पुरे पिशुनसेविते ।
राष्ट्रे चाविज्ञभूपाले सविद्यस्त्रिषु सीदति ॥
शस्त्रविद्यः, शास्त्रविद्यो लोकविद्यस्तथैव च ।

स्वभावाच्छस्त्रविद्यायाः शास्त्रविद्या कनीयसी।
शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्त्तते॥

तद्यथा—

यः समस्तेषु शास्त्रेषु कृताभ्यासोऽपि तत्त्ववित्।
शस्त्रविद्यः समाख्यातः सोऽस्त्रव्यापारपारगः॥

बभूव धारानाम राजधानी। तत्र विवेकशर्म्मणः पुत्रोनिर्व्विवेको नाम ब्राह्मणः प्रतिवास। स च वेदाध्ययनपराङ्मुख आचारनिरपेक्षो व्याधसमाजेन मृगयारसिको बभूव। एकदा मातुरनुनयेन मृगवधार्थमरण्यं न जगाम। गृहाङ्गने निषण्णः पुरतएव देवकुलकोटरे कूजतः पारावतान् दृष्ट्वा चिन्तयामास "यदिदं देवकुलमारुह्य पारावतान् पातयामि"। तथाहि कामुको न विना स्त्रीभिर्न खलः खलतां विना। न विना हिंसया हिंस्रः सुखं कुत्रापि विन्दति।

ततः स ब्राह्मणः पारावतशावकार्थी देवकुलमारुह्य कोटरे निक्षिप्तहस्तः कोटरस्थं सर्पं फणायां धृत्वा पारावतशावकभ्रमेण आचकर्ष। कोटरादाकृष्टेन तेन सरीसृपेण वेष्टितबाहुः परमत्रस्तश्चिन्तयामास, यदहमद्य सर्पमत्यजन्नेकहस्तावलम्बेन देवकुलादवरोढुं न शक्नोमि, त्यजंश्च सर्पेणैव दष्टव्योऽस्मि, तत् किमिदानीं करवाणि? तदनन्तरं सङ्कटपतित उच्चैरार्त्तरवं चकार "त्रायत मां लोका" इति च प्रोवाच, दुर्बुद्धिः—

जातदोषमनादृत्य व्यसनेषु प्रवर्त्तते।
कुधीः कातरतां याति लब्ध्वा व्यसनजं फलम्॥

तदीयमार्त्तरवमाकर्ण्य लोका बहुलीबभूवुः। पश्चात्तां कथां श्रुत्वा भोजदेवो राजाऽपि ब्राह्मणरक्षार्थं तत्राजगाम। तदनन्तरं सर्व्वैर्विचिन्त्यमानोऽपि ब्राह्मणरक्षाक्षमः शीघ्रं तथाकश्चि[illegible]

हस्तमात्रावलम्बेन स्थितं सन्दिग्धजीवितं ब्राह्मणं दृष्ट्वा करुणार्द्रहृदयो भोजदेवराजा सर्व्वानादिदेश। रे रे लोकाः कश्चिदस्ति युष्माकं मध्ये तथा य एनं ब्राह्मणं त्रायते। यस्य प्रयुक्त पराक्रमेण ब्राह्मणोऽयं कुशली देवकुलादवतरति, तस्मै निश्चितमहं लक्षं सुवर्णानि दास्ये, तदाकर्ण्य सिंहलनाम्ना केनाऽपि धनुर्व्विद्या विचक्षणेन उक्तं अहमल्पेनैवायासेन ब्राह्मणमवतारयामि। ब्राह्मणस्तावदिदानीं सर्पवेष्टितवाहुं स्तब्धं कृत्वा दर्शयतु। अथ तथा कृतवति ब्राह्मणे, स राजपुत्रः कोदण्डमाकृष्य सन्धानं विधाय नाराचचक्रेण सर्पस्य शिरस्तथाऽच्छिनत् यथा च्छिन्नं सर्प-कलेवरं भूमौ निपपात। ब्राह्मणकलेवरे तु कुशाग्रधाराग्र समानाऽपि रेखा न भूता। पश्चात् करस्थितं सर्पफणं परित्यज्य लब्धस्वायत्तः ब्राह्मणोदेवकुलात् पूर्व्ववदवततार। राजा च तं राजपुत्रं स्वीकृतसुवर्णलक्षं दत्त्वा परैश्ववासःप्रभृतिभिर्वहुभिः परितोषयामास।

श्लोकश्चैष गीयते—

ब्राह्मणस्य कृता रक्षा लक्षं लब्धञ्च काञ्चनम्।
राज्ञा अभ्यर्च्चितो वाहु-विद्यया किं न लभ्यते॥

इति शस्त्रविद्याकथा
समाप्ता।

अथ शास्त्रविद्या कथा।

अधीत्य चार्थं विज्ञाय पारगस्तर्कतन्त्रयोः।
शास्त्रेण विद्यया ख्यातः शास्त्रविद्यः स उच्यते॥

ब्राह्मण उवाच—

अस्त्यस्मिन् हि व्रतं राज्ञः प्रजानां परिपालनम्।
दुर्गतव्यथितार्त्तानां ब्राह्मणानाम्विशेषतः॥

ततोमां दुर्गतव्याधिपीड़ितं ब्राह्मणं त्रायतां देवः। राजा त
ब्राह्मणं तथाविधं दृष्ट्वा करुणार्द्रहृदयः किमत्र भविष्यतीति
जिज्ञासुर्वराहनामानं ज्योतिःशास्त्रविदं इत्यब्रवीत्। हे वरा
ब्राह्मणोजीविष्यति ?। वराह उवाच अक्षतमद्यपानएव नीरुग्भवि
ष्यति स पुरुषायुषं। तदाकर्ण्य राजा चिन्तयामास अहो शास्त्रदृष्टि-
रसौ किं ब्रूते ? कथमप्रसक्तं निषेधयति ब्राह्मणस्य कुतोऽस्य मद्य-
पानप्रसङ्गः ? भवतु पृच्छामि तावत्। ततोराजा हरिश्चन्द्रनामानं
भिषजमाहूयादिदेश भोः कोऽस्य व्याधिः का वा चिकित्सा ?

भिषक्। देव, व्याधिर्ब्रह्मकीटः, प्रतिक्रिया काचिन्नास्त्येव।

राजा। शास्त्रे भैषजं न कृतं विधिनैतत् न च सम्भाव्यं।

भिषक्। देव व्याधेरस्यापि भेषजमस्ति किन्तु ब्राह्मणस्य
देयम्।

राजा। किन्तत् भेषजम् ?

भिषक्। देव ब्रह्म कीटः शिरसि मार्गमस्य चरति तेनाऽस्
नाविह्वलो विद्यते। स ब्रह्मकीटो नाग्निना दह्यते न वै
ते न जलेन क्लिद्यति। केवलं मदेन म्रियते। तस्मादिरा
म्।

राजा। (कर्णौ स्पृष्ट्वा) आः शान्तं पापं ! ब्राह्मणस्य मदिरा
या ?।

ह्मणो न जीविष्यति इति निश्च

तत्त्वकौमुदी ।

परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति । तथा, कर्म्मणा मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमीहमानाः । तथा, परे ऋषयो मनीषिणः परं कर्म्मभ्योऽमृतत्वमानशुरिति । तदेतत्सर्व्वमभिप्रेत्याह तद्विपरीतः श्रेयान् तस्मादानुश्रविकाद्दुःखावघातकादुपायात् सोमादेरविशुद्धक्षयातिशययुक्ताद्विपरीतो विशुद्धो हिंसादिसङ्कराभावात् नित्यनिरतिशयोऽसकृदपुनरावृत्तिश्रुतेः। न च कार्य्यत्वेनानित्यता तस्य युक्ता, भावकार्य्यस्य तथात्वात्, दुःखप्रध्वंसस्य तु कार्य्यस्यापि तद्विपरीतत्वात्। न च दुःखान्तरोत्पादः कारणप्रवृत्तौ कार्य्योत्पादात् विवेकज्ञानोपजननपर्य्यन्तत्वाच्च कारणप्रवृत्तेः एतच्चोपरिष्टादुपपादयिष्यते । अक्षरार्थस्तु-तस्मादानुश्रविकाद्दुःखापघातकाद्धेतोर्विपरीतः सत्वपुरुषान्यताप्रत्ययः तत्साक्षात्कारो दुःखापघातकोहेतुः अतएव श्रेयान् । आनुश्रविको हि वेदविहितत्वात्सात्त्विका दुःखापघातकत्वाच्च प्रशस्यः, सत्वपुरुषान्यताप्रत्ययोऽपि प्रशस्यः, तदनयोः प्रशस्ययोर्मध्ये सत्वपुरुषान्यताप्रत्ययः श्रेयान् । कुतः पुनरस्योत्पत्तिरित्यत उक्तं व्यक्ताव्यक्तज्ञविज्ञानात् व्यक्तञ्चाव्यक्तञ्च ज्ञश्च व्यक्ताव्यक्तज्ञाः तेषां विज्ञानं विवेकेन ज्ञानम् । व्यक्तज्ञानपूर्व्वकमव्यक्तस्य तत्कारणस्य ज्ञानं, तयोश्च पारार्थ्येनात्मापरो ज्ञायतइति ज्ञानक्रमेणाभिधानम् । एतदुक्तम्भवति श्रुतिस्मृतीतिहासपुराणेभ्योव्यक्तादीन् विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्य दीर्घकालादरनैरन्तर्य्यसत्कारासेविताद्भ्यासात् भावनामयाद्विज्ञानमिति तथाच वक्ष्यति "एवं

अस्यार्थः ।

किन्तदमृतमित्याकांक्षायां तद्बोधकश्रुतिमुपन्यस्यति परेणेति । यस्मादिहत्तीया नाकं सुखं तथाचोत्कर्षावधिभूताभिन्नं सुखमित्यर्थः । केचित्तु कं सुखं तद्भिन्नमकं दुःखं तदनधिकरणं स्वर्गस्ततः परेण परमित्याहुः । ननु यत् प्राप्यं तद्देशकालव्यवहितं परिच्छिन्नमनित्यं च दृष्टं यथा ग्रामादि, तद्वदिदमपि स्यादत आह निहितं गुहायां इति । अत्र परतोनीरन्ध्रावरणसंकुचितद्वारगमनागमनशून्यभावहत्वरूपगुहासाधर्म्येण गुहापदेन स्थूलादि शरीरत्रयं गृह्यते । ननु मुख्यमेव गुहादि किमिति गृह्यते इति चेत् शृणु । सत्यं ज्ञानमनन्तं ब्रह्म योवेद निहितं गुहायां इति तैत्तीरीयकेऽमृतं पिवन्तौ सुकृतस्य लोके गुहाप्रविष्टौ परमात् परार्द्धे । गुहाहितं गह्वरेष्ठं पुराणम् इति । काठके । आविः संनिहितं गुहाचरं नाम महत्पदमिति मुण्डके च समाम्नातं गुहापदं । तत्रामृतं पिवन्ताविति काठाम्नाये समाम्नाताविव द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति गुहाविवरणपरमन्त्रेण वृक्षाश्रित-सुपर्णौ निर्दिष्टौ भवतः । ऋतं पिवन्ता, वितूर्द्ध्वमेवोर्द्ध्वमूलोऽवाक्शाखएषोऽश्वत्थः सनातन इति मन्त्रेण शरीरस्य ऋतपानकर्तृ सुपर्णाश्रितवृक्षनिर्देशात् शरीरमेव गुहेति निर्णयेऽत्रापि तदेव ग्राह्यमिति मुख्यग्रहे मानाभावात् । हृद्यं तज्ज्योतिः पुरुषः इति श्रुतेर्हृदेव गुहेति केचित् नन्वेवमपि परिच्छिन्नं तदवश्यमेवेति चेन्न । घटाकाशादिवत् परिच्छिन्नत्वस्योपाधिकत्वात् । अतएव यदर्चिमद्यदणुभ्योऽणु च यस्मिंल्लोका निहिता लोकिनश्चेति सङ्गच्छते । नचेदं सांख्यीयमतं न भवतीति भ्रमितव्यं । तस्य श्रुत्यनुकूलयुक्तिप्रतिपादक-

हाम्लेट्-चरितं ।

द्वितीयं-दृश्यम् ।

तत्रैव (स्थाने) राजसभा ।

(ततः प्रविशन्ति राजा, राज्ञी, हाम्लेट्, पोलोनीयसः लेवतेशः, भलटिमण्डः, कर्णलोयसः निम्नराजानो, विभवतश्च परिवाराः ।

राजा । (समन्तादवलोक्य) ।

तस्यास्मत्प्रियसोदरस्य मृतिजं प्रत्यग्रवत् यद्यपि
मन्युर्नो हृदि वर्त्तितुं समुचितोऽस्माभिर्निमग्नैस्ततः ।
स्थातव्यं सुरलोकगस्य निखिलैराज्यैश्च संस्तम्भितैः
शोकेनाभिभवङ्करेण कुटिलो ह्येषा निसर्गस्थितिः ॥
अस्त्येषा प्रकृतिर्विवेक इह च प्रोद्भूय सद्योबलात्
तामाक्रम्य विजित्य तस्य वलितं शोकप्रवाहं पुनः ।
रोद्धुं नः समुपादिशत्यपि वयं संष्टभ्य मन्युं शनै
रस्मान् स्वाननु साम्प्रतं च मनसानुस्मर्त्तुञ्च योग्यास्ततः ॥
तस्मादद्य पुरा ममाग्रजवधूर्यासीदियञ्चाधुना
राज्ञी नोरणमत्तमेतदखिलं राज्यं मया सेवते ।
तामेनां खलु शोकमन्थरमुदा शोकप्रमोदाश्रुभि
राप्लुतं युगपत् विलोचनयुगं संधारयन् हर्षभाक् ।

तस्येति तस्य अस्माकं प्रियसोदरस्य मृतुस्तज्जन्यः शोक इत्यर्थः यद्यपि नः अस्माकं [हृ]दि मनसि सुचिरं यावज्जीवमित्यर्थः, प्रत्यग्रवदभिनव इव वर्त्तितुं स्यात् समुचितः सम्यक् [यो]ग्योऽस्ति न कदाचिदपि विस्मर्त्तव्य इति यावत, तत्र हेतोरस्माभिरपि [illegible]

शोकी वाप्यथ पाणिपीड़नविधौ शोकाकुलस्तोऽथ्य
आनन्दञ्च मुधा सखं अकरवं पत्नीं निजां. प्राप च
कार्य्ये ह्यत्र यथेच्छनत्रभवतां सम्मोदनं यत्ततः ।
सर्व्वे ताः खलु धन्यवादततयोयुष्मासु नः साम्प्रतम् ॥

अन्यच्च विज्ञातमिदं भवद्भिः
कर्ट्टिन्नृपाख्यः स युवाऽधुना नः ।
विचिन्त्य शीलानयथा विनाशात्
प्रियाग्रजस्यादय विसक्तमेतत्
राज्यं समस्तं भवितेति मत्वा
ततो व्यथाग्रापरिणोदितोऽसौ ।
समुद्यतोऽस्मिन् समयेऽनुकूले
दूतेन चोद्वेजयितुं किलास्मान् ॥

सुचिरमित्यनेन सर्व्वत्रान्वयः । एषा हि निसर्गस्थितिः प्रकृतिमर्य्यादा खल्वेषा, प्रकृतिर्हि अस्मानेवं कारयितुं यतते इति भावः ।

प्रकृति रेषा एवं प्रकारा अस्ति, च पुनर्विवेक इह अस्माकं हृदये सद्यः प्रोद्य बलात् तां प्रकृतिं आक्रम्य विजित्य पराभूय च तं वलितं प्रबलं शोकवेगं रोद्धुं नः अस्मान् समुपादिशति । वयमपि ततस्तस्मात् विवेकोपदेशात् शनैः मनुज शोकं संहृत्य मन्दीकृत्य साम्प्रतं ननु त्वयां अस्मान् स्वानपि अनुस्मर्तुं योग्याः भवाम इति शेषः । इदानीमस्माभिः शोकवेगं मन्दीकृत्यात्मविषयिणी चिन्ता च कार्य्या इति भावः ।

तस्मात् कारणात् अद्य या इयं पुरा मम ज्येष्ठभ्रातृवधूरासीत् अधुना च नः अस्माकं राज्ञी सती एतत् समस्तं युद्धप्रियं अखिलं राज्यं साम्राज्यं मया सार्द्धं भजते अधिकरोतीत्यावत् । तां एतां युगपत् शोकप्रमोदात्‌भ्यां अभिराप्तुं विलोचनायुगं नैवद्वन्द्वं धारयन् शोकेऽपि शोककालेऽपि हर्षभाक् अथवा पाणिपीड़नविधौ विवाहोत्सवेऽपि शोकाकुलः किं बहुना मुधा समं आनन्दं तोलयन् शोकं आनन्दं च समं कुर्व्वन् शोकमध्यरमुदा तु निजां पत्नीं अकरवं हि यस्मात् अत्र (परिणय) कार्य्ये अत्रभवतां युष्माकं यथेच्छं यत् सम्मोदनं अनुमोदनं प्राप तत् तस्मात् खल युष्मासु साम्प्र:

मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः ॥२२॥

पदच्छेदः । मृदु-मध्य-अधिमात्रत्वात्-ततः, अपि, विशेषः ।

पदार्थः । स्पष्टम् ।

अन्वयः । तीव्रस्य मृदु-मध्य—अधिमात्रत्वात् ततः आसन्नादपि विशेषः समाधिलाभ इति शेषः ।

भावार्थः । पूर्व्वसूत्रोक्तविशेषान्तरं तस्य तीव्रत्वस्य मृदुमध्याधिमात्रत्वेन मृदुतीव्रोमध्यतीव्रोऽधिमात्रतीव्र इति त्रैविध्यात्तत आसन्नादपि विशेषः तत्तत्स्वरूप इति, तथाहि मृदुतीव्रसंवेगस्य आसन्नः, ततोमध्यतीव्रसंवेगस्य आसन्नतरः तस्मात् अधिमात्र तीव्रसंवेगस्याधिमात्रोपायस्याप्यासन्नतमः समाधिलाभ इति शेषः ।

As there are three kinds of Yogis—some are slow, some are middling and others are exceedingly sharp. Hence some accomplisth contemplation quickly, others take time.

वृत्तिः । तीव्रस्य संवेगस्य मृदुमध्याधिमात्रत्वात् ततोमृदुतीव्र संवेगस्य योगिन आसन्नात् समाधेर्मध्यतीव्रसंवेगस्यासन्नतरा-दधिमात्रतीव्रसंवेगस्यासन्नतमः समाधिलाभ इत्यर्थः ।

ईश्वरप्रणिधानाद्वा ॥२३॥

पदच्छेदः । ईश्वर—प्रणिधानात् वा ।

पदार्थः । ईश्वरः वक्ष्यमाणलक्षणः पुरुषविशेषः, प्रणिधानं भक्तिविशेषः, विशिष्टमुपासनं सर्व्वक्रियाणामपि तत्रार्पणं, विषय-सुखादिकं फलं अनिच्छन् सर्व्वाः क्रियास्तस्मिन् परमगुरावर्पयति तत् प्रणिधानं इति निष्कर्षः तस्मात्, वा अथवा ।

गृह्णात्यभिधानमात्रेण, तदभिधानमात्रेणापि योगिनः आसन्नतरः समाधिलाभः फलञ्च मोक्षश्च भवतीति भावः ।

Or contemplation is accomplished by exceedingly acute faith to God.

वृत्तिः । ईश्वरे कायिकाद्वाचिकान्मानासात्प्रणिधानाद्भक्तिविशेषादासन्नतमः समाधिलाभः वा शब्दः पूर्व्वोक्तोपायेनास्य भक्तुरपायस्य विकल्पार्थः, भक्तेरन्यानपेक्षत्वादीश्वरोहि भक्त्याभिमुखः सन्निदमिष्टमस्यास्त्वित्यनुगृह्णातीति भावः ।

क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥२४॥

पदच्छेदः । क्लेश-कर्म्म-विपाक-आशयैः, अपरामृष्टः, पुरुष-विशेष, ईश्वरः ।

पदार्थः । क्लिश्यन्ति खलमी सांसारिकं पुरुषं विविधदुःख–प्रहारेणेति क्लेशाः अविद्यादयोवक्ष्यमाणाः, विहितप्रतिषिद्ध, व्यामिश्ररूपाणि वैदिक,लौकिकानि त्रिविधानि कर्म्माणि धर्म्माधर्म्मौ इति केचित् । विपच्यन्ते इति विपाकाः कर्म्मफलानि जात्यायुर्भोगाः, आफलविपाकात् चित्तभूमौ शेरत इति आशया वासनाख्याः संस्काराः । तैः अपरामृष्टः त्रिष्वपि कालेषु न संस्पृष्टः, पुरुषविशेषः अन्येभ्यः पुरुषेभ्यः विशिष्यते इति पुरुषविशेषः ईश्वरः ईशनशीलः इच्छामात्रेण सकलजगदुद्धरणक्षम इत्यर्थः ।

अन्वयः । क्लेश—अपरामृष्टः पुरुषविशेष ईश्वरः कथ्यत इति शेषः ।

भावार्थः । ईश्वरस्तु न तत्त्वान्तरं पुरुष—तत्त्व एव तस्यान्तर्भावः । तत्र विशेषस्तु अन्ये पुरुषाः क्लेशादिभिः परामृष्यन्ते, ईश्वरस्तु तैः कदापि न परामृष्यते इति । ननु क्लेशान्ये [illegible]

किं वैशिष्ट्यमिति चेत् सत्यं क्लेशादयोबुद्धिधर्म्मा अपि सर्व्वत्र सांसारिके पुरुषे व्यपदिश्यन्ते यथा योधेषु वर्त्तमानोजय: पराजयो वा स्वामिनि। ईश्वरस्य तु त्रिष्वपि कालेषु तथाविध: क्लेशादि परामर्शो नास्तीत्यत: स विलक्षण एव भगवानीश्वर:।

God is a distinct Personum or spirit, free from touch of pains, actions, their effects and desires.

वृत्ति:। ईश्वरस्वरूपं निरूपयति—क्लेशा अविद्यादय: पञ्च, कर्म्म धर्म्माधर्म्मौ, एतयो: फलं विपाक:, फलानुगुणा: संस्कारा आशया: मनस्याशेरत इति व्युत्पत्ते:। यथा नरस्य करिजन्मनि काष्टभोगसंस्कारा उद्भवन्ति अन्यथा जीवनासंभवात्तै: क्लेशा दिभि: चित्तस्थै: परामृष्ट: सांसारिक: पुरुषस्तैरविवेकेन भोक्तृ त्वात् तै: कालत्रयेऽप्यसंबद्ध: पुरुष ईश्वर: विशेषपदेन कालत्रया संबन्धवाचिना मुक्तजीवेभ्य: व्यावृत्ति: कृता, तेषां पूर्व्वकाले बन्धत्रय सम्बन्धात् प्रकृतौ लीनानां प्राकृतोबन्ध:, भूतेन्द्रियेषु विकारेषु लीनानां विदेहानां वैकारिक: अन्येषां देवनरादीनां दक्षिणाबन्ध: चित्ताधीनकर्म्मफलत्वादिति भेद:। ननु ज्ञानक्रिया शक्तिमत पर मैश्वरं पुरुषस्यापरिणामिन: कथमित्युच्यते अस्ति हि ईश्वरस्या नादिसिद्धं शुद्धसत्त्वात्मकं चित्तं प्रधानजं निरतिशयज्ञानक्रिया शक्तिमत् स हि भगवान् संसारार्णवाज्जन्तूनामुद्धरणेच्छया तच्चित्तमु पादत्ते तद्विना ज्ञानधर्मोपदेशभक्तानुग्रहायोगात् न च चित्तोपादा नात् प्रागिच्छाप्युदेतीति वाच्यं बीजांकुरवदनादित्वात्सर्ग प्रलयप्रवा हस्य यदा सर्व्वकार्यस्य प्रलय: तदाभविष्यत्काले लोकानुग्रहार्थमिदं

इत्याशिषे दृष्टादृष्टविशिष्टः पुरुषविशेषः निरतिशयज्ञानशक्तिविशिष्टे-श्वरो नास्ति अतः प्रमाणमिति संक्षेप एवं वै दृष्टान्ताभावादिति; सर्वज्ञ ईश्वरः तत्र सर्वज्ञत्वेऽनुमानमप्याह तत्र निरतिशयं सर्वज्ञवीजं ।

तत्र निरतिशयं सर्व्वज्ञवीजम् २५ ॥

पदच्छेदः । तत्र, निरतिशयं, सर्व्वज्ञ-वीजम् ।

पदार्थः । तत्र ईश्वरे, निरतिशयं निर्नास्ति अतिशयः यस्मात्, अथवा अतिशयात् निष्क्रान्तं यतः परमातिशयवत्ता नास्ति, काष्ठाप्राप्तमिति यावत् सर्व्वज्ञस्य अतीताऽनागतादि ग्राहकस्य वीजं सर्व्वज्ञत्वं तत् वीजमिव ।

अन्वयः । तत्र सर्व्वज्ञवीजं निरतिशयं अस्तीति शेषः ।

भावार्थः । इह यत् सातिशयं तन्निरतिशयं, दृश्यते हि लोके सातिशयानां अणुत्वमहत्त्वादिधर्म्माणां निरतिशयत्वं यथा परमाणा-वणुत्वस्य, परममहत्त्वस्य चाकाशे । सर्व्वज्ञत्वं नाम अतीतानाग-तादिग्रहणरूप, धर्म्मविशेषः, तच्च सातिशयमपि दृश्यते यतः देवदत्ते चैत्रापेक्षयाऽधिकं सर्व्वज्ञत्वं मैत्रापेक्षयाच न्यूनं, ततस्तस्य निरति-शयत्वं युक्तिबलादायातमेव । तेन यत्र तत् सर्व्वज्ञत्वं निरतिशयं वर्त्तते स एव ईश्वर इति भावः ।

In him the omniscience has obtained fulness.

वृत्तिः । अस्मादादीनां ज्ञानं निरतिशयेन ज्ञानेनाविनाभूतं भवितुमर्हति सातिशयत्वात्, यत् सातिशयं तत् समानजातीयेन निरतिशयेन युक्तं यथा कुंभ परिमाणं विभुपरिमाणेन तत्सिद्धं निरतिशयज्ञानं सर्व्वज्ञस्य वीजं ज्ञापकं यत्र निरतिशयं ज्ञानं तत्र सर्व्वज्ञत्वं ज्ञायत इत्यर्थः । तस्य समान्येन सिद्धस्य सर्व्वज्ञस्य श्रुत्या-दिसिद्धा शिवविष्णु नारायण महेश्वरादि संज्ञा । तस्य—

दशकुमारकथासारः ।

यः पुमान् प्रविशेदेतत् कुण्डं मे स पतिर्भवेत्
इत्युक्त्वा सा ज्वलज्ज्वालमग्निकुण्डमदर्शयत् ॥
ततस्तस्या वचः श्रुत्वा क्षिप्रं विप्रोनलेऽपतत् ।
क्षणेनैव युवा भूत्वा स विप्रो निरगात् पुनः ।
पाणिमग्राहयत् तस्यास्तं द्विजं राजवाहनः ।
ततस्तत्सर्व्वं शस्याढ्यं प्रजाकीर्णमभूत् पुरम् ।
केषुचिद्वासरेष्वत्र गच्छत्सु गमनैषिणम् ।
मणिं कञ्चित् प्रदर्श्याथ जगाद कमलावती ॥
एतद्रत्नं दधानस्य नश्यन्ति क्षुत्तृडामयाः ।
शस्त्राग्निग्रहचौराहिसिंहादिभवभयान्यपि ।
इति स्तुत्वा मणिं तस्मै प्रार्थनापूर्व्वं चाददौ ।
तामापृच्छ्य निराक्रामत् स च तैश्च वियोजितान्
अनवेक्ष्य सखींस्तत्र तदन्वेषी महीमटन् ॥
प्रापदुज्जयिनीं देशे मालवे राजवाहनः ।
तस्या उपवनोद्देशे पादपाधश्च तत्क्षणम् ॥
दृष्ट्वा पुष्पोद्भवं प्रीत्या परिरेभे तथोत्थितम् ।
आवेदितात्मवृत्ताय तस्मै पुष्पोद्भवस्तदा ॥
तत्पृष्टः प्राञ्जलिर्भूत्वात्मवृत्तान्तं न्यवेदयत् ।
अहञ्च भवदन्वेषी भूत्वा विन्ध्यवने भ्रमन् ।
मध्याह्ने ग्रीष्मतप्तोऽपि वटच्छायामुपास्थि ह ॥
तस्मिन्नेव क्षणे तस्मात् पुरुषं गिरिशृङ्गतः ।
पतन्तं कञ्चिदालोक्य दोर्भ्यामालिङ्ग्य विद्रुतम् ॥

सोऽप्यवादीदहं हंसराजामात्यतनूद्भवः ॥
रत्नोद्भवस्तु मत्पोतो ममज्ज जलधौ पुरा ।
कश्चित् फलकमादाय त्रासात्तमतरं पुरा ॥
तत्रस्था गर्भिणी भार्य्या क्व गता मे न लक्षिता ।
मालवाधीशसंत्रासं मगधेश्वपलायनम् ॥
अङ्गैरपि सन्त्रासं श्रुत्वा शोकार्णवेऽविशम् ।
षोड़शाब्दावसाने तु प्रियां दृष्ट्वाप्स्यसीति माम् ॥
कश्चिदाश्वासयत् सिद्धः षोड़शाब्दास्तु मे गताः ।
प्रियाविरहसन्तापमसहिष्णुरतः परम् ॥
भृगुपातमहं तत्राकर्षं मान्तु लसग्रहीः ।
इत्याकर्ण्य स्मृतोदन्तस्तं मे तात अवागमम् ।
अत्रान्तरे श्रुतं पार्श्वे कस्याश्चित् क्रन्दितं स्त्रियाः ॥
आगच्छागच्छ वत्सेऽस्मादवोचं पितरं मम ।
व्याहरणोति भयादस्मादेतां रक्षेत्युवाच तं
अहञ्च तूर्णमग्नेस्तामपनीय तदन्तिकं ।
आनीय सा च वृद्धा मे पृष्टा ब्रूते स्वयं ततः ।
मगधाधीश्वरामात्यपुत्रोरत्नोद्भवाभिधः ।
पोतनार्थार्ज्जकः कालयवनद्वीपमागमत्
श्रेष्ठिनः कालगुप्तस्य सुवृत्तां तस्य कन्यकां ।
विवाह्य व्यवहारेण बह्वर्थं लब्धवानसौ ॥
द्रष्टुं स्वपितरौ तस्मिन् प्रत्यावृत्ते महार्णवे ।
पोते च विधिना भग्ने ययुः सर्व्वे विशीर्णताम्.
सुवृत्तां गर्भिणीं तस्य पुत्रीमायुष्मतीं तदा ।

प्रसववरायथया तस्यां लुठन्त्यामहमग्रजं ।
इतस्ततस्तमादाय वासमार्गमपीतवती ।
तदानीमेव वृन्दं मे समाभ्यर्णमुपागते ।
अधावं कुलिशाघुस्थे बालं त्यक्त्वा भयादहं ।
गजे जाते पुनश्चादारभ्यान्विष्यापि तमर्भकं ।
नापश्याव मुनेः कस्याप्याश्रमं प्रागवाश्रमं शनैः ।
अन्ते षोड़शवर्षाणां पतिं पुत्रं त्वमाप्स्यसि ।
इत्यादेशं समाख्याय तां समाश्वासयन्मुनिः ॥
तत्कालातिक्रमे वह्निं विशन्ती रक्षिता त्वया ।
... ... ॥
रक्षन्तीमास्य सा मातरमाश्वाय च त्वया हृदि ।
मामनुप्राप्य सोद्राक्षीत् स्त्रियं रत्नोद्भवोपि तां ।
अस्योरत्नमादाय साधयित्वा महज्जलं ।
पुरास्मिन् व्यवहारेण वर्त्तेहं पितृपृच्छकः ।
विदेशव्यवहारीति मां लसद्वस्तुसम्पदं ।
राजप्रकृतयः सर्व्वा मानयन्ति प्रयत्नतः ।
धात्रीसुता राजपुत्र्याः सखी या बालचन्द्रिका ।
मयोच्छ्रितिं रतिं सा च तस्यां चानुदिनं रमे ।
कदाचिदनुजो राजमन्त्रिणश्चण्डवर्म्मणः ।
दारुवर्म्मा बलादेनामानयत् स्वगृहं निशि
निजम्प्रुरूपमाच्छाद्य दासोचिह्नानि धारयन् ॥
तयैव प्रियया साकमागच्छन्तस्य मन्दिरं ।
तन्तदालिङ्गनोद्युक्तमहमेकान्तसद्मनि ।
अङ्गाराद्यनरूपेण काष्ठं शल्लनमारयम् ।
ततोनिष्कण्टकं तस्या यथाभिलषितम्फलं ॥

त्वद्दर्शननिमित्तासौ [illegible]
भवन्तं [illegible]।
श्रुत्वेति पुष्पोद्भवभाषितानि वसन् कुमारो[illegible]एव तस्य
तस्मिन् पुरे विप्रमिषाच्चचार मन्त्रौषधं विप्रकलां वितेने
इति श्रीमदप्प्याचार्यविरचिते दशकुमारकथासारे
पुष्पोद्भवचरितं नाम द्वितीयः परिच्छेदः।
अन्यदा मालवेन्द्रस्य तनयो राजवाहनः।
यात्रोत्सवे महाकालस्य ददर्शावन्तिसुन्दरीं।
अपाङ्गवल्गया दृष्ट्या साऽपि तं निरवर्णयत्।
तयोरुपर्यनङ्गश्च ववर्ष कुसुमाशुगान्।
सखि जानासि किं कोऽयमिति पृष्टा बालचन्द्रिका।
तस्य नामादिकं सर्वं [illegible] न्यवेदयत्।
राजहंसात्मजो [illegible] ॥
राजानं कुसुम[illegible] देवि।
इति देवीं नमस्कृत्य निर्गता सा कुमारिका।
विलासिनी सहस्रैस्संवृता कन्यका पुरं ययौ।
नत्वा देवीं स निर्गच्छन् निर्ध्याय जलराकुले।
सोमदत्तस्थित[illegible] परि[illegible]।
आलिलिङ्गतुरन्योन्यं स च पुष्पोद्भवोप्युभौ।
उपर्युरस्थले क्वापि तस्योपविविशुस्त्रयः।
कथां पुष्पोद्भवस्यापि स्वस्य चोक्त्वा नृपात्मजः।
पप्रच्छ सोमदत्तस्य सोऽपूर्वे [illegible]।
देवद्विजोपकाराय सुरालयदिशं त्वयि
तदा प्रविष्टे [illegible] त्वदन्वेषणतत्परे।
अहन्त्वां समन्वेष्टुं नदीमुत्तीर्य नर्मदां।
गच्छन् क्वापि स्म रत्नं किम[illegible]

धातुसूत्रम् ।

अथ णोपदेशः ।

नन्दि नर्दि नृती नाथृ नृ नक्कि नाटिवर्ज्जिताः ।
नादयो णोपदेशाः स्युर्न नाथः कस्यचिन्मते ॥

अथ षोपदेशः ।

स्मूङ्क्षि स्तानि स्तेनि स्तृ सारिसामस्तपिस्थै
स्तोमस्तृसेकसृप्लि सभाजि सूच सृजः ।
ष्ठिवा तवर्गात्परस्सादयः ष्विदा ष्वि
ष्वद ष्वप ष्वञ्च षोपदेशाः ॥
संयाने षोपदेशत्वं निवासे णोपदेशतां ।
नेच्छन्ति क्वचिदन्यत्र शिष्टव्यवस्थितिस्त्वसौ ॥

तयोः फलव्यापारयोः । अथोपसर्गाणामिति । यदृच्छया उच्चरितशब्दविषयत्वं तात्पर्य्यं । तमन्धकारं घटपटादिकं दीपो यथा दर्शयति तथा उपसर्गः धातोरर्थविशेषं तात्पर्य्यार्थं ग्राहयति । अन्यथा शिव उपास्ते इत्यादौ उपसर्गार्थत्वेन उपासनायां धात्वर्थत्वाभावेन वाच्यत्वं न स्यात् कर्म्मसंज्ञाया अभावेन उक्तत्वं न स्याच्च । प्रभूयेत्यादौ भावप्रत्ययः क्वापि न स्यात् उपसर्गार्थस्य भावत्वाभावात् । चादिवदिति अत्र निपाताश्चादयोऽसत्त्वे इति पाणिनि सूत्रं च वा हा ह एव इत्यादयः शब्दा अद्रव्यवाचित्वे निपात संज्ञकाः स्युरित्यर्थः । द्योतयन्ति तात्पर्य्यार्थं ग्राहयन्तीति द्योतकाः । द्रव्यं विशेष्यं । अद्रव्यवाचिना । अनर्थकानामित्यर्थः । निर्गुणत्वं शून्यत्वं ।

अथेति । उपदेशः प्रथमं शिक्षुवादीनां । नन्दीत्यादि । ननु के धातवो णोपदेशा इति प्रश्ने आह नादयो णोपदेशाः स्युरिति । सर्व्वे नादय उपदेशकाले मूर्द्धन्यणकारादयः स्युः । बहुवचनं सङ्ग्रो-

अथ अन्याङ्गविवृतिः ।

हलन्ताधातवोऽदन्ताः प्रायश्छन्दोऽनुरोधतः ।
तथानुबन्धाश्चिह्नार्थाः किन्तु अङ्के हलन्तकाः ।
पदान्यर्थानुरूपाणि प्रत्यर्थं शक्तिरेव हि ॥
यावन्तोर्था हि तावन्ति पदानि चेति शब्दिकाः ।
भ्वादिदशगणान् धातून् अयामि छन्दसाधुना ।
आद्यदादिक्रमान्तादादिक्रमान् बहुयत्नतः ॥

अकारादावाकारादिस्वरान्ता ।

ख्याट्प्रकथने योगाङ् गत्यां गाल स्रुतौ गतौ ।
घ्राणन्यग्रहणे ज्ञा स्वाभियोगे ज्ञानबोधने ॥

नये क्र्यादिः । नक्ष नाशने नट पीडने तौ चुरादौ । एतान् वर्ज्जयित्वा नादयः णोपदेशाः स्युः । कस्यचिदिति भागवृत्तिकारस्य मते णाष्ट्र नायने इत्ययं धातुर्णोपदेशेन स्यात् तन्मते उपदेशेऽयं दन्त्यादिः । णोपदेशस्य फलं णादिधातोरन्तरिचेति णत्वविधानं । षोपदेशान् वक्तुमुचुङ्क्तो स्थूलोल्यादिना । ननु के षोपदेशा इत्यत्राह भाष्यं । अचतवर्गपरसादयः षोपदेशा इति । तवर्गाजिति । तवर्गश्च परे यस्य दन्त्यसकारस्य स तवर्गाच्च परः । तवर्गाच्परश्चासौ सश्चेति तवर्गाच्परसः । तवर्गाच् परः स आदौ येषां धातूनां ते तवर्गाच् परसादयः । ते च निविहां सिवुऽहस्तु सञ्ज्ञामिति सूत्रादिषु दृश्यन्ते । स्थूल्यादीन् त्यक्ता तवर्गाच्परसादयो धातवः ष्विद षि ष्वद ष्वप ष्वञ्जन्ता धातवः षोपदेशा भवन्ति । ततोधात्वादिःषः सोभवति । ष्विदादीनां तवर्गाच्परत्वं नास्तीति पृथगुपादानं ष्वञ्जान्त धातवः । स्थूलेष्टहणे चुरादि भ्वादिश्च । तेन चौर्य्ये चुरादिः, स्तृगती जुहोत्यादिर्भ्वादिश्च सार दौर्बल्ये, साम सान्त्वने द्वौ चुरादौ । सृभृगतौ सौत्रचुसंघातयोः द्वौ भ्वादौ । स्तोम श्लाघायां चुरादिः । स्त्रञ्ज आच्छादने स्वादिः क्र्यादिश्च । सेक गतौ भ्वादिः

शिवजिच्चरितम् ।

अद्याप्यस्ति भुजयो र्यदिनो वहन्ति।
तत् कोऽयमार्य्यजनुषां हृदि पापबन्धः ॥

तन्त्र । महाराज ! न खलु केवलमयं गुरोरादेशः किन्तु भगवत्या भक्ताभीष्टप्रदानकुशलायाः कात्यायनीदेव्याः तत् सर्व्वथाय मधिरोहति विशेषविचारकोटिम् ।

राजा । कथमेतदवधार्य्यते, संशयितचित्तवृत्तिरत्रेदानीमस्मि सम्वृत्तः । ननु विदितमस्ति युष्माकं, यथा प्रागेवाहं ।

स्वदेशप्रेमाणं द्विगुणतरमादौ हृदि बलात् ।
समारोप्यानीचैर्यवननृपतेर्लोकदलनम् ॥
प्रदर्श्योत्साहं बहुलतरमस्मिन् पथि तया ।
महादेव्या नीतोऽध्यवसितसमुद्भाविततमसम् ॥

तदेवं भूते दारुणे पथि प्रागनल्पोत्साहैः प्रवर्त्तय सम्प्रति किमियं अस्यावशिष्टात् गन्तव्यपथात् विनिवारयति ?

तन्त्र । देव ! अप्रतर्क्यचरिताः किल भवन्ति देवताः अस्मास्विदानीमिदमनिष्टफलवत्तया सम्भावितमपि असंशयं शुभोदर्कं भविष्यतीति परामृशामः ।

मयू । तत् किं देवेन तत्रभवतः प्रथितमहिम्नः भगवद्ब्रह्माचार्य्यस्य भ्रान्तिरुत । इत्यर्द्धोक्ते ।

राजा । साशङ्कं कर्णौ पिधाय, मामैवं मयूरेश्वर तत्रभवत्सु भगवत्सु अनयाऽन्यथासम्भावनया ।—

ते हि खलु गुरुचरणाः—

योगाद्योगं विशदमनसः प्राप्य योगेश्वरस्य
प्रक्षीणाशाः परिहृतनिजाशेषकृत्या अमुष्मिन् ॥

तदत्र किमन्यद् ब्रवीमि नात्र सम्भवति भगवतां शान्तिः सर्व्वथा साम्प्रतं तथैव प्रतिभातु जनचेतसि, भगवत्याः भवानी देव्या अयमादेशः। क्षणं तूष्णीं स्थित्वा दीर्घं निःश्वस्य, जननि जननवसुधे! हतभाग्यसन्तानप्रसूति! सुदुर्लभः खलु अस्मात् परं अम्बायाः समाश्वासः, देवि! अप्रभूतबलः दैवप्रतिहतनिखिला-रम्भः [illegible] शिवजीनामा भवत्या अज्ञातव्रततनयः अस-मर्थ इदानीं त्वां विपद्वारिधेः परित्रातुम् साहम् जननि! न खलु स्वेच्छया इदमतिगर्हितमाचरितं तपस्विना ते तनयेन, देवि, देवताभिरङ्गीक्रियते खल्वयं धनुर्विनाशमहासमारम्भेषु तत् किमन्यत्करोमि मन्दभाग्यः [illegible] अम्ब! [illegible] दुरपनेयानि भवद्दुःखानि निदूरयामि? इति [illegible] इव स्थित्वा [illegible] तन्त्र-जित! परबलैकविजयिन् मयूरेश्वर! [illegible] सेनापते! तदिदानीं सर्व्वथा युक्त माचरन्तु भवन्तः यवनभूपतेः सार्द्धं सन्धानमुद्दिश्य देव्यादेशम्। प्रतिपालयन्तु च—परमणीयतरामनुज्ञां गुरोः विसृजन्तु [illegible] शान्तिनिकेतनं वनोद्देशं प्रति, प्रतिफलतु विधातुर्लेखनीकठोरतादक्षिणापथवास्तव्यानां ललाटफलके, हन्तभोः।

यस्या जीवनमेव, सन्ततमभूच्चिन्ता हृदालम्बिनी।
सान्द्रानन्दसुधासरिद्विरचिता, श्लाघीयसः कर्म्मणः॥
आमूलं यदि तद्विधेर्हतविधेः प्रध्वंसकोटिं व्रजेत्।
तन्नः संसृतिकानने किमिह वा स्थित्यै समालम्बनम्॥

तत् सम्प्रति वयं दैवहतकेन सर्व्वथा निराश्वासाः कृताः इति।

मयू। देव। न खलु राज्ञां सन्धानमाप्रलयं [illegible]

पुरुषपरीक्षा ।

आचार्य्य । अन्यथा असाध्यव्याधिप्रतीकारे मद्यपानैक साध्यायां प्राणरक्षायां यदि वैद्योनिश्चितज्ञानोऽस्ति तदाऽस्य प्राणरक्षार्थिनोब्राह्मणस्य मद्यपानेनापि न पातित्यम् ।

वैद्यः । यद्ययमुपायान्तरेण जीवति ब्राह्मणो, मद्यपानेन वा न जीवति तदाऽहं पातकी भवामि ।

ततो राजा तयोरुभयोरपि स्व-स्व-शास्त्रसिद्धं दार्ढ्यं श्रुत्वा ब्राह्मणाय मद्यं पातुमादिदेश । अत्रोपनीते च मद्ये तदानी-मकाशवागभूत्—

"रे शवर मा साहसं कार्षीः ।" तदाकर्ण्य शवरस्वामुरवाच— "पिव रे ब्राह्मण मद्यं, वाक्देवतेयं वर्णपदवाक्योपनयनकुशला किं जानाति धर्म्मस्य निष्कर्षं । तदनन्तरं शवरस्वामिनः शिरसि पुष्पवृष्टिर्बभूव । तया पुष्पवृष्ट्या श्रद्धालुः सभासत्सहितो राजा शवरस्वामिनोवचनमादृत्य ब्राह्मणाय मद्यं दापयामास । ब्राह्मणस्त्वाजन्मनोमद्यमपेयतयाऽवज्ञातं पातुमुद्यतोऽपि निः-श्वासाकृष्टेन मद्यगन्धेन परमव्याकुलितोबभूव । ततस्तस्य शिरसो मदिरागन्धपराभूतो ब्रह्मकोटो नासारन्ध्रेण भूमौ निप-पात । पतितञ्च कीटं राजवैद्यवचनकुतूहलात् वह्नौ निक्षिप्त मदग्धं, वारिणि प्रवेशितमक्लिशितं टङ्कदारितमप्यदीर्णं मद्य-विन्दुनाऽपि विलीनं दृष्ट्वा सर्व्वे साश्चर्य्या वभूवुः ।

राजा । भो वैद्य, कीदृशस्ते शास्त्रनिश्चयः । यतस्त्वया मद्य-पानमपन्यस्तं । व्याधिस्तु मद्यगन्धेनैव निराकृतोऽभूत् ।

विना मदिरापानप्रसङ्गेनाऽन्तःपातेन स्यात् मदिरागन्धग्रहणे ततोऽनया पानमुपन्यस्तं ।

राजा । साधु वैद्य साधु ।

सभासदः । देव साधूक्तं हरिश्चन्द्रवराहाभ्याम्, तदुभयमप्यनुभवसाक्षिकं जातं । शवरस्वामिना च सुरमञ्जरीरचित पुष्पवृष्टिसाक्षिकमेव साधूक्तम् । ततः स्व-स्व-शास्त्र सिद्धान्तविद एवाऽमी त्रयः । तथाहि—

धन्यस्त्वं नृपतिर्धरा भगवती धन्यैव धन्या पुरी ।
धन्यैः सर्वगुणान्वितैः सुकृतिभि र्दृष्टा तवेयं सभा ।
यत्रैषज्यवुधो [illegible] ।
यत्रैव भिषगेष यज्ञगणको यत्रैष मीमांसकः ॥

ततो राज्ञा जाताहङ्कारपुलकेन परमोत्साहचेतसा त्रयोऽपि शास्त्रविदः काञ्चनैः करिभिस्तुरङ्गैर्वासोभिः पूजितास्तस्य स्वायत्तसिद्धेर्नृपस्योपकरणानि बभूवुः । स ब्राह्मणोऽप्युल्लसितः सुवर्णैरदरिद्रीकृतो गृहं प्रहितः ।

इति शास्त्रविद्या कथा

समाप्ता ।

अथ वेदविद्या कथा

अभूदवन्ती नाम नगरी तस्यां प्रियशृङ्गारोनाम राजा बभूव। स चैकदा प्रासादशिखरमारूढस्तन्नगरवासिनः प्रचुरधननाम्नो वणिजः पुत्रीं मालतीनाम्नीं सरसि कृतस्नानां गच्छन्तीं ददर्श। तस्याः सौन्दर्य्यमवलोक्य मदनशरव्यापारभृत् चकमे। यदियं मृगाक्षी परिवृतत्र कथमवलोकयतु। श्लोको यथा—

नृतयाङ्गुलतमुन्नतस्मितसुरीकुर्व्वत्तदपः विभ्रमं।
नेलोपान्तमितान्तकान्त दवल स्वामच्च वासभ्रुवः।
एतस्या वदनं विभाति वलितग्रीवं समालोकितं
स्वाराज्य च कियत् कियतरमरता किं राज्यमम्भोनिधेः॥

ततस्तेन राज्ञा वणिग्वधूं प्रति दूतीप्रहिता।

दूती। अयि मालति महत् पुण्यं तवाकर्णयामि यतोऽसौ-राजा सुन्दरीशतसेव्यमानोऽपि त्वयि साभिलाषोवर्त्तते, तदागत्य क्षणमात्रं तस्य राज्ञः कामनां पूरयित्वा निजसौन्दर्य्यं तारुण्यञ्च सफलय, कनकरत्नादिभिः कृतार्था च भव।

मालती। दूति पुनरेवं न वक्ष्यसि यतोऽहं शुद्धकुलजाता साध्वी च भवामि। स्वपतिव्यतिरिक्ते पुरुषे वाञ्छापि न साध्वी-धर्म्मः। यतः—

सुन्दरोरूपहीनो वा दरिद्रोवाऽथ भूपतिः।
पतिरेव प्रियस्तासां पितरश्चेतरे नराः॥

सूयेते पितरौ सर्व्वी राजा पुष्णाति च प्रजा: ।
पित्रोरप्यधिकं पूज्य: प्रजानां पृथिवीपति: ॥

दूती । अयि सुभाषिणि ! स्वामी तव देशान्तरे, स्वपितृमन्दिरस्था वृथा यौवनं नयन्ती राजान मपि साभिलाषमुपेक्षसे । कस्तवाऽयं दुर्ग्रहः । तथाहि—

नि:शङ्कं नयनाञ्चलेन चलता कर्णान्तमासाद्यते ।
स्मेराम्भोजमुखि क्रमेण गुरुतां धत्ते नितम्बस्तव ।
उत्तुङ्गौ च कुचौ परस्परमिमौ सीमानमाक्रामत
श्चेदद्यापि कुलव्रते न विरतिर्व्यर्थस्तवोपक्रम: ।

कथं वा सतीत्वं पालयितुं शक्ष्यसि ?
उद्धतारुण्यमहोत्सवेषु
स्त्रियो न कामव्यसनं सहन्ते ।
विशिष्य यस्या: पतिरस्तिदूरे
सालङ्गना किं कुरुतां वराकी ॥

त्वमिदानीं पतिविरहव्याघ्र कवलिता कुरङ्गीव किमन्यत् करिष्यसि ? निश्चितं पञ्चशरबाणनिर्भिन्नहृदया कमप्यनुसरिष्यसि, तद्राजानमेवानुसर ।

मालती । अयि दूति पुनरेवं न वक्तव्यं । यत:—

सती सहस्रेषु कदापि शूरीलक्षेषु मध्ये घटते वदान्य: ।
नि:सङ्गविश्रम्भविशेषपात्रं सुहृच्च कोटिष्वपि दुर्लभोऽस्ति ॥

पातञ्जलयोगसूत्रम् ।

सर्व्वज्ञतातृप्तिरनादिबोधः स्वतन्त्रतानित्यमलुप्तशक्तिः अनन्तशक्तिश्च विभोर्विधिज्ञाः षड़ाहुरङ्गानि महेश्वरस्य ।

ज्ञानवैराग्यमैश्वर्य्यं तपःसत्यं क्षमा धृतिः अष्टृत्वमात्मसंयोगोह्यधिष्ठातृत्वमेवच अव्ययानि दशैतानि नित्यं तिष्ठति शङ्कर इति। तथा महाभारते अनादि निधनं विष्णुं सर्व्वलोकमहेश्वरं लोकाध्यक्षं स्तुवन्नित्यं सर्व्वदुःखातिगोभवेत् ।

स एष पूर्व्वेषामपि गुरुः कालेनानवच्छेदात् । २६ ।

पदच्छेदः । सः, एष, पूर्व्वेषां अपि गुरुः, कालेन, अनवच्छेदात् ।

पदार्थः । स पूर्व्वोक्तः, एष ईश्वरः पूर्व्वेषां पूर्व्ववर्त्तिनां सर्गाद्युत्पन्नानां अपि ब्रह्मादिपुरुषविशेषाणां गुरुः । अन्तर्य्यामी विद्यया ज्ञानबद्धःप्रदश्च उपदेष्टा, कालेन समयेन न अवच्छिद्यते इत्यनवच्छेदः तस्मात् अनादित्वादित्यर्थः ।

अन्वयः । कालेन अनवच्छेदात् स पूर्व्वेषामपि गुरुर्भवतीतिशेषः ।

भावार्थः । स कालातीतः अनादिस्ततश्च सृष्टेरादौ उत्पन्नानां ब्रह्मादीनां देवानामपीश्वर उपदेष्टा तादृशं कालानवच्छिन्नं गुरुत्वं ब्रह्मादीनां कालत्वाभावादसम्भव इति भावः । क्वचित् सूत्रे स एष इति पाठोनास्ति ।

As time can not describe him. He is the Preceptor even of the ancients.

वृत्तिः । पूर्व्वेषां सर्गादौ उत्पन्नानां कालपरिच्छिन्नानामादरएष ईश्वरः कुतः कालेनावच्छेदात् अनादत्वानान्तत्वादितार्थः तथा च श्रुतिः

तस्य वाचकः प्रणवः । २७ ॥

पदच्छेदः । स्पष्टं ।

पदार्थः । तस्य ईश्वरस्य, वाचकः अभिधायकः, प्रणवः प्रकर्षेण नूयते स्तूयतेऽनेनेति प्रणवः ओङ्कारः ।

अन्वयः । प्रणवः तस्य वाचकोभवतीति शेषः ।

भावार्थः । ईश्वरस्य वाचकः, प्रणवः, प्रणवस्य तु वाच्य ईश्वरः। तयोश्च वाच्यवाचकभावलक्षणसम्बन्धो नित्यसङ्केतेन प्रकाश्यते, न तु केनचित् क्रियते । यथा पितृपुत्रयोर्विद्यमानः सम्बन्धोऽस्यायं पिता, अस्यायं पुत्र इति केनचित् प्रकाश्यते । अतएवाह योगियाज्ञवल्क्यः—

"अदृष्टविग्रहोदेवो भावग्राह्यो मनोमयः ।

तस्योङ्कारः स्मृतोनाम तेनाहूतः प्रसीदति ॥"

अदृष्टविग्रहोऽदृष्टशरीरोदेवः परमात्मा, भावग्राह्यो भक्तिमात्र ग्राह्यो, मनोमयमनस्तुल्य कारणोपाधिमत्वात्, तस्य नाम ओङ्कारः स्मृत, ओङ्कारेण सह तस्य वाच्यवाचकभावो नित्य इत्यर्थः, तेन ओङ्कारेण आहूतः सन् प्रसीदति कर्त्तव्यविचारोपयोगिनमर्थं पूरयतीत्यर्थः ।

He is named by Om.

वृत्तिः । सुगमं सूत्रं, ननु शब्दस्य वाचकत्वं अभिधाख्याशक्तिः शब्दार्थयोः सबंध इत्युच्यते सा किं संकेतेन क्रियते व्यज्यते वा, नाद्यः प्रतिकल्पं स्वतंत्रेश्वरसंकेतभेदेन शब्दार्थावस्थाप्रसंगात्, न द्वितीयः सूर्यादिशब्दानां पुत्रेषु पित्रा संकेतवैफल्यापातात् नहि तत्र संकेतव्यंग्या शक्तिरस्ति न चासति व्यंग्ये व्यंजकमर्थवत् तस्मादिदं संकेतसूत्रार्थमिति चेदुच्यते स्थितैव शक्तिः संकेतेन व्यज्यते सम्पाक्रिय[illegible]

प्रधानसाम्यं गतेषु सर्गादौ पुनः शक्त्या सहोद्भूतेषु स्थितामेव तत्त च्छब्दस्य तत् तदर्थे शक्तिमीश्वरः संकेतेन ज्ञापयति जीवानां लुप्तसं-स्कारत्वात् अधुनातन पित्रादि संकेतस्तु शक्तिरुत्पादः केचित्तु सर्व श-ब्दानां सर्वार्थेषु शक्तिरस्तीति पित्रादि संकेतोपिवाऽयं गवादिश-ब्दानां तु वेदार्थ व्यवस्थार्थं ईश्वरसंकेतेनाविशेषे शक्तिर्नियम्यत इत्याहुः सर्वथापि वैदिकशब्दार्थ संबंधोव्यवस्थितव्यवहारतयानित्य इति सिद्धं एवं वाचकमुक्त्वा प्रणिधानमाह ।

तज्जपस्तदर्थभावनम् । २८ ॥

पदच्छेदः । तत्-जपः तत्-अर्थ-भावनम् ।

पदार्थः । तस्य सार्द्धत्रिमात्रस्य प्रणवस्य 'जपः, यथावदुच्चारणं, तद्वाच्यस्येश्वरस्य 'भावनं' पुनःपुनश्चेतसि विनिवेशनम् ।

अन्वयः । स्पष्टम् ।

भावार्थः । ईश्वरप्रणिधानाद्वेति सूत्रेन समाधिसिद्धौ यो द्वितीय उपाय उक्तः, इदानीं तमेवोपायं विवृणोति-तज्जप इति प्रणिधानं नाम ईश्वरभावनं तद्धि ओङ्कारस्य यथावदुच्चारणात् नान्यत् । अतएव समाधिसिद्धये योगिना प्रणवो जप्यः, तदर्थश्च भावनीयः । तथा चोक्तं—स्वाध्ययाद्योगमासीत योगात् स्वाध्यायमामनेत् । स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ।

अस्यार्थः । स्वाध्यायात् प्रणवार्थभावनात् योगं आसीत प्राप्नुयात् प्रणवार्थभावनाच्चित्तस्यैकाग्रतासम्पत्त्या योगस्य सिद्धि-र्भवति, तथा योगादपि स्वाध्यायं आमनेत् योगस्य सिद्धावपि प्रणवार्थं चिन्तयेदेव । यतः स्वाध्यायस्य योगस्य च सम्पत्त्या सम्मेलनेन परमात्मा परं ब्रह्म प्रकाशते ज्ञातो भवतीत्यर्थः ।

ध्येयस्य ईश्वरस्य भावनं तदस्य योगिनः प्रणवं जपतः प्रणवार्थञ्च भावयतश्चित्तमेकाग्रं संपद्यते तथाचोक्तं "स्वाध्यायाद्योग मासाद्य योगात् स्वाध्यायमामनेत्। स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते" इति। तस्येश्वरप्रणिधानस्यानन्तरः समाधिलाभः फलमिति पूर्व्वमुक्तमधुना फलान्तरमपि तदनुगुणमाह।

ततः प्रत्यक् चेतनाधिगमोऽप्यन्तरायाभावश्च। २९ ॥

पदच्छेदः। ततः, प्रत्यक् चेतना, अधिगमः, अपि, अन्तराय-अभावः, च।

पदार्थः। ततः तस्मात् जपात्, तदर्थभावनात् च, प्रत्यक् चेतनाधिगमः प्रति अञ्चति विषयप्रातिकूल्ये स्वान्तःकरणाभिमुखं गच्छतीति प्रत्यक् तादृशी या चेतना दृक्शक्तिः जीवः तस्या अधि-गमः ज्ञानं अन्तरायाः वक्ष्यमाणाः व्याधिप्रभृतयः समाधिसिद्धौ प्रतिबन्धकीभूताः तेषां अभावः शक्तिप्रतिबन्धः, चकार समुच्चयार्थः।

अन्वयः। ततः प्रत्यक् चेतनाधिगमो भवति अन्तरायाभावश्च भवति।

भावार्थः। तत ईश्वरप्रणिधानात् तद्दृष्टान्तेन जीवात्मज्ञानं विषयत्यागशक्तिश्च चेतसि जायेते। ततश्चात्मेश्वरसाक्षात्कारो भवति। तेन साक्षात्कारेण चित्तैकाग्रता, तया असंप्रज्ञातसिद्धिः। वक्ष्यमाणानां व्याधिप्रभृतीनामन्तरायाणां हानिश्च भवति।

From that the human spirit knows itself and all obstacles disappear.

वृत्तिः। प्रतीपं विपरीतमञ्चति जानातीति प्रत्यक् भ्रान्त इत्यर्थः। अनेनैव

कलियुगस्य माहात्म्यं ।

वृहन्नारदीयपुराणादुद्धृतम् ।

A

View of the present Iron age

or

Kaliyuga

The following is an extract from the Vrihannaradiya purana. It is indeed a most wonderful to see that what the ancients Rishis have foretold atleast a thousend years before is now to be seen correct in every better.

We shall quote extracts on the same from other Puranas too and then give a general purport of them in to english.

ऋषय ऊचुः ।

युगधर्म्माः समाख्याताः त्वया संक्षेपतो मुने ।
कलिं विस्तरतो ब्रूहि त्वं हि वेदविदां वरः ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च मुनिसत्तम ।
किमाहाराः किमाचारा भविष्यन्ति वदस्व नः ॥

सूत उवाच ।

शृणुध्वं मुनयः सर्व्वे नारदेन महात्मना ।
सनत्कुमारमुनये कथितं वदामि तत् ॥
सर्व्वे धर्म्मा विनश्यन्ति क्षणे क्षणात्वमागते ।
तस्मात्कलिर्महाघोरः सर्व्वपापस्य साधकः ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा धर्म्मपराङ्मुखाः ।
घोरे कलियुगे प्राप्ते द्विजा वेदपराङ्मुखाः ॥

अतः स्वल्पायुषः सर्व्वे भविष्यन्ति कलौ युगे।
अल्पायुष्ट्वात् मनुष्याणां न वेदग्रहणं द्विजाः॥
विद्याग्रहणशून्यत्वादधर्म्मो वर्त्तते पुनः।
व्युत्क्रमेण प्रजाः सर्व्वा म्रियन्ते पापतत्पराः।
कामक्रोधपरा मूढ़ा वृथाऽहङ्कारपीड़िताः॥
बद्धवैरा भविष्यन्ति परस्य धनलिप्सवः।
ब्राह्मणाः क्षत्रिया वैश्याः सर्व्वे धर्म्मपराङ्मुखाः॥
अल्पार्थाश्च भविष्यन्ति तपःसत्यविवर्ज्जिताः।
सर्व्वे जना दयाहीना दाक्षिण्यपरिवर्ज्जिताः॥
उत्तमा नीचतां यान्ति नीचाश्चोत्तमतां तथा।
राजानश्चार्थनिरतास्तथा लोभपरायणाः॥
धर्म्मकञ्चुकसंवीता धर्म्मविध्वंसकारिणः।
अस्मिन् कलियुगे घोरे सर्व्वाधर्म्मसमन्विते॥
यो यो रथाश्वनागाढ्यः स स राजा भविष्यति।
किङ्कराश्च भविष्यन्ति शूद्राणाञ्च द्विजातयः॥
धर्म्मस्त्रियं न गच्छन्ति पतयो जारलक्षणाः।
द्विषन्ति पितरं पुत्रा गुरुं शिष्या द्विषन्ति च॥
पतिञ्च वनिता द्वेष्टि क्षणे क्षणत्वमागते।
लोभाभिभूतमनसः सर्व्वे दुष्कर्म्मशीलिनः॥
परान्नलोलुपा नित्यं भविष्यन्ति द्विजातयः।
परस्त्रीनिरताः सर्व्वे परद्रव्यपरायणाः॥
मत्स्यामिषेण जीवन्ति दुहन्ति चाप्यजाविकाः।
घोरे कलियुगे प्राप्ते नरं धर्म्मपरायणम्।
असूयानिरताः सर्व्वे उपहासं प्रकुर्व्वते॥
सरित्तीरे [illegible]

वेश्यालावण्यशीलेषु स्पृहां कुर्व्वन्ति योषितः ।
धर्म्मविघ्ना भविष्यन्ति स्त्रियः स्वपुरुषेषु च ॥
प्रायशः कृपणानाञ्च वधूनाञ्च तथा द्विजाः ।
साधूनां विधवानाञ्च वित्तान्यपहरन्ति च ॥
न व्रतानि चरिष्यन्ति ब्राह्मणा वेदनिन्दकाः ।
न यक्ष्यन्ति न होष्यन्ति हेतुवादैर्विनाशिताः ॥
द्विजाः कुर्व्वन्ति दम्भार्थं पितृयज्ञादिकाः क्रियाः ।
अपात्रेषु च दानानि कुर्व्वन्ति च तथा नराः ॥
चौरोपायविनिर्म्मितेन चौर्य्ये प्रीतिञ्च कुर्व्वते ॥
न कुर्व्वन्ति तथा विप्राः स्नानशौचादिकाः क्रियाः ।
अकालधर्म्मनिरताः कूटयुक्तिविशारदाः ॥
देवनिन्दापराश्चैव विप्रनिन्दारतास्तथा ।
देवपूजापरान् दृष्ट्वा उपहासं प्रकुर्व्वते ॥
बध्नन्ति च द्विजानेव धनार्थं राजकिङ्कराः ।
ताड़यन्ति च विप्रेन्द्राः क्षणे क्षणमागते ॥
दानयज्ञजपादीनां विक्रीणन्ति फलं द्विजाः ।
प्रतिग्रहं प्रकुर्व्वन्ति चाण्डालादेरपि द्विजाः ॥
कलेः प्रथमपादेऽपि विनिन्दन्ति हरिन्नराः ।
युगान्तेऽपि हरेर्नाम नैव कश्चित् स्मरिष्यति ॥
शूद्रस्त्रीसङ्गनिरता विधवासङ्गलोलुपाः ।
शूद्रान्नभोगनिरता भविष्यन्ति कलौ द्विजाः ॥
कुहकैरक्षरैस्तत्र हेतुवादविशारदैः ।
पाषण्डिनो भविष्यन्ति चातुराश्रम्यनिन्दकाः ॥
न च द्विजातिशुश्रूषां न स्वधर्म्मप्रवर्त्तनम् ।

अशौचयुक्तमतयः परपक्वान्नभोजिनः ॥
भविष्यन्ति दुरात्मानः शूद्राः प्रव्रजितास्तथा ।
उत्कोचजीविनस्तत्र महापापरतास्तथा ॥
भविष्यन्त्यथ पाषण्डा कापाला भिक्षवस्तथा ।
धर्म्मविध्वंसशीलानां द्विजानां विप्रसत्तमाः ॥
ब्राह्मणाः क्षत्रिया वैश्या भविष्यन्ति कलौ युगे ।
गीतवाद्यपरा विप्रा वेददेवपराङ्मुखाः ॥
भविष्यन्ति कलौ विप्राः शूद्रमार्गप्रवर्त्तिनः ।
अल्पद्रव्या वृथालिङ्गा वृथाऽहङ्कारदूषिताः ॥
हर्त्तारो न च दातारो भविष्यन्ति कलौ युगे ।
प्रतिग्रहपरा नित्यं जगदुन्मार्गशीलिनः ।
आत्मस्तुतिपराः सर्व्वे परनिन्दा परास्तथा ॥
विश्वासहीनापिशुना वेददेवद्विजातिषु ।
असंस्कृतोक्तिनिरता वहुद्वेषरतास्तथा ॥
परमायुश्च भविता तदा वर्षाणि षोड़श ।
ततः प्राणाः प्रयास्यन्ति क्षणे क्षणमागते ॥
पञ्चमे वाऽथ षष्ठे वा वर्षे कन्या प्रसूयते ।
सप्तवर्षाष्टवर्षाश्च प्रवास्यन्ति नरास्तथा ॥
स्वकर्मतरागिनः सर्व्वे कृतघ्नाभिन्नवृत्तयः ।
याचकाः पिशुनाश्चैव भविष्यन्ति कलौ युगे ॥
परापमाननिरता आत्मस्तुति परायणाः ।
परस्वहरणोपायचिन्तकाः सर्व्वदा जनाः ॥
अतएवाह्लाद परास्तत्र भुञ्जते परवेश्मनि ।
तथैव निन्दानिरता वृथाभिशस्तिनो जनाः ॥
निन्दां कुर्व्वन्ति सततं पितृ मातृ सुतेषु च ।
वदन्ति वाह्यधर्म्मांश्च चेतसपापलोलपाः ॥

तर्कसंग्रहवाक्यार्थः ।

महामहोपाध्यायश्रीमदन्नंभट्टविरचितोऽसौ तर्कशास्त्रप्रविविक्षु-विद्यार्थिगणोपकारी तर्कसंग्रहाभिधोग्रन्थः सुप्रसिद्धएव सर्व्वत्रा-स्मिन् भारतवर्षे । मुद्रितश्चायं बहुशोबहुभिर्बहुप्रकारै र्व्याख्यानैः । अवलोकितानि प्रायशानि सर्व्वाण्येव पुस्तकान्यस्माभिः । परं तर्कसंग्रहवाक्यार्थोऽयमभिनवइव दृश्यते, एतन्निर्म्माता श्रीमत्-पट्टाभिरामः ।

ग्रन्थावसाने चानेनैवमात्मपरिचयः प्रदत्तः—श्रीमद्रविवनीपाग्र गोविन्दार्य्यतनूभुवा । मध्येन संग्रहीतेयं संग्रहार्थविवेचनी । पट्टाभिरामविदुषां कृतिरेषा विशेषत । शिष्यशायिमनस्तोषं पुष्णातु नितरां सदा । इति—

ग्रन्थोऽयं साम्प्रतमस्मदनुकूलेन श्रीमज्जगद्गुरुशृङ्गेरीशङ्करा-चार्य्यसंस्कृतपाठशालाव्यावस्थापकेन पाठकोपनामधारिणा गुरु-नाथशर्म्मणा धारवाड़वृत्तमुद्रालये शालिवाहनशके १८१० सुस्पष्टाक्षरैः पदच्छेदविभक्त्या स्पष्टीकृत्य सम्यक् परिशोध्य च समु-ज्ज्वलधवलेषु घनेषु च पत्रेषु मुद्रितः प्रकाशितश्च । ग्रन्थोऽयं संस्कृत तर्कशास्त्रप्रविविक्षूणां महोपकारं साधयिष्यतीत्यत्र न कोऽपि सन्देहः । विद्यार्थिनां बोधसौकर्य्यार्थं मूलग्रन्थोऽपि पृथङ्मुद्रितः ।

अथेदानीं ग्रन्थस्य परिचयमादित्सवो वयं प्रथमं मूलात् किञ्चि दुद्धृत्य तदधोवाक्यार्थसंग्रहमुद्धराम ।

तथाच—मूलम्—

निधाय हृदि विश्वेशं विधाय गुरुवन्दनं बालानां सुखबोधाय

निधायेति—हृत्पदं मनः परं जन्यत्वं सप्तम्यर्थः अन्वयश्चास्य निधाने निधानं ज्ञानविशेषः। विश्वेशमितिद्वितीयार्थोविषयत्वं। तथाच विश्वेशविषयकमनोजन्यज्ञानविशेषोत्तरकालीनाकृतिरिति केचित् तन्न, ज्ञानमात्रस्य मनोजन्यत्वाद्र्थकस्य हृदोत्यस्याव्यावर्त्तकतापत्तेः। किंतु हृत्पदं हृदयरूपशरीरावयवविशेषपरं। निधानं धात्वर्थः। तच्चावस्थापनं अवस्थितत्वारोपणम्। तथाचावस्थितत्वप्रकारकाहार्य्यज्ञानोत्तरकालीना या कृतिरित्यन्वयबोधः। हृदीत्यत्र सप्तम्यर्थोनिरूपितत्वं। तस्यावस्थितत्वेऽन्वयः। विश्वेशमित्यत्र द्वितीयार्थोविशेष्यत्वं। तथाच विश्वेशविशेष्यकहृदयनिरूपितवृत्तित्वप्रकारकाहार्य्यज्ञानोत्तरकालीना या कृतिरित्यन्वयः। द्रव्येत्यादि। सप्त सप्तविधाः सप्तप्रकारवंत इति यावत्। द्रव्यादिपदं द्रव्यत्वादिपरं तस्याभेदसंबंधेन प्रकारेऽन्वयः। नच सप्तप्रकारवत्वं कुत्रेति वाच्यं। सप्तपदे सप्त प्रकारान्यतमवति लक्षणास्वीकारात्। ननु तथापि द्रव्यत्वाद्यभेदः कस्मिन् प्रकारे न च द्रव्यादिपदे द्रव्यत्वाद्यन्यतमे लक्षणास्वीकारानुपपत्तिरिति वाच्यं। विनिगमनाविरहेण द्रव्यादिपदानां लक्षणाकल्पनापत्त्या द्रव्यत्वाद्यन्यतमत्वावच्छिन्नस्य सप्तवारं भानापत्तेरिति चेन्न। समासघटकपूर्व्वपदार्थस्य समासाघटकपदार्थे नान्वयासंभवेनाभावपदस्यैव द्रव्यत्वाद्यन्यतमत्वावच्छिन्ने लक्षणास्वीकारात्। इत्थं च सप्तपदलक्ष्यार्थे नानातमगर्भताप्रयोजनाभावात्। न च सप्तप्रकारवत्त्वं कुत्रेति वाच्यं सप्तत्वपर्य्याप्त्यधिकरणप्रकारवत्वस्याविवक्षितत्वात् सप्तत्वाश्रयप्रकारस्यैव विवक्षणात्सप्तत्वं च प्रातीतिकस्वरूपसंबंधविशेषोऽपेक्षाबुद्धिविशेषविषयत्वं वा। अन्यत् सर्व्वं स्पष्टम् सा द्विविधेत्यत्र वक्ष्यमाणरीत्या वक्तव्यमिति सुंदरः पंथाः। अन्ये त

त्वं च पदार्थत्वव्यापकं द्रव्याद्यन्यतमत्वकत्वं अतएव तदुद्देश्यविधेय-भाव महिम्नैव लभ्यमिति सप्तपदं व्यर्थमित्यामनंति ग्रंथकृतः परं तूद्दे-श्यविधेयभावमहिम्ना व्यापकत्वभानस्यौत्सर्गिकतया न पौनरुक्त्यं स्पष्टार्थत्वमेव तस्येति बहवः, तथाच द्रव्याद्यन्यतमाभिन्नाः पदार्थाः यथोक्तसप्तत्ववंत इत्यन्वयबोधइत्याहुः अपरे तु अभावपदं द्रव्यत्वाद्य-न्यतमपरं अन्यतमावच्छिन्ने सप्तपदार्थस्याभेदसंबंधेनान्वयोव्युत्प त्तिवैचित्र्यात्। तथा च पदार्थाः सप्तत्वाश्रययथोक्तान्यतमवंत इत्यन्वयः। पदार्थेषु सप्तत्वस्यान्वयो न स भवति कोटिकोटि पदार्थानां सत्वात्। नच पर्य्याप्तिसंबंधेन सप्तत्वविशिष्टं यदन्यत-तमं तद्वत्वं कुत्रापि पदार्थे न संभवतीति सप्तत्वाश्रयस्यैव सप्त-पदार्थतया वाच्यतया तस्य पदार्थेन्वयः संभवतीति वाच्यं। सप्तत्वाश्रयस्यैव पदार्थेन्वये उद्देश्यासिद्धेरव्यावर्त्तकत्वात्। न चान्यत-तमे सप्तत्वाश्रयस्यान्वयेऽपि तद्दोषतादवस्थ्यमिति वाच्यं। अन्यत-मत्वावच्छिन्ने सप्तत्वपर्य्याप्त्यधिकरणस्यैवान्वयात्। न च सप्तत्वपर्य्या-प्त्यधिकरणत्वविशिष्टान्यतमाधिकरणत्वं न कुत्रापीत्युक्तमिति वाच्यं। सप्तत्वपर्य्याप्त्यधिकरणस्यान्यतमे विशेषणत्वेनान्वयास्वी-कारात् किंतूपलक्षणतया तथा च वस्तुगत्या सप्तत्वपर्य्याप्त्यधि-करणं यदन्यतमं तद्वंत इत्यर्थः विशेषणपुच्छलग्नस्याप्युपलक्षण-त्वस्वीकारात् किं तूपलक्षणपुच्छलग्नस्य विशेषणत्वं न स्वीक्रियत इत्याहुः।

हाम्लेट्-चरितं ।

समं समस्तैर्नियमानुबन्धै
र्दिदेश प्रतर्पयितुं स भूमीः ।
अस्मान् स्व—पित्रा युधि याः पुरासन्
समर्पिताः स्वैर्वसुभिश्च तुल्यम्
तस्मै प्रवीराय मदग्रजाय ;
एतावदस्याऽस्त्वथ चिन्तयाम
स्तमर्थ मेषा समितिश्च यस्मात् ।
कार्य्यं पुरस्तात् करणीयमेतत् ।
अस्तारस्य फर्टिन्ब्रसनामकस्य
पितुः कनीयान् य इह प्रशास्ति
नर्वे प्रदेशं ननु यश्च रोगात्
प्रतरस्तशक्तिः क्षणमेव तल्पं
शक्तो न हातुं, नहि जातु तस्मात्
श्रोष्यत्यदोमन्त्रणमस्य यूनः
स्व—भ्रातृपुत्रस्य, ततोद्य तस्मै
लेख्यं प्रयत्नात् पुरतस्त्वमुष्मात्
युवानमेनं परिरोद्धुमेव ।
यदेतदर्थं खलु ते प्रजाभ्यः
समागृहीता अपि साररूपाः,
तामेव कर्णीलियसाऽत्र कार्य्ये
त्वां भल्टिमण्डाभिधमेव चादत्र
संप्रेषयामस्तमनु प्रहृष्ट

पालिध्वजशब्दस्यार्थः ।

The Explanation of the term Palidhwaja

स्रग्वस्त्र सहयानाब्जहंसवीनमृगेशिनां ।
वृषभेभेन्द्र चक्राणां ध्वजाः स्यु र्दशभेदकाः ॥
अष्टोत्तरशतं ज्ञेयाः प्रत्येकं पालिकेतनाः ।
एकैकस्यां दिशि प्रोच्चास्तरंगास्तोयधेरिव ॥
पवनान्दोलितस्तेषां केतूनामंशुकोत्करः ।
व्याजुहूषुरिवाभासीज्जिनेज्यायै नरामरान् ॥
स्रग्ध्वजेषु स्रजोदिव्याः सौमनस्या ललंबिरे ।
भव्यानां सौमनस्याय कल्पितास्त्रिदिवाधिपैः ॥
सूक्ष्मांशुकध्वजा रेजुः पवनान्दोलितोत्थिताः ।
व्योमाम्बुधेरिवोद्भूतास्तरंगास्तुंग मूर्त्तयः ।
वर्हिध्वजेषु वर्हालीं लोलयोत्क्षिप्य वर्हिणः ॥
रेजुर्गांशुकाः सर्प्पवुद्धैरव लक्षकत्तयः ।
पद्मध्वजेषु पद्मानि सहस्रदलसंस्तरैः ।
नभस्सरसि फुल्लानि सरोजानीव रेजिरे ।
अधः प्रतिमया तानि संक्रान्तानि महीतले ॥
भ्रमरान्मोहयन्तिस्म पद्मवुद्ध्यानुपातिनः ।

हंसध्वजेष्वभुर्हंसाश्चञ्चूत्क्षिप्तवाससः ।
निजां प्रसारयन्तो वा द्रव्यलेश्यां तदात्मना ।
गरुत्मद्ध्वजदंडाग्राण्यध्यासीना विनायकाः ॥
रेजुः स्वैः पक्षविक्षेपैर्लिलंघयिषयोन्मुखम् ।
वभुर्नीलमणिच्छायास्था गरुड़ाः प्रतिमागताः ॥
समाक्रष्टुमिवाहीन्द्रान् प्रविशन्तोरसातलम् ।
मृगेन्द्र केतनाग्रेषु मृगेन्द्राः क्रमधित्सया ॥
कृतयत्ना विरेजुस्ते जेतुं वा तरसा गजान् ।
स्थूलमुक्ताफलान्येषां मुखलंबीनि रेजिरे ॥
गजेन्द्रकुम्भसंभेदात् सञ्चितानि यशांसि वा ।
उच्चाः शृङ्गाग्रसंसक्तलंवमानध्वजांशुकाः ॥
रेजुर्विपक्षजिलेव संलब्धजयकेतनाः ।
उत्पुष्करैः करैरूढ़ध्वजा रेजुर्गजाधिपाः ॥
गिरीन्द्राइव कूटाग्रनिपतत् पृथुनिर्झराः ।
चक्रध्वजाः सहस्रारैश्चक्रैरुत्सर्पदंशुभिः ॥
वभुर्भानुमता सार्द्धं स्पर्द्धां कर्त्तुमिवोद्यताः ।
नभः परिसृजन्तो वाश्लिष्यन्तोवा दिगंगनाः ॥
भुवमास्फालयन्तोवा स्फुर्जन्तिस्म महाध्वजाः ।
इत्यमी केतवोमोह निर्ज्जयोपार्ज्जिता वभुः ।
विभोस्त्रिभुवनेशत्वं शसंतोऽनन्यगोचरः ।
दिश्येकस्यां ध्वजाः सर्व्वे सहस्रं स्यादशीतियुक्

दशकुमारकथासारः ।

तदादाय वने भूयोव्रजन्मध्यन्दिने सति ।
आतपोद्विजितोविप्रः श्रोत्रियोमामयाचत ॥
अकिञ्चनाय यत्किञ्चिद्देहि क्षुत्पीड़िताय मे ।
तत्क्षणादर्थमानीय तद्रत्नमददामहं ॥
तत् समादाय बहुधा दत्ताशोर्ब्राह्मणोऽब्रजत् ।
गते मुहुर्त्ते वृद्धः सन् स एवानीय काञ्चनं ।
तत्रस्थ एव मां सोपि किंकारणमदर्शयत् ॥
रत्नं ग्रहीष्व मे तेन विस्तीर्णं रत्नमन्यथा ।
नापराद्धं मया किञ्चिदित्यवादीच्च स द्विजः ॥
ततः क्रूराश्च ते विप्रमुक्त्वा मां मणिना सह ।
रत्नं दर्शय वित्तञ्चे तात्रु वंस्तांस्तथाभ्यधां ।
राजवाञ्छनभृतोहं तमन्वेष्टुमितस्ततः ।
भ्रमन् पथि तदद्राक्षं रत्नं रम्यतरं लहं ।
तच्चास्मै याचमानाय ब्राह्मणाय समर्पितं ॥
इत्युक्ता कुपितास्तेऽमी निन्युः कारागृहेऽखिलाः ।
यूयं शृङ्खलिताः केन हेतुनेति मया भृशं ।
तत्र कारागृहे पृष्टाः केप्यवोचन् सशृङ्खलाः ।
लाटेशो मत्तकालोऽस्मत्स्वामिना वीरकेतुना ॥
विगृह्णन् सेनयाभ्येत्य पाटलीपुरमावृणोत् ।
वीरकेतुर्भिया तस्य स्वकन्यां वामलोचनां ॥
मन्त्रिणं मानपालञ्च ससैन्यमुपधां व्यधात् ।

पृथङ्निवेशयन्नेष मत्तकालः सुरक्षितां ।
गच्छन् विन्ध्याचलप्रान्ते पञ्चमेषु दिनेष्वपि ॥
मत्तकालः प्रमत्तः सन् मृगयायां भ्रमत्ययं ।
वयं निर्ध्यातयिष्यामः स्वामिनोनः पराजयं ॥
इति संमन्त्र्य तं शत्रुं निहन्तुं समुपागताः ।
सुरङ्गया वयं यावत् प्राप्तास्तच्छयनं निशि ॥
तावदेव मृगव्याय मत्तकालोविनिर्गतः ।
वयञ्चादाय तच्छय्यां निवासभूषणावलिं ।
निर्गताः सत्वरं दुर्गं व्यगाहिष्महि दुर्गमं ।
अनुधावन्तएवास्य रक्षिणो अवरूध्य नः ॥
अग्टह्णीषुर्विभूषाणां जालं हस्तगतं च्छलात् ॥
रत्नं महार्हमस्यैकं नास्तीतस्मान् सशृङ्खलान् ।
अकार्षुस्ते वयं तच्च न विद्मः पतितं क्वचित् ॥
तच्च रत्नं गृहीत्वैकं चौराम्मारयतेतरयं ।
राजाप्याज्ञाकरान् पश्चर्चरानाज्ञापयत् किल ॥
इतराकर्ण्य निशीथे हि मम तेषाञ्च शृङ्खलं ।
विभज्य तैश्च नीतः सन् मानपालमुपासरं ॥
मानपालोनिरीक्ष्यैतान् मां चैव तैः प्रदर्शितं ।
शौर्य्यं च मामकं ज्ञात्वा सादरं मामुपाचरत् ।
प्रतप्रषे मत्तकालेन प्रेषिताः प्रेषिता द्रुतं ॥
मानपालं समासाद्य भर्तुः सन्देशमब्रुवन् ।
विभज्य शृङ्खलां चौराभवदन्तिकमागमन् ॥
ततश्च बन्धने तांश्च प्रत्यर्प्ययितुमर्हसि ।
तच्छ्रुत्वा मानपालश्च क्व नु तिष्ठन्ति चौरकाः ।

मण्डकालश्च तच्छ्रुत्वा ससैन्यं समवाह्वयत् ॥
मानपालस्तदामात्यो बहुमानपुरःसरं ।
आदौ तुरङ्गमातङ्गयुक्तं सैन्यञ्च किञ्चन ॥
ततस्तयोर्द्वयोर्घोरे प्रवृत्ते सति सङ्गरे ।
अभ्यधावद्धयारूढो मण्डकालो रथं प्रति ॥
ममोपरि प्रयुक्तास्त्रो तस्मिन्नपसरन्नहं ।
खड्गेनोपसरन्तूर्णं तस्य शीर्षमपातयम् ॥
तस्मिन्निपतिते सर्व्वे धावन्ति स्म तथाकुलाः ।
पृतामगृहीत् स तत्राजौ मानपालो जयश्रियः ॥
सन्देशहारिभिस्तेन प्रेषितैरतिसत्वरैः ।
विज्ञापितजयोदन्तो वीरकेतुः समागमत् ॥
जयलक्ष्मीनिदानं मे मानपालः पराक्रमं ।
विज्ञाप्य हर्षपूर्णाय स्वामिने मामदर्शयत् ॥
आलिङ्ग्य वीरकेतुर्म्मामसकृत् मम विक्रमं ।
अभिनन्द्यादिशन्मह्यं तनयां वामलोचनां ॥
तस्याः पाणिं गृहीत्वा तु रथमारुह्य भासुरं ।
श्वशुरेणैव नीतोऽहमाविशम्पाटलम्पुरं ॥
यौवराज्यपदं प्राप्य वामलोचनया सह ।
अन्वभूवम् यथेष्टानि विविधानि सुखान्यहं ॥
भविष्याः षोड़शाब्दान्ते भवद्दर्शनसम्पदः ।
इति सिद्धवरादेशं स्मरन् कालमजीगमं ॥
द्रष्टुमस्या महाकाल्या हृद्यमद्यमहोत्सवम् ।
आगच्छत्सु महीपालेष्वहञ्चास्मिन् समागतः ।
अदर्शि पुण्यपाकेन त्वत्पदाब्जयुगं मया ॥

इतराज्ञाप्य चमूयुक्तं तं विभूर्विससर्ज्ज च ॥
ततः पुरं सोमदत्ते प्रयाति राजवाहनः ।
पुष्पोद्भवसनाथः सन् प्रययौ तस्य मन्दिरं ॥
अवन्तिसुन्दरीं ध्यायन् सोऽभून्मन्मथपीड़ितः ।
तदासक्तमनाः साऽपि सन्तप्तहृदयाऽभवत् ॥
तस्मै सम्भाषणं तस्यास्तस्यापि भाषणं ततः ।
ज्ञापयन्ती द्वयोः प्रेम व्यतनोद्बालचन्द्रिका ॥
कदाचिन्मालवेन्द्रस्य पुरस्तादैन्द्रजालिकः ।
कश्चित् प्रविदधे मायाजलदागममद्भुतं ।
तत्र मायाघनध्वान्तं कुमारः कन्यकापुरं ।
बालचन्द्रिकया पूर्व्वंसूचिताध्वं विवेश सः ।
रम्ये कान्तागृहे सार्द्धं प्रियया राजवाहनः ।
विहरन् गमयामास दिनानि कतिचित् पुनः ॥
अथैकया वल्लभया सुगोप्यमभ्यर्थनापूर्व्वकमिव पृष्टः ।
चतुर्द्दशानां जगतां प्रपञ्चं संक्षेपतः पृष्टमुदाजहार ।

इति श्रीमदप्पय्यामात्यविरचिते दशकुमारकथासारे
सोमदत्तकथाकथनं नाम तृतीयः परिच्छेदः ।

कलियुगस्य माहात्म्यं ।

धनविद्यावयोमत्ताः सर्व्वे दुःखपरायणाः ।
व्याधितस्करदुर्भिक्षैः पीड़िता अतिमायिनः ॥
प्रद्विषन्ति तथैवान्यानविचार्य्य सुदुस्कृतं ।
छादयन्ति प्रयत्नेन स्वदोषं पापकर्म्मिणः ॥
स्वमायां दुष्कृताः सम्यक् विलखन्ति नराधमाः ।
धर्म्ममार्गप्रणेतारं तिरस्कुर्व्वन्ति पापिनः ।
धर्म्मकार्य्यरतश्चैव वृथाविश्वस्विनोजनाः ॥
भविष्यन्ति कलौ प्राप्ते राजानोम्लेच्छजातयः ।
शूद्राभक्ष्यरताश्चैव तेषां शुश्रूषिणो द्विजाः ॥
द्विजाश्च क्षत्रिया वैश्याः शूद्राश्चान्याश्च जातयः ।
अत्यन्तकामिनः सर्व्वे संकीर्य्यन्ते परस्परं ॥
न शिष्य न गुरुः कश्चिन्न पुत्रो न पिता तथा ।
न भार्य्या न पतिश्चैव भविता च कलौ युगे ॥
कलौ युगे भविष्यन्ति धनाढ्या अपि याचकाः ।
रसविक्रयिणश्चैव भविष्यन्ति द्विजातयः ॥
धर्म्मकञ्चुकसंवीता मुनिवेशधरा द्विजाः ।
अपण्यविक्रयरता भविष्यन्ति द्विजातयः ॥
वेदनिन्दापराश्चैव धर्म्मशास्त्रविनिन्दकाः ।
शूद्रवृत्त्या च जीवन्ति द्विजा नरकभोगिनः ।
अनावृष्टिभयप्राप्ता गगनासक्तदृष्टयः ॥
भविष्यन्ति तदासर्व्वे जीवाः क्षुद्भयकातराः ।
स्कान्द पर्ण फलाहारा स्तापसा इव मानवाः ॥

कलौ सर्व्वे भविष्यन्ति पुरुषा हीनवीर्य्यकाः ।
परुषानृतभाषिण्यो देहसंस्कारवर्ज्जिताः ॥
वाचालाश्च भविष्यन्ति कलौ प्राप्ते च योषितः
नगरेषु च ग्रामेषु प्राकारादिषु ये जनाः ।
चौरादिभयभीताश्च काष्ठयन्त्राणि कुर्व्वते ॥
दुर्भिक्षताड़िताभिक्षारताश्चोपद्रुताजनाः ।
गोधूमान्नयवान्नाढ्यदेशं यास्यन्ति दुःखिताः ॥
निधाय हृदि कर्म्माणि ईरयन्ति वचः शुभं ।
स्वकार्य्यसिद्धिपर्य्यन्तं बन्धुत्वं कुर्व्वते जनाः ।
रिपवश्चापि मित्राणि अर्हं सम्बन्धयन्त्रिताः ॥
अन्नोपाधिनिमित्तेन शिष्यान् गृह्णन्ति भिक्षवः ।
उभाभ्यामपि पाणिभ्यां शिरः कण्डूयणं स्त्रियः ॥
कुर्व्वन्त्योगुरुभर्तृणामाज्ञां भेत्स्यन्त्यनादृताः ।
पाशजालेन निरताः पाषण्डजनसङ्गिनः ।
यदा द्विजा भविष्यन्ति तदा वृद्धिं गतः कलिः ॥
यदा यज्ञान्न यजन्ति न होष्यन्ति द्विजातयः ।
तदा तदाकलेर्व्वृद्धिस्त्वनुमेया विचक्षणैः ॥
अधर्म्मवृद्धिर्भविता वाल्यमृत्युरपि द्विजाः ।
नष्टेषु सर्व्वधर्म्मेषु याति निश्रीकतां जगत् ।
एवं कलेः स्वरूपञ्च कथितं विप्रसत्तमाः ॥

धर्म्मराज्ञोः ।

अस्मिन् वहुविचित्रमानवचक्रसङ्कीर्ण जगन्मण्डले राजधर्म्मयोः कोगरीयानिति प्रश्ने केचित् धर्म्मस्य गरीयस्त्वं निर्द्दिशन्त्यपरे च राज्ञः ।

अत्र धर्म्मराजशब्दौ सर्व्वदेशधर्म्मशास्त्रप्रसिद्धाविव गृहीतौ ततश्च न तयोः परिभाषाविशेषप्रदर्शनेनास्माभिः समयातिपातः क्रियते । तौ, धर्म्मोराजा च, प्रजानां निःश्रेयसाय विधात्रा विहितौ, भारतवर्षादन्यत्र सहोदराविव मिलितावपि पृथग्भूयावस्थितौ यथाक्रमं प्रजानामान्तरं वाह्यञ्च भावकलापं परितोनियमयतः । एकश्च स्वशासन-पालनापालनाभ्यां पारलौकिकशुभाशुभप्रदानप्रलोभनप्रताड़नाभिर्मानवान् सन्मार्गे प्रवर्त्तयत्यपरश्चै हिकशुभाशुभ प्रदानप्रलोभनप्रताड़नाभिरिति तयोर्भिन्नएव विषयविभागस्ततश्च तौ तत्र तत्र भूविभागेषु स्वतन्त्रौ परस्परं निरपेक्षौ तिष्ठतः ।

एवं स्थिते तत्र तत्र भूमिभागेषु प्रजानां रुच्यनुसारत एव क्वचिद्धर्म्मानुरक्तिः, क्वचिद्राजभीतिः, क्वचिच्चोभयं युगपदेव प्राबल्यमभिगच्छति, क्वचिद्वा द्वयोरपि समानप्रकार एव ह्रासोऽपि दृश्यते ।

भारतवर्षे तु नैतयोस्तथा पृथग्भावः । अस्मिन् खलु तौ हरिहराविवेकात्मतया मिलिताववस्थितौ सममेव प्रजानां वाह्यमाभ्यन्तरं च भावं समाक्रम्य तिष्ठतः, उभावेवोभयोर्लोकयोर्हितमुपदिशन्तौ स्थितौ । ततश्च भारते तयोः परस्परं सापेक्षित्वं स्वभावसिद्धमिव प्रतिभाति, अत्र धर्म्मो राजानं स्वे पदे प्रतिष्ठापयति, राजा च धर्म्मं स्थिरीकरोति । इत्थं नामाचैकमपहायान्यस्यावस्थितिं द्रष्टुं न शक्यते नापिसम्भवति च ।

त्रिक मङ्गलामङ्गलभावस्य नियन्ता यावदैहिकयोरपि तयो र्विनि-यामकश्च। एवं राजाऽप्यत्र धर्मवन्मनुष्याणामुभयलोकनियामक एव।

एवं हि भारते धर्मानुरक्तिराजभीत्योर्न पृथगवस्थितिरस्ति। यत्र यत्र धर्मानुरक्तिरकुण्ठिता तत्र तत्रैव राजभीतिः प्रबला। ततश्च राजाऽत्र धर्मस्यावतारः कथ्यते। किञ्च भारतेऽस्मिन्नेकस्याः क्षीणतायामपरा स्वयमेव क्षीणा भवति। यत इदानीं समयप्रभावात् प्रक्षीणतामपगतायां धर्मरतौ राजभीतेः स्वतएव संक्षयो लक्ष्यते। अतएव साम्प्रतं राजपुरुषैः प्रजाभ्यः सामर्थ्यातिरिक्तकरभारादानेन राज्यस्य शान्तिवृद्ध्यर्थं समन्तादावश्यकातिरिक्तेषु शान्तिरक्षेषु नियोजितेष्वपि न दुर्ब्बलं प्रति बलवज्जनकृतबाधा, साधुजनेषु दुर्ज्जनोत्पीड़नं, धनिनो दस्युभीतिश्चापसृता, प्रत्युतैतासां प्राबल्यात् शान्तिभङ्गोहि पूर्ब्बापेक्षया वृद्धिं गतइव लक्ष्यते।

तथाहीदानीं दण्डविधान नियमैः सह दण्डार्हपापानां वृद्धिर्भवति, शान्तिरक्षकसंख्यावर्द्धनेन सह दस्यूनां बाहुल्यं जायते, अधिकरणकार्य्यावलोकनविधिभिः समं विचार्य्यकार्य्याणाञ्च उपचितिर्लक्ष्यते। वस्तुतः राजपुरुषैर्दुष्कृतिप्रतिघाताय यथा यथोपाया आविष्क्रियन्ते, दुर्ज्जनै र्दुष्कृतिसम्पादनाय तथा तथैव कौशलान्याविर्भावयन्ते। ततश्च प्रत्यहं मिथ्याभियोगसहस्रै राजद्वारमाकुलीक्रियते, लभन्ते च शतशोमिथ्याभियोगकारिणः सुकौशलेन जयं, तथा दृश्यते कौशलाभावात् सत्याभियोगिनाञ्च बहुधा पराजयोऽपि सम्प्रति हि राजनियमपद्धतिं परिहृत्य यदि पापं कृतं भवेदथवा वृथा वागाड़म्बरेण राजपुरुषाणां चक्षुषोर्धुलिप्रक्षेपणं कृतं भवेत्, तदा न कश्चिद्दोषोभवति। अतएवेदानीं यत् सत्यस्य सम्यक् परिभवो जातः, न तत्र राजपुरुषाणां दोषः,

धातुसूत्रम् ।

सम्मतिभ्यामस्मरणे स ङिज्ज्ञात्वा प्रवर्त्तने ।
अप्रादेः कर्त्रर्थफले स्याद्ङिद्दपादपञ्चवे ।
सनि ङिन्नत्वनोर्मारतोषावलोकनेषु च ।
ज्ञाने तु वा पि वयोहानौ डुदाञ्ज दानतः ।
आङस्यव्याङ्गविक्षेपे ङित्सोथ दादिकर्त्तने ।
दाणदाने कदाचारे ङिद्दरिद्रादुदुर्गतौ ।
द्राकुत्सित्योर्दनैः स्वापे डुधाञ्ज-धृतिपोषयोः ।

ष्ठज विसर्गे तृतादिर्दिवादिश्च । अथोपदेशा अमी । ञिष्वदा स्नेहमोचनयोर्भ्वादिः, गात्र प्रक्षरणे दिवादिश्च । ष्विङ ईष-द्धसने, ष्वद आस्वादने द्वौ भ्वादी । ञिष्वप शये अदादिः षञ्ज परिषङ्गे भ्वादिः । एते पञ्च षोपदेशाः । एतेषां षत्वं भवतीति फलं । कश्चिदन्यत्रापि धातौ नेच्छन्ति ॥ अथ प्रत्याङ्गेति ॥ हलन्ताः सर्व्वधातवः छन्दोनुरोधात् बाहुल्येन अदन्ताः कृत्वा वर्णिताः । पदानीति मत पदाधिकोऽर्थो नास्ति अतोऽर्थसमसंख्यानि पदा-नि स्युः । यतोनानार्थानां अर्थं अर्थं प्रति प्रत्ययं शक्तिः स्वीक्रियते तत् शाब्दिकश्रुतिमाह यावन्तइत्यादि । भ्वादीति । आद्यदा-दीति । आदौ अकारादिवर्णक्रमोयेषां धातूनां ते आद्यदादि क्रमाः । अन्ते आकारादि क्रमोयेषां धातूनां ते अन्तादादिक्रमाः । आद्यदादि क्रमाश्च ते अन्तादादिक्रमाश्चेति आद्यदादिक्रमान्ता-दादिक्रमास्तान् भ्वादि दशगणान् धातून् वहुयत्नतः संरक्ष्य छन्दसा परिपाट्या लिख्यते इति तावदर्थः ॥

तत्रादाविति । तत्र भ्वादिदशगणेषु मध्ये प्रथमत आकारादि स्वरान्ता धातव उच्यन्ते । ख्यादेति । दोऽदादिर्निर्विकरणः ख्यातिः । ता: ख्यातः, ति: ख्याति:। ख्या प्रकथने इति जुमर पाठः। गाङिति-

स वैः कृताभवेदत्तौ नेयाङः स्थापने स तु ।
स निपूर्व्वस्तु नैकर्ष्ये समाधाने समाङ्युतः ।
प्राणश्वावात्मनीयोगे व्यवादन्तरपेर्वृतौ ।
अलिष्टावनुसंपूर्व्वः पात् प्राधानेऽपि च वर्त्तते ।
आशब्दे त्वम्लिसंयोगे पा-धाने पादरक्षणे ।
स्यादभक्षे पादपूर्त्तौ भाड्दीप्तौ मादमानतः ।

भ्वादिः जिघ्रति। घ्रातः घ्राणः घ्रातवान्, घ्राणवान्। चस्नु-रादिः ज्ञापयति। गर्भ्यादिः जानाति। संज्ञाधातुः संप्रतिभ्यामस्म-रणे ङिद्भवति। ङित्वात् सर्व्वत्र कर्त्तर्य्यात्मनेपदं भवतीति ज्ञेयं। शतं संजानीते व्यवहरतीत्यर्थः। ज्ञात्वा प्रवर्त्तनेऽप्यर्थे स ङित् स्यात्। तदायमकर्म्मकः यथा मधुनो जानीते। अप्रवर्त्तनार्थे तु सं भविष्याव एकस्याममभिजानासि मातरीति भट्टिः। कत्रर्थे क्रियाफले अप्रादे-रुत्तरो ज्ञाधातुर्ङिः स्यात्। यथा गां जानीते अपह्नवार्थेऽपादुत्तरो ज्ञाधातुर्ङिः स्यात्। शतमपजानीते अपह्नुते इत्यर्थः। सनि परे संज्ञाधातुर्ङित् स्यात्। पुनरनोरुत्तरोन स्यात्। जिज्ञासते अनोस्तु अनुजिज्ञासति। मारणतोषणाव लोकनेषु संज्ञाधातुरः स्यात् घटादिः स्यादित्यर्थः ज्ञपयति ज्ञानार्थे तु घटादिर्वा स्यात्। विज्ञपयति, विज्ञापयति। प्रिःपृादिर्ल्वादिश्च। जिनाति, जीनिः, जीनः। डुदा-ञ्चेति। डुदत्रिमं जल ददाति, दत्ते। आङस्त्विति धनमादत्ते राजार्थे। स्वाङ्गविक्षेपे तु मुखं व्याददाति पिपीलिका। दोऽदादि दादि। दाति दारिद्र्यमात्मन इति हलायुधः। दाणिति णकारोऽत्र धातभेदार्थः। विप्राय गां यच्छति कदाचारे अशिष्टव्यवहारे दास्या मालां संप्रयच्छते कामुकः। अत्राशिष्टव्यवहारादिकदानात् चतुर्थ्यर्थे तृतीया। दुरदादौ जक्षादि। यथा दरिद्राति जनाः सर्व्व-स्वोत्कृष्टस्य प्रदर्शनादिति। कुत्सेत्योः कुत्सागत्योरित्यर्थः द्राति, नेरुत्तरः स्वापे निद्राति। डुधात्रिमं। ञे-दधाति, धत्ते। छितः छिन्न-वान्। स धात्रधातुर्वैरुत्तरः करणे वर्त्तते

वसन्ताष्टकम् ।

(प्रासम्)

रश्मिप्राखर्य्ययोगाज्ज्वलनसतिरसौ [illegible] न वोढुं
सन्तरच्छेत्थं हिमेशे मकरदभिलषत्यग्र [illegible]स्मिन् ।
चेतोभूराघितश्चावसमतन्मर [illegible] य आत्तचापः
भास्वद्रश्मीन् प्रतापैर्लघयितुमवनौ चेष्टते सर्व्वदैव ॥१॥

निकुञ्जे गुञ्जद्भिः श्रुतिसुखदमुच्चैर्मधुकरै
र्वनान्ते कूजद्भिर्मधुरमधुरं कोकिलकुलैः ।
जनामोदं तन्वन् निखिलवनशोभां द्विगुणयन्
समायातः सोऽयं स्मररसमयः कोऽपि समयः ॥ २ ॥

रजनग्रामुन्निद्रं रविकिरणसङ्गान्मुकुलितम्
समासङ्गप्रेमाद्भुतकिरणसम्पर्करुचिरम् ।
नवीनाब्जं यूनां हृदयसरसीवासलसितम्
वसन्तश्रीरेषा प्रकटयति नित्यं प्रतिपुरम् ॥ ३ ॥

नवीना वासन्तीकुसुमभरखिन्ना प्रतिदिशम्
रसालश्रीरेषा मदयति मनांसि प्रतिवनम् ।
मुहुर्दैनंर भृङ्गीव्रजति वहु माध्वीकविवशा
न जाने किं कुर्व्वन्त्यहह मधुमत्ता मधुकराः ॥ ४ ॥

प्रसूनैरन्विद्धं रचयति तनूरागमसकृत्
ज्वलद्वर्णस्वर्णाभरण निकरम् चम्पकतरुः ॥ ५ ॥
सुधांशौ सम्प्रीतिः कुसुमपरिभोगप्रणयिता
पिकालापे प्रेमा मधुमदनसेवा कुसुमलता ।
नवीनावल्लाभे हृदयहरसौन्दर्य्यलसितम्
समुत्पोत्सुकत्वैः सममिह वसन्तागमसनु ॥ ६ ॥
निशायां पूर्णेन्दोरमृतकिरणप्लावितदिशि
समीरे दाक्षिण्यं वहति ललितं कूजति पिके ।
हृदि प्रेम्णा धृत्वा प्रणयमयपीयूषलतिकाम्
युवा धन्यः कश्चिद् गमयति वसन्तीयसमयम् ॥ ७ ॥
विश्वोन्मादक एष सर्व्वजगतां सौन्दर्य्यसम्वर्द्धको
रम्यः सर्व्वगुणाकरोरससमयः श्रीमान् वसन्तः शुभः ।
कान्तालिङ्गननिर्भरस्मररसं नितं य हृदि ध्यायतं-
यूनां मानसनिर्वृतिं जनयतं प्रोज्झ्तय दुःखतपाः ॥ ८ ॥

श्रीप्रमथनाथ शर्म्मणः ।

वारानसी ।

इति तस्या वचनं दूतीद्वारा समाकर्ण्य राजा तां प्रति सामर्षः प्रशास्तृपुरुषद्वारेण तस्यै मिथ्याभिशापमचीकरत् । ततः परपुरुषगामिनीयमिति कृत्वा कुटुम्बवर्गस्तां परितत्याज । क्रमेण देशान्तरादागतेन स्वामिना परित्यक्ता सा भ्रमरापरीक्षितपरिमलेव मालती म्लाना बभूव । धर्म्मैकशरणा निरपराधा माषकाकर्षणं दिव्यं कृत्वा परीवादसागरं परितताार । तां परीक्षोत्तीर्णां विदित्वा स राजा सुतरां जातवैरस्तत्र सामगातारं छान्दसं वेदशर्म्मनामानं निनिन्द ।

राजा । रे सामग कीदृशस्ते साम्नः प्रभावो यदियमपि प्रशास्तृपुरुषैः प्रत्यक्षीकृतव्यभिचारा जयभाजनमभूत् ।

वेदशर्म्मा । राजन्नियं न व्यभिचारिणी यदि व्यभिचारिणी स्यात्तदा पराजय एवाऽभविष्यत् । यतः—

पावको यत्र निर्णेता यत्राऽहं धर्म्मसामगः ।
क्व हानिस्तत्र शुद्धानां क्व जयो व्यभिचारिणाम् ॥

राजा । धिक् पावकं धिक् सामगञ्च भवन्तं, यदियं व्यभिचारिणी प्रत्यक्षीकृतदोषापि जयभाजनमभूत् । इयञ्चेज्जयभाजनं तदाऽनया प्रतिज्ञया वेश्ययाऽपि दिव्यं जेतव्यम्, इत्यभिधाय वेश्यां सतीत्वेन परीक्षितुं दिव्यं कारयितुं संव्यवान् धर्म्माज्ञया स पापी भयनिः ।

परीक्षकं भवतु। तथा सति साक्षात्, सामगस्य धर्म्मस्य च परीक्षा कृता भविष्यति।

इत्यभिधाय तेन ब्राह्मणेन ताम्रपात्रे कृत्वा जलमानीय स्वकीय-सुवर्णाङ्गुरीयकम् धर्म्मसाम्नाभिमन्त्रितं सूर्य्यकिरणचुम्बिते अस्मिन् जले निक्षिप्तं—रे वारविलासिनि, यदि साध्वी भवसि तदा कर्षयेदं जलादेव मम सुवर्णाङ्गुरीयकम्।

पश्चाद्राजनिर्देशेन परपुरुषानभिगमने सप्रतिज्ञा सा पण्यस्त्री यावदङ्गुरीयकं आकर्ष्टुं करं चिक्षेप, तावत्तन्मन्त्रप्रभावेण जलादेवोत्थितः पुरुषप्रमाणो वह्निः। सा च पण्यस्त्री दग्धहस्ता तस्मादपससार। सभासदश्च साश्चर्य्यं साधुवादं चक्रुः। राजा च लज्जाकलङ्कितवदनः शापभीतश्च ब्राह्मणस्य पादयोर्निपपात। ब्राह्मणस्तु शुद्धहृदयात् सुखापनेयप्रकोपः पृथिवीपतेस्तस्य तमपराधं ममर्ज्ज। तथाहि—

विद्यानामुत्तमा वेदाः षड्भिरङ्गैः समन्विताः।
विद्याविदाश्च सर्व्वेषां ज्यायान् जगति वेदवित्॥

इति वेदविद्या कथा—

समाप्ता।

लोककर्म्मणि योदक्षोविद्ययाऽपि विना भवेत्।
फले सविद्यसादृश्याल्लोकविद्यः स उच्यते॥

आसीत कुसुमपुरे नन्दोनाम राजा तस्य कायस्थः सकटारो

वारायैकशरावपरिमिता एव निम्बशक्तव: प्रतिदिनं भक्ष्यत्वेन दीयन्ते। तत् दृष्ट्वा तेन सकटारेण परिवारेष्वभिहितम्। यदयं राजा चण्डालहृदयो विनाऽपराधेनास्मान् दुःखं दत्त्वा घातयति, शरावमात्रै: शक्तुभि: सर्व्वेषामस्माकमाहारसिद्धिर्नसम्भवत्येव, तत: स खादतु शक्तुशरावं योऽस्य वैरस्य प्रत्युद्धारे समर्थो भवति। परिवारैरुक्तं आर्य्य यदि भवान् जीवति तदापरमेतस्य वैरस्य परिवार संहारसम्भवस्य प्रत्युद्धार: सम्भवति।

तत: सकलपरिवारपरामर्षेण सकटार एव तदन्नं खादित्वा स्वकीयजीवनं रक्षितवान्। परीवारास्तत्र मृता एव।

एकदा स राजा नन्द: प्रस्रावगृहान्मन्दस्मितं कुर्व्वन् बहिर्बभूव। तं हसन्तं दृष्ट्वा पानीयपरिचारिका तदानीं तत्रावस्थिता विचक्षणा नाम्नी चेटी जहास। तां हसन्तीमवलोक्य राजोवाच—

"विचक्षणे कुतोहससि ?"

विच। "यतोदेवोहससि।"

राजा। "मया कुतोहस्यते" ?

विच। "देव, तदहं न जानामि।"

राजा। "आ: कपटिनि, पापे, त्वयैवोक्तं यतो देवोहसति ततोऽहमपि हसामि। पुनस्त्वमेवाभिदधासि यत् तदहं देवस्य हासकारणं न जानामि, किमेतन्ममापि पुरत: परस्परविरोधिनी वचने कथयसि ?। यदि स्वहितमिच्छसि तदा कथयं सत्वरं मम हासवीजं, नोचेत्तदा शास्तिं करिष्यामि।"

ततोलब्धाऽवसरा सा दासी चिन्तयामासयत् सुबुद्धिपरामर्श-परिच्छेद्यमेतत्। ततः सुबुद्धिं कमपि पृच्छामि, सुबुद्धिषु प्रथम-गणनीयः सकटारः स चेदानीं भागधेयादेशितः कारागृहे विद्यते, ततस्तमेव गत्वा पृच्छामीति परामृश्य तत्र गतवती। तत्र च कारा-गृहदुःखदुर्ललं सकटारं निजान्नपानैः परितोष्य तद्वृत्तान्तमपृ-च्छत्। श्रुत्वा सकटार उवाच—"विचक्षणे, विना देशकालानु-सारेण प्रकरणज्ञाने न परिच्छेत्तुं शक्यते राज्ञःस्मितकारणं, तदव-सरं कथय।

विचक्षणाऽवसरं कथितवती।

सक। त्वं कथयसि यन्मूत्रप्रवाहं दृष्ट्वा दृष्ट्वाऽश्वत्थवृक्षं पश्यन् राजा जहसे, तर्हि पूर्वदृष्टस्य कस्यापि वस्तुनः स्मरणं न हास निमित्तं तदानीं तद्दृष्ट्वा मनसो वृक्षासक्तत्वात् प्रकृत एव वृक्ष-धर्मो न हासनिमित्तं, हासस्य वस्तुविकृतिदर्शनजन्यत्वात्। किन्तद्विकृतं दृष्टं राज्ञा अश्वत्थवृक्षे? आं ज्ञातं—मूत्रप्रवाहे वहदश्वत्थबीजं क्षुद्रतरं दृष्ट्वा तदद्भुतं महापरिमाणं वृक्षं पश्यन् परामृष्टवान् राजा, यदहो वैकृत्यं विधातुः प्रपञ्चस्य! क्वेदं बीजं! क्वाऽयं तरुः! तदुद्भवश्च! एवं हसितं भूपालेन। पुनः पुनः परामृश्य सकटारस्तदेव निर्द्धारितवान्। अब्रवीच्च तां तदेव वचनं गत्वा राज्ञः पुरस्ताद्वक्तुं।

श्रुत्वा राजोवाच--"विचक्षणे सत्यं कथय सकटारो जीवन्नपि वर्त्तते।

विच। अथ किम्?

राजा। कोऽन्यः सकटारादिदं निर्द्धारयितमलम्भवन्ति। नान्यो

शिवजिच्चरितम् ।

अवसाय्य महाराष्ट्रीया किमनन्तरं स्वकार्य्यं प्रत्युदासीनाः स्थास्यन्ति ? ।

राजा । अकिञ्चित्करञ्चिदमयाथयथञ्च । सर्व्वथा धार्म्मिक-प्रवरेण क्षत्रियभूपतिना साकं कितवाचारेण प्रतिसन्धानात् लज्जते चेतः किलास्माकं धर्म्मार्थमेव विहितव्यवसितानाम् । तथाहि पश्य,—

आसीद् यद् यवनैः पुराव्यवहृतिर्मिथ्यातिपापत्मभि
र्धीमन्तोनहि तां यथायथमिति प्राञ्ो निनिन्दुः क्वचित् ।
किन्तु क्षत्रधराभृति श्रितमहाधर्म्मे यदीयं भवेत्
विश्वासः सुकृतात्मनां वत तदास्मासु प्रलीनस्थितिः ॥
विनिहते च पवित्रचेतसां विश्वासे पतनमवश्यम्भावि
समृद्धस्यापि कुलस्य इति सोद्वेगं निश्वसीति ॥

मयू । देव ! तदैव किलसङ्गतिमानयमर्थोभवेत् यद्यसौ क्षत्रकुलपतिर्धर्म्ममुद्दिश्य अस्मान् पीड़यितुं दक्षिणापथवसुधायां सवलः समवतरेत् । न च तथा, विगतापरसम्पर्कपरित्यक्तधर्म्मा किलाऽयं भूपतिरङ्गीकृत्य यवनप्रभोर्दासतां तदाज्ञयैव तत्प्रभुता-परिवर्द्धनाय स्वजातिनिधनाय वद्धपरिकरः समरभुवमवतीर्णः । तत् सर्व्वथास्माभिः पूर्व्वावस्थितकैतवेन प्रवञ्चनीयः एव अन्यच्च यत् देवपादैरभिहितम् एवं कृते सुकृतात्मनामस्मासु श्रद्धावैपरीत्य मवश्यम्भावि तत्रापीदं कथ्यते । तथाहि

अहो धिग्विश्वासं सरलमनसां भारतभुवाम्

अन्यच्च ।

प्रभोः समक्षं चरिते यस्मिन् कर्म्मणि कीर्त्तयः ।
तद्दासस्य पुरस्तस्मिन् अकीर्त्तिः कथमुद्भवेत् ॥

—०—

कस्यचित् शारदीयप्रलापः ।

ब्रह्माण्डभाण्डोदर-दिग्गजेन्द्र-
तुण्डोद्ध शुण्डा भुवि यस्य मूर्त्तिः ।
नृसिंहरूपप्रतिपक्षतामै र
जातेव सोऽव्यान्न गजार्द्धदेहः ॥

एवमाद्यनेकविधमङ्गलपाठं कुर्व्वन् प्रविश्य कश्चिज्जरद्गवो ब्राह्मण-ब्रुवः समन्तादवलोक्य च सहासं स्वगतं प्रलपति प्राप्तोऽहं साम्प्रतं हिमालय प्रदेशादवर्त्तमानः भारतराजधानीं कलिकातानगरीं । अहह !

यदुपतेः क्व गता मथुरापुरी
रघुपतेः क्वगतोत्तर कोसला ।
क्व च गता यवनेश्वरदेहली
कलिकता खलु राजपुरी पुरो ॥

येयं सुधाधवलित-प्रासादराजिविराजिता प्रासादनगरीति सभ्यदेशेषु ख्यातिमापन्ना, असभ्येषु कार्व्वविटशक्तिप्रख्यापन-चमत्कारिणी तथा सुसभ्यभवगास्वदनवरमानवद्वन्द्वाभिनन्दिनी, अतुग्रज्ज्वलपाश्चातरन्नानालोकनिस्यन्दातिसन्दीपितप्राच्यान्धकारावृत पार्श्वस्थाशेषग्रामनगर जनपदनिकरा च अहोचित्रमेतत्—

ततश्च सत्स्वपि व्यासजैमिनि गौतम कपिल पातञ्जल प्रमुख निरन्तरपरब्रह्मध्यानैकतानचित्तप्रत्यक्षीकृतकरतलास्थामलकवदखिलजागतवाह्यान्तरार्थनिचयमहर्षिमुख्यविरचितदर्शनशास्त्रेषु, मनु-वशिष्ठ पराशर पाराशर्य्य याज्ञवल्क्य शातातपादि धर्म्मानुशीलनकल्पित यावज्जीवोपलब्धाज्ञेयधर्म्मतत्त्व सत्त्वोज्ज्वलमहामुनि निवह प्रणीतेषु नानाविधधर्म्मसंहितानिबन्धेषु, वाल्मीकि कृष्णद्वैपायनप्रभृत्यलौकिकार्षेयचक्षुरुत्प्रेक्षोपलक्षित भूतभविष्यद्वर्त्तमानमानवचित्रचरित्र-तत्तत् समय विवर्त्त परिवर्त्तनादि महायोगिवृन्दवृन्दारकप्रणीतेतिहासपुराण निकरेषु, इन्द्रचन्द्र व्याड़िगालवपाणिनिप्रमुखतपस्तोषितमहेशलब्धाव्याहतज्ञानचक्षुरुन्मीलिता शेषशब्दसाधनोपायार्थ-सम्बन्धहृतजड़ताचार्य्यवर्य्यपरम्परानिर्म्मितेष्वतिविस्तृतशब्दशास्त्रेषु, तथा तथाविधाप्रतिहतप्रसरज्ञाननयनोन्मेषाधिगततत्तत् पदार्थरहस्यमहामतिसिद्ध पुरुष समुद्भावितासु आयुर्व्वेद धनुर्व्वेदज्योतिराद्यशेषशास्त्रपरम्परासु, समन्तात् सुलभ्येषु च कालिदासादि महाकविप्रणीतेषु विविधगद्यपद्यमयेषु महाकाव्येष्वभिज्ञानशकुन्तल प्रमुखनाट्यकाव्येषु च एतावत् समय पर्य्यन्तं—

यदत्र वर्षे चिरबद्धमूलं
स्थितं तमः सन्ततमेव घोरम्।
पाश्चात्यदेशागतबोधरश्मिः
क्षणेन सर्व्वं तदपाकरोद्वै ॥

वै इति पादपूरणार्थमेव व्यवहृतम्, यतः।

यदि न स्युश्च, वा, वै, ह पदानि शरणानीह
कवीनां मादृशां लोके पादपूर्त्तिः सुदुर्घटा ॥

(सत्स्वप्येतेषु) उदरपूर्त्तिस्तु सर्व्वथा सुदुर्घटैव। अथवेह

अथवा यदि कोऽपि टीकाकारः अस्मत् सम्मानरक्षार्थं 'वै' इतरस्य निश्चयार्थं कुर्य्यात् तदापि न क्षतिः। किन्तु तथापरिकल्पनं दुराशाविलसितमात्रं यतो जीवितावस्थायां विद्योदयोऽयं यथाकालं प्रकाशमानोऽपि ग्राहकेभ्यः स्वनिष्क्रयमल्पपरिमित मप्यर्थं लब्धुं न शशाक। अतेऽस्मिन् निरर्थकमसैरकपदम् दृष्ट्वा कश्चित् तदर्थं न योजयिष्यतीति न सम्भाव्यते। तन्निरर्थक मस्तु 'वै'। अथ—

दूरीकृतेऽतिघनघोरतमान्धकारे
तस्मिंस्तु सम्प्रति जनानवमभ्युपेतः।
पाश्चात्यदेशजसमुज्ज्वलरूप मद्य
ज्ञानं प्रकाशमयमानवतां प्रपन्नाः।
असारताशास्त्रचयस्य तत्र
दुर्भाविता शास्त्रकृताञ्च जाड्यम्।
ततश्च शास्त्रेषु नचास्ति तेषां
श्रद्धाऽल्पमात्राऽपि परन्त्वनास्था॥

शास्त्रे विश्वासहीनत्वात् पूर्व्वाचारेष्वनादृताः।
यथेष्टाचरणासक्ताः पशुभिस्तुल्यतां गताः।
ततश्च सर्व्व एवेदानीम्—
स्वच्छन्दभोगी न नृपो न योगी
सीतावियोगी नचरामचन्द्रः। एतच्छ्लोक प्रतिपाद्यत्वमापन्नः- येन केनाप्युपायेनैहिकसुखसम्बृद्धिमभ्युद्यतुषु वर्गेषु द्वितीयमेवायत्तीकर्त्तुं समीहते तत्र नापमानं गणयति, वारम्वारं प्रत्याख्यातेऽपि न तदासक्तिं विमुञ्चति, प्रत्युतलज्जायै जलाञ्जलिं दत्वा पददलितगृहाम्बुभुगिव शनैः शनैः पुनरेव कणकण्ठक्षतक्षणमेव

आहारनिद्राभयमैथुनञ्च
सामान्यमेतत् पशुभिर्नराणाम् ।
ज्ञानञ्च पाश्चात्यमिहाभ्युपेत्य
पशुत्वमेतत् तनुते प्रकामम् ॥

ततश्च

क्वचित् सिंहः, क्वचिच्छाग-, काकोलूकपमः क्वचित् ।
क्वचित् श्वा च शृगालश्च विड़ालोवृषभः क्वचित् ॥
सिंहो दुर्बलसन्निधौ, निजगृहे, वाक्ये, लजो मैथुने ।
भक्ष्याभक्ष्यविचारवर्जनविधौ ध्वांक्षः परोच्छिष्टभुक् ।
गाम्भीर्य्ये खलु पेचकः परमनस्तुष्टौ भये श्वोपमः
जम्बूकः परवञ्चनास्ववसतिं सोढुं विड़ालायते ॥

स्वच्छन्दभोगी परवस्तुलोभे
मन्दप्रचारि वृषभायते च ।
पशुत्वमेवं परिकल्पते यत्
ज्ञानाय तस्मै प्रणमामि भूयः ॥

किञ्च

शास्त्रं पैतृककुलानुपालितमथोज्झित्वा यथेच्छं तथा
शिष्टाचारनिबद्ध शुद्ध गुणवद्धर्माभिवन्धांश्च तान् ।

मैत्री नापि च दृश्यते न च गुरौ देवे च भक्तिः क्वचित्
विश्वासः स्वजनेषु नैव न च वा धर्म्मे गुणे चादरः।
सौभ्रात्रं न च विद्यते न च दयादाक्षिण्यमेतेष्वहो
दारेष्वेव निजेषु भक्तिरतुला श्रद्धा रतिः साम्प्रतम् ॥
पाश्चात्यैरहृतघोरमोहतमसां ज्ञानैरमीषां पुनः
सम्बन्धोनिजपालनावधि परं मात्रा च पित्राऽथवा।
जातायाञ्च कथञ्चिदेव हि ततः शक्तौ स्वपोषं प्रति
कामाता ? जनकोऽथ कोन च तयोश्चित्तं क्षणं संस्मरेत् ॥
दम्पत्योर्न कुलं न जातिरथवा चारादिकं लभ्यते
पुष्पेष्वासशरातिदाहविधुराच्चिद्द्वन्द्वनिर्वापणी।
प्रीतिः पूतविवाहबन्धनविधावेकैव संयोजिका
क्षीणा सङ्गवशेन सैवहि पुनस्तद्बन्धनच्छेदिका।

अथवात्यन्तपशुत्वातिसभ्यतयोरत्यल्पमेवान्तरम्। पशुत्वं नाम महार्घपरिच्छदावृतं सत् सभ्यतया व्यपदिश्यते। एतच्च प्रबन्धान्तरे समलोचितं भविष्यति।

भवतु प्रस्तुतमनुसरामः।

अहं कलिकातां भारतराजधानीमनुप्राप्तः। इयं हि नगरी
रम्योद्यानशतैः शतैश्च सुपथै रम्यैश्च हर्म्योत्करैः
सङ्कीर्णा परितः सुरम्यसरिता धौतापरान्ता तथा।
प्रासादाट्टशिवालयैरपि शतैश्चित्रैरनेकापणै

SANSKRIT PUZZLES.

We are glad to acknowledge the recipt of Vidagdha mukamandan a book of Sanskrit puzzles collected by a pupil of ours Durgachurana kavya Tirtha. The collection indeed shows a good deal of skill as well as the wit of the author. we note below some of those puzzles.

आद्यन्ताभ्यां भवेद्धस्ती, मध्यमाभ्याञ्च दानवः ।
विपरीते पितृपतिः, समुदाये वराङ्गना ॥ (१)
मदमत्तमयूरस्य, गिरेर्माल्यवतस्तटे ।
सीताविरहिणं रामं, सुहृत्सुहृत्मोक्षयत् ॥ २
कान्तया कान्तसंयोगे, किमकारि नवोढ़या ।
अत्रापि च क्रियागुप्ति र्बुधैरपि न बुध्यते ॥ ३
सुवर्णालङ्कृतां कन्यां, हेम्ना च परिवर्जितां ।
तां कन्यां विधवां दृष्ट्वा गृहे रोदिति तत्पतिः ॥ ४
एकवर्ग-समुद्भूतं चतुर्व्वर्ग-फलप्रदं !

---

(1) Find out a sanskrit word of four letters of which the first and last mean an elephant the two at the middle when read in right direction mean a Daitya and when read in lept means the god of the dead while the whole together mean a beauti ful woman. Nominative is to be found out in (2), verbs are to be found out in (3), (7), (8) and (10), and both verb and nominative in (9), of the rest

अनुलोमविलोमाभ्यां यस्य नाम स पातु वः ॥ ५

युधिष्ठिरस्य या कन्या नकुलेन विवाहिता ।
पूजिता सहदेवेन सा कन्या वरदा भवेत् ॥ ६

दामोदराय पुष्पाक्षन् ! फल मूल जलान्यपि ।
एकादश्यां क्रियागुप्तिर्बुधैरपि न बुध्यते ॥ ७

सन्ध्यावन्दनवेलायां तड़ागान्तं द्विजोत्तमैः ।
अत्र क्रियापदं गुप्तं बुधैरपि न बुध्यते ॥ ८

भवानित्थं करोमित्र प्रति पूजापरायणः ।
कर्त्ता गुप्तः क्रिया गुप्ता गुप्तमामन्त्रितं पदं ॥ ९

गोपीभिः सह चाष्टाभिर्गोविन्दो यमुनाजले ।
अत्र क्रियापदं गुप्तं बुधैरपि न बुध्यते ॥ १०

पाण्डवानां सभामध्ये दुर्योधन उपागतः ।
तस्मै वित्तं सुवर्णञ्च क्रिया गुप्ता न बुध्यते ॥ ११

भत्ते वियोगिनीपण्डस्थलपाण्डु फलानि का ।
वद वर्णौ विधायान्ते सीता हृष्टा कथा भवेत् ॥ २२

चान्तरायाणामभावश्च भवति ननु स्वभिन्नेश्वरप्रणिधानात् स्व-साक्षात् कारः कथं स्यात् अभ्यासतज्ज्ञानयोः षड्‌जादावेकविषयत्वदर्शनादिति चेदुच्यते, यथैवेश्वरोऽसंगःचिद्रुपः कूटस्थः क्लेशादि शून्यः तथैव जीव इति सादृश्यादीश्वरध्यानं तदनुग्रहश्च राजीव स्वरूपसाक्षात्कारहेतुरित्यनवद्यं ; अन्तरायमाह ।

व्याधिस्त्यान संशय प्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः । ३० ॥

पदच्छेदः । व्याधि, स्त्यान, संशय, प्रमाद, आलस्य, अविरति, भ्रान्तिदर्शन, अलब्धभूमिकत्व, अनवस्थितत्वानि चित्तविक्षेपाः, ते, अन्तरायाः ।

पदार्थः । व्याधिः धातुवैषम्यनिमित्तो ज्वरादिः, स्त्यानं चित्तस्य अकर्म्मण्यता, संशयः सन्देह उभयकोट्यालम्बनं ज्ञानं, यथाः योगः साध्योनवेतीत एवं रूपः, प्रमादः अननुष्ठानशीलता, समाधिसाधने औदासीन्यमिति यावत् । आलस्यं कायश्चित्तयोर्गुरुत्वं, योगविषये प्रवृत्त्यभावहेतुः । अविरतिः विषयतृष्णा, भ्रान्तिदर्शनं शुक्तिकायां रजतत्ववदिति विपर्य्यय ज्ञानं, अलब्धभूमिकत्वं कुतश्चित् निमित्तात् समाधिभूमेरलाभोऽसम्प्राप्तिः, अनवस्थितत्वं लब्धावस्थायामपि समाधिभूमौ चित्तस्य तत्राप्रतिष्ठा । चित्तं विक्षिप्यते एभिरिति चित्तविक्षेपकाः, ते एते, समाधेरेकाग्रतयाः ; यथायोगं प्रतिपक्षत्वात् अन्तराया इति उच्यन्ते ।

भावार्थः। एते हि व्याधि प्रभृतयो रजस्तमोवलात् प्रवर्त्तमाना श्चित्तं विक्षिपन्ति अस्थिरं कुर्व्वन्ति ततश्च ते समाधेरन्तराया कथ्यन्ते इति भावः।

Desease, passivity, doubt, ballvination, laziness, avidity error, inability to contemplate unsteadiness and distraction are the obstacles.

वृत्तिः-ये चित्तं योगाद्विक्षिपन्ति, भ्रंशयन्ति ते विक्षेपाः योगस्यान्तरायाः विघ्ना नव, तत्र व्याधिर्वातपित्तश्लेष्मणामन्नरसस्येन्द्रियाणाञ्च वैषम्यं, स्त्यानं चित्तस्य सत्त्वेऽपि कर्म्मानर्हता, संशयः प्रसिद्धः, योगाङ्गाननुष्ठानं प्रमादः, आलस्यं चित्तस्य गुरुत्वादप्रवृत्तिः अविरतिर्विषयतृष्णा, भ्रान्तदर्शनं एककोटिकोविपर्य्ययः, अलब्ध भूमिकत्वं समाधिभूम्यलाभः, मधुमत्यादयः समाधिभूमयो वक्ष्यन्ते, अनवस्थितत्वं नाम लब्धायां भूमौ चित्तस्यास्थिरत्वं पूर्व्वभूमौ स्थितं हि चित्तं उत्तरभूमिं नयेत्तस्मादस्थिरत्वं दोष इत्यर्थः न केवलमेते विक्षेपा योगनाशकाः किन्तु दुःखादीनपि कुर्व्वन्तीत्याह।

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासाः विक्षेपसहभुवः। ३१॥

पदच्छेदः। दुःख, दौर्मनस्य, अङ्गमेजयत्व, श्वास, प्रश्वासाः, विक्षेपसहभुवः।

पदार्थः। दुःखं चित्तस्य राजसः परिणामः बाधनालक्षणः, यद्वाधात् प्राणिनस्तदुपघाताय प्रवर्त्तन्ते, दौर्मनस्यं वाह्याभ्यन्तरैः कारणै र्मनसोदुःस्थता, अङ्गमेजयत्वं—सर्व्वाङ्गानां वेपथुः, आसनस्थैर्य्यं वाधकः। प्राणोयद्वाह्यं वायुमाचामति सः श्वासः। यत्

अन्वयः। स्पष्टम्।

भावार्थः। पूर्व्वोक्तैर्व्याधिप्रभृतिभिश्चित्तस्य विक्षेपे सति दुःखादीन्यपि समुद्भवन्तीत्यर्थः।

Pain, uneasiness, trembling of the body, inhaling and exhaling accompany the distractione of the heart.

वृत्तिः। दुःखं व्याधिजं शारीरं, कामादिजं मानसं, तद्द्वयमाध्यात्मिकं व्याघ्रादिजमाधिभौतिकं ग्रहपीड़ादिजमाधिदैविकं दौर्मनस्यमिच्छाविघातात् क्षोभोमनसि, अङ्गमेजयत्वं अङ्गानां कम्पनमितर्थः, अनिच्छतः प्राणोऽयं बाह्यं वायुमन्तःप्रवेशयति स श्वासः, समाध्यङ्गरेचकविरोधीतर्थः, एवं अनिच्छतः कौष्ठ्यस्य वायोर्बहिर्गमनं प्रश्वासः पूरकविरोधी, एते विक्षेपैः सह भवन्ति विक्षिप्तचित्तस्य भवन्तीतर्थः। ईश्वरप्रणिधानादेतेषामभावहेतुत्वमुपसंहरति।

तत् प्रतिषेधार्थमेकतत्त्वाभ्यासः। ३२॥

पदच्छेदः। तत्-प्रतिषेध-अर्थं एकतत्त्व-अभ्यासः।

पदार्थः। तेषां (पूर्व्वोक्तानां विक्षेपाणां) प्रतिषेधार्थं निषेधार्थं एकतत्त्वाभ्यासः एकस्मिन् (यस्मिन् कस्मिंश्चित्) तत्त्वे अभ्यासः चित्तस्य पुनः पुनर्निवेशनम्।

अन्वयः। क्रियेतेतिशेषः।

भावार्थः। यत्किञ्चिदभिमतं वस्तु ध्यानं चित्तं तान् विक्षेपान् प्रतिरुन्ध्यात्।

वृत्ति: विक्षेपाणां नाशाय मेकतत्त्वस्य स्वरूपाभ
मित्यर्थ. अत्र भाष्यकारैः स्थायिचित्त स्यात् तस्यै
नीयेति क्षणिकमतमाशंक्य सोऽहमिति प्रत्यभिज्ञानादिना
मेव मनेकार्थाभ्यागाद्धि स्थायि विद्यते तस्य चित्तस्यासूयादि
सम्भवी योगानुष्ठानायोगात् तन्मूलनिरासोपायानह ।

मैत्री करुणा मुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषया
भावनातश्चित्तप्रसादनम् ॥ ३३ ॥

पदच्छेद । मैत्री, करुणा, मुदिता, उपेक्षाणां सु
अपुण्यविषयाणां, भावनात, चित्त-प्रसादनम् ।

पदार्थ । मैत्री—सौहार्द करुणा कृपा, मुदिता
औदासीन्यं सुखादिशब्दस्तद्वत्सुखलाभवत्य धर्मधर्माभि
नादित्याची ततश्च सुखित दुःखित पुण्यवदपुण्यवन्तस्त
विषया आश्रया यासां ता स्तासां भावना—उत्पादनं चि
करणं, तस्य प्रसादनं निर्मलता, समाधिप्रतिबन्ध
दिमलापसारणं इति यावत् ।

अन्वय । सुखदुःखपुण्यापुण्यविषयाणां मैत्री
पेक्षाणां भावनानात चित्त प्रसादनं भवतीति शेषः ।

ादीनि पूर्वाणि सुखादिशब्देषु
था यथाक्रमं सुखितेषु पुण्यवत्सु
सुखितेषु सुखिनमिति मैत्री का

पातञ्जलयोगसूत्रम् ।

Friendship with the happy, pity for the suffering, joy for the righteous and discarding the sinful from one's heart are the means of tranquilizing the heart and focussing it.

वृत्तिः । सुखिषु प्राणिषु मैत्रीं मित्रतां, दुःखितेषु करुणां, दयां, पुण्यवृत्तिषु मुदितां हर्षं, अपुण्यशब्दितपापवृत्तिषु उपेक्षां मध्यस्थवृत्तिं भावयेत्, तथाभावनया चित्तस्य प्रसाधनं भवति, सुखादिषु यथाक्रममेतया भावनया सात्त्विकोधर्म्मो जायते तेष्वी-र्ष्याऽपकारेच्छाऽसूयाद्वेषाणां चित्तमलानां विनाशात्, तेन च शुद्धेन धर्म्मेण चित्तं प्रसन्नं भवति, प्रसन्नञ्च वक्ष्यमाणेभ्य उपायेभ्यः एकत्र स्थितिपदं लभते इति, इदानीं मैत्र्यादि भावनया प्रसन्नस्य चित्तस्य स्थित्युपायानाह ।

॥ प्रच्छर्द्दन विधारणाभ्यां वा प्राणस्य ॥ ३४ ॥

पदच्छेदः । प्रच्छर्द्दन—विधारणाभ्यां, वा, प्राणस्य ।

पदार्थः । प्रच्छर्द्दनं—कौष्ठस्य वायोर्नासिकापुटाभ्यां प्रयत्न-विशेषात् मात्राप्रमाणेन वहिर्निःसारणं, विधारणं, प्राणायामः, इति भाष्यं, प्राणायामश्च प्राणस्य (वायोः) आयामः गतिविच्छेदः, स च द्वाभ्यां प्रकाराभ्यां भवति, वाह्याभ्यन्तरापूरणेन, पूरितस्य वायोस्त-त्रैव निरोधेन वा, अथवा प्राणस्य कौष्ठ्यवायोः ।

अन्वयः । वा (अथवा) प्राणस्य प्रच्छर्द्दनविधारणाभ्यां मनसः स्थितिं प्रसादयेदिति शेषः ।

भावार्थः । वा शब्दोवक्ष्यमाणचित्तैकाग्रतासाधनोपायान्त-

सामर्थ्यं सूचितम्, प्राणायामस्य रेचक-पूरक-कुम्भक-भेदेन त्रिविध इति केचित्, तच्चिन्त्यं ; प्राणायामस्य विज्ञेयो रेचक पूरक, कुम्भका इत्यादि स्मृतिभिस्त्रयाणामेव मिलितानां प्राणायामत्वकथनात्, तत्र प्रच्छर्द्दनेन रेचको, विधारणेन च पूरक कुम्भकावुक्तौ; विज्ञान-भिक्षुस्तु विधारणस्य कुम्भक एवार्थः, स च पूरकं विना न सम्भवतीति पूरकस्यार्थादागमः इत्याह। प्राणायामस्य चित्तस्यावप्रसादन-पूर्व्वक स्थितिसाधनत्वं स्मृतिप्रसिद्धमेव, तथाहि—प्राणायामैर्द्दहेदोषान् धारणाभिश्च किल्बिषानिति।

Contemplation is also accomplished by means of emitting a breath and steadying it.

वृत्तिः—नासिकापुटाभ्यां प्राणस्य प्रच्छर्द्दनं रेचनं रेचितस्य प्राणस्य वहिरेव विधारणं, यथाशक्ति ताभ्यां चित्तमेकत्र लब्धं स्थितिं लभते, प्राणजये चित्तजयः, तयोरविभागात्। प्राणायामस्य सर्व्वपापनिवर्त्तकत्वात् पापनिवृत्तौ चित्तं स्थिरं भवति वा शब्दो वक्ष्यमाणोपायान्तरापेक्षया विकल्पार्थो नतु मैत्र्यादि भावनापेक्षया तद्भावनायाः सर्व्वोपायसंस्कारित्वेन समुच्चयादिति मन्तव्यम्। उपायान्तरमाह।

॥ विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिवन्धनी ॥३५॥

पदच्छेदः। विषयवती, वा, प्रवृत्तिः, उत्पन्ना, मनसः, स्थिति-निवन्धनी।

पदार्थः। विषया गन्ध, रस, रूप, स्पर्श, शब्दा विद्यन्ते फलत्वेन यस्याः सा विषयवती, वा अथवा, प्रवृत्तिः प्रज्ञा, उत्पन्ना जायमाना, मनसश्चित्तस्य स्थितिनिवन्धनी स्थितिं एकाग्रतां निवध्नाति सम्पादयतीति एकाग्रतासम्पादनीत्यर्थः।

भावार्थः। गन्धरसरूपशब्दस्पर्शान्यतमविषयिन्यपि प्रज्ञा चित्तस्य स्थैर्यं सम्पादयतीति वा।

Or an objective activity (exclusive attachment to one object) being produced, it steadies the mind.

वृत्तिः—नासाग्रे चित्तस्य संयमाद्दिव्य गन्ध साक्षात्कारो भवति, जह्वाग्रे संयमाद्दिव्यरसस्य संविद्भवति, तालुनि रूपसंवित्, जिह्वा मध्ये स्पर्शसंवित्, जिह्वामूले शब्दसंवित्, गन्धादिविषयवत्यः प्रवृत्तयः शीघ्रमुत्पन्नाः सतिशाविश्वासमुत्पाद्य अतिसूक्ष्मेश्वरादौ लक्ष्ये मनसि स्थितिं निवध्नातीत्यर्थः। शास्त्रोक्तविशेषस्य कास्य- चिदनुभवे सत्यतिसूक्ष्मेऽपि श्रद्धया संयमार्थं योगी प्रपद्यत इति भाव.।

॥ विशोका वा ज्योतिष्मती ॥ ३६ ॥

पदच्छेदः। विशोका, वा, ज्योतिष्मती।

पदार्थः। विशोका—विगतः शोको रजः, परिणामोयस्याः, सुखमयसत्त्वाभ्यासवलाद्रजोविपाकरहिता इति यावत्, वा अथवा, ज्योतिष्मती, ज्योतिः सात्विकः प्रकाशः स प्रशस्तो भूयान् विद्यते यस्याः सा।

अन्वयः। वा (अथवा) विशोका ज्योतिष्मती प्रवृत्तिरुत्पन्ना चित्तस्य स्थितिनिवन्धनी भवतीति शेषः।

भावार्थः। चित्तस्य त्रिधैव स्थितिः। (१) ज्ञानात्मिका, (२) सुखदुःखात्मिका, (३) प्रयत्नात्मिका च। प्रयत्ननियमात् कथं चित्तस्य प्रसादनमिति त्रयस्त्रिंश सूत्रे दर्शितं, सुखदुःखमय वृत्त्यात्म- कस्य चित्तस्य कथं प्रसादनमिति द्वात्रिंश सूत्रे दर्शितं। केवलज्ञा-

Or a pure dry light consisting in knowledge alone tranquilizes the mind.

वृत्ति:—अष्टदलं हृत्पद्मं रेचकेनोर्द्ध्वमुखं ध्यात्वा तत्कर्णिकास्थायां ऊर्द्ध्वमुख्यां सुषुम्नाख्यनाड्यां संयमनात् मनसः संविद्भवति, तन्मनः सूर्य्येन्दुग्रहमणीनां प्रभातद्रूपेणानेकधा भवति, तत्सात्त्विकं ज्योतिर्मनः, तस्य कारणं सात्त्विकोऽहंकारोविस्तीर्णमहोदधिकल्पो व्यापी, तस्यापि ज्योतिःस्वरूपस्य संयमात् संविद्भवति, सैषा द्विविधा संवित्, ज्योतिष्मती मनोऽहंकाराख्या ज्योतिर्विषया विशोका दुःखशून्या प्रवृत्तिरुत्पन्ना मनसःस्थितिहेतुरित्यर्थः ।

॥ वीतरागविषयं वा चित्तम् ॥ ३७ ॥

पदच्छेदः । वीत-राग-विषयं, वा चित्तम् ।

पदार्थः । वीतरागविषयं—वीतः परित्यक्तः रागो विषयाभिलाषो येन तत् वीतरागं योगिनां चित्तं तदेव विषयः आलम्बनं यस्य तत् तादृशं, वा अथवा, चित्तं व्याख्यातं । केचित्तु वीतरागविषयमित्येतत् पदं वीतौ परित्यक्तौ रागविषयौ येन इति व्युत्पादयन्ति ।

अन्वयः । वा (अथवा) वीतरागविषयं वा चित्तं मनसः स्थितिनिबन्धनं भवतीति शेषः ।

भावार्थः । अथवा प्रथम योगाभ्यासार्थी योगी वीतरागाणां कृष्णद्वैपायनप्रमुखानां सिद्धपुरुषाणां चित्तमालम्बनीकृत्य स्वचेतसः स्थिरतां प्रसाधयेत् । अन्ये तु वीतौ परित्यक्तौ रागविषयौ येन तादृशं चित्तं सन्न्यासिनश्चित्तमित्यर्थः समाधिसिद्धये प्रभवतीति व्याचक्षते ।

Or by contemplation of that heart, which is, free from all desires

पुरुषपरीक्षा।

ततस्तत्तर्कं परितुष्टेन राज्ञा सकटारः पुनरानीय सम्मानपात्रं कृत्वा राज्यचर्य्यायां मन्त्रिराक्षसस्य द्वितीयः कृतः। सकटारस्तु तां पदवीमासाद्य चिन्तयामास "अहोदुर्नीतिरस्य राज्ञः! सकल-परिकरं मम हत्वा मामेव मन्त्रिपदव्यां स्थापयति। मूलमुत्कृत्य दले जलं ददाति।

तथाहि—

> उत्कटं वैरमुत्पाद्य पुनः सौहृदमिच्छति।
> यस्तस्य बुद्धिहीनस्य स पन्थानमवेक्षते॥

कथञ्चा मम पापिमनः प्रत्येति दुष्टाशयेऽस्मिन्। यतः—

> दृष्टा वैरक्रिया यस्य पुरा पर्य्यन्तगामिनी।
> तस्मिन् विश्वासमायान्तं मृत्युर्जिघ्रति मस्तके॥

तदिदानीं किमुचितं? पुरातनमस्य वैरमिदानीतनञ्च सौहृदं चिन्तयन् संदिग्धचित्तोऽस्मि किं करवाणि।

अथ वैरोद्धारार्थमेव तदापि जीवनं स्वीकृतं, यदाऽनेन दुरात्मना कुस्वामिना पश्यतो मम पुत्रादयोहताः। तद्यथा—

> सर्व्वस्वं गतमेव गच्छतु नृपं म्लानिश्च सा मामकी,
> लक्ष्मीः प्रस्थितिनिश्चयेव, सुधियः शोचन्ति के तां गताम्।
> ते पुत्राः सदसि प्रगल्भवचसस्ताः सानुरागाः स्त्रियो
> नप्तारः किल ते च ते च शिशवस्ते तो न मुञ्चन्ति मे॥

पापात्त्रस्यति यः स एव पुरुषः स्यादुत्तमोभूतले
पापात्मापि विभेति योऽपयशसः स ज्ञायते मध्यमः ।
त्रासो यस्य न पातकादपि न वा लज्जाऽपराधादपि
प्रज्ञावद्भिरुदाहृतोऽयमधमः सर्व्वत्र निन्दास्पदम् ॥

इति चिन्तयन्नेव स मन्त्री कदाचिदारामदर्शनकौतुकेन तुरगारूढ़ो भ्रमन् पुराद्बहिः कियत्यपि दूरे कुशानुत्पाट्य तन्मूले तक्रं ददानमेकं चाणक्यनामानं ब्राह्मणं ददर्श। तं दृष्ट्वा सकटार उवाच—

वटो, कस्त्वं ? किमत्र कुरुषे ?।

वटुः। चाणक्यशर्म्मा ब्राह्मणोऽहं, साङ्गं वेदमधीत्यानेन पथा विवाहार्थितया गच्छतो मम कुशाङ्कुरेण पदे क्षतं कृतम् तेन-क्षतेन विवाहभङ्गोजातस्तदा प्रतिज्ञां कृतवानस्मि यदस्याः स्वल्पाः कुशं निर्म्मूलं करिष्ये। ततोवृक्षायुर्व्वेदाधिगमः कृतः, नोचेत् प्रतिज्ञापूरणं कथं स्यात्। तदयमभ्युपायः, सुकरोनिर्द्धारितः। तत्क्रमेण कुशा विनश्यन्तीति तथा समाचरन् पूर्णप्रतिज्ञोभवामि।

सकटारः। दिष्ट्या भवता वृक्षायुर्व्वेदाधिगमः कृतोनोचेत् प्रतिज्ञापूरणं कथं स्यात्।

वटुः। यद्ययमुपायोन स्यात् तदाभिचारिककर्म्मणि मम प्रवीणताऽस्त्येव ततः कुशविनाशकामनया होममेव करिष्ये।

तदाकर्ण्य सकटारश्चिन्तयामास अहो अस्य ब्राह्मणस्यामर्षः! उपाय प्रवीणत्वं! यद्ययं मम वैरिणोवैरीभवेत् तदाऽहं वैरोद्धार-कर्म्मणि विनायासेनैव कृतार्थोभवेयम्।

धातुसूत्रम् ।

नाङ्मान शब्दयोर्यङ् माने म्नाऽभ्यासकर्म्मणि ।
या-द-गतौ रा-द-दाने ला-द दाने ग्रहेऽपिच ।
वा-द गत्यां गन्धने च खेऽतिसेवासुखासिषु ।
श्रा-द-पाके स्था-क गतिनिवृत्तौ ङित् प्रसंव्यपात् ।
स्वाभिप्रायप्रकाशे ङित् स्वीकारार्थे स ङित् पुनः ।
विवादविषयस्यैव निर्णये गम्यते तु ङित् ।
उत्पूर्व्वोऽनूर्द्ध्वघटने ङिदुपात्तु सुरार्च्चने ।
मैत्रीसंगतिसत्योस्तु मन्त्रकरणकार्थके ।
मार्गे कर्त्तरि वाच्ये व ङिद्यांकर्म्मकोपि ङित् ।

निर्व्विवादः समाधिर्वा । मनोयोगे तु प्रणिधत्ते अवधत्ते च । आवरणे तु व्यवधानं अन्तर्धानं पिधानञ्च । अन्वेषणे अनुसन्धानं । प्राधान्ये तु प्रधानमिति । ध्मा धमति ध्माता गिरेर्धातव इति शान्तिशतकं । पिबत्यम्बु पिपासार्त्तोभीतं पातिच सर्व्वदा । द अन्नं प्सातिद आह्लादैः प्रातिः, प्राणः, प्राणवान्, द अर्कोभाति, द माति, तङ् मिमीते, यङ् मीयते तण्डुलराशिं ।

म्ना-वेदं मनति द्विजः । द ग्रामं याति । द-विप्राय वस्त्रं राति । द विप्राय धनं ददाति गुरोर्ज्ञानं लाति च । द वाति वायुः । क्तः निर्व्वाणोदीपः । कर्त्तृवाचिरे तु निर्वातोवातः । गन्धनस्थाने हिंसेति वोपदेवः । गन्धनं पोडनं । ख वापयति । इति गतिः । श्रातिः प्रासिः । द-श्राति तण्डुलान् । व घटादि श्रपयति । व-तिष्ठति । ङिदिति प्रसंव्यपादुत्तरः स्थाधातुर्ङित् स्यात् प्रतिष्ठते वितिष्ठते । स्वाभि-

लिप्से वोपादयश्चाद्यशौचे ओहाङ्कसर्पणे।
ओहाल्यागे न आदन्ता श्चतुर्विंशतिसंख्यकाः॥

आदन्तधातुवर्गः॥

इगताविण दावाधेरिङ्दाध्ययन कर्म्मणि।
अधेरिद स्मृतौ वै किन ज्ञाने क्षविन ब्रुहि॥
चिञ्क्षये चिरिनद्रोहेजिजयेऽभिभवेऽपि च।
विपराभ्यां जये ङित् स ज्याने खिजिरिन ब्रुहि।
धिश्चष्टल्यामथधिवि प्रीतौ नाथपिश्वजे॥
डुमिजक्षेपणेऽतृयोरिशशतयां विच्चिनब्रुहि॥

स ङित् स्यात्। त्वयि न तिष्ठते प्रीतिरिति भट्टिः। घटनं सम्बन्धः। कुटुम्बमुत्तिष्ठते गृही गात्रोत्थानं करोतीत्यर्थः। सुरार्चनं देवपूजा। तत्र ङित् आदित्यमुपतिष्ठते। मित्रताकरणे सङ्गतिकरणे च उपादुत्तरः स्थां ङित् स्यात्। दूरस्थोपीश्वर मुपतिष्ठते मैत्रीकरोतीत्यर्थः। गङ्गा यमुनामुपतिष्ठते उपश्लिष्यतीत्यर्थः। मन्त्रएव करणं कारकं। तस्मिन् सति उपपूर्व्वः स ङित् स्यात्। यथा ये सूर्य्यमुपतिष्ठन्ते मन्त्रैः सन्ध्यात्रयं द्विजाः। मार्गे कर्त्तरि वाच्ये उपपूर्व्वः स ङित्। अयं पन्था वाराणसी मुपतिष्ठते, उपादकर्म्मकोपि स ङित् स्यात्। उपतिष्ठते भोक्तुं। स्थाधातुः सकर्म्मकोप्यस्ति यथा चौरोग्रामे लोक मधितिष्ठति। अत्र लोकस्यैव कर्त्तृ समुद्दिष्टत्वं। लिप्सार्थे स्थाधातुरुपादुत्तरोङिद्वा स्यात्। भिक्षुको ब्राह्मणकुलमुपतिष्ठते, उपतिष्ठति। द नद्यां प्रातःस्नाति व पुत्रं स्नपयति। ङस जिहीते ओ हीनः। न जहाति। ओ हीनः। क्तौ हानिः इत्यादन्तवर्गः। इगताविति वनमयति णकारः समानाकृतीनां भेदावगमार्थः। वनमेति। अत्र गतौ द अधीते वेदं वटुः। अधेरुत्तर इधातुः स्मृतौ द विष्णु मध्येति वै पादपूरणे। अत्रापि कानुवन्धफलं नानुवन्धवत्। नचिकेति। क्षवीति न

कस्यचित् शारदीय: प्रलाप: ।

अस्मिन् कलिकातानगरे नाटकाभिनयप्राचुर्य्यमवलोक्य मयाऽपि किमपि नाटकं निर्म्मातुं सङ्कल्प: जात: । अथ तत्र स्वशक्तेर्न्यूनतामवेक्ष्य तच्च प्रहसने परिणमयितुं प्रवृत्तिर्जाता । तत्रापि वस्तु निर्व्वर्त्तुमक्षम: प्रस्तावनामात्रं विरचय्य हृदयस्यौत्सुक्यं निवारितम् । तदेवाऽत्रोपदीक्रियते । क्षमध्वम् ।

निर्वस्तु प्रहसनं ।

(प्रस्तावनामात्रम्)

नान्दी

यस्यालीयत मूर्द्धजेषु जलदश्रेणी मुखे चन्द्रमा:
भ्रूद्वन्द्वे विषमेषुकौसुमधनुर्विद्युत् कटाक्षाञ्चले ।
हास्ये शारदकौमुदी स्तनयुगे मेरुस्तुषाराद्रिणा
बाह्वो: कल्पलतानवोत्थविटपौ नाभौ सरोमानसम् ॥
मौर्व्वी रोमततौ स्मरस्य जयिनी चोर्व्वी नितम्बस्थले
रम्भा चोरुयुगे पदाब्जयुगले फुल्लाब्जलक्ष्मी: स्वयं ।
साऽस्मज्जन्मपरम्पराज्जितमहापुण्यौघलब्धोदय:
कल्याणं गृहिणीजनो वितनुतां गव्योद्य सभ्येषु न: ॥

अपिच

दृष्टिश्चाम्बुजनस्य तस्मनसां भ्रान्त्यै सुशीतं पयः
पुष्टिं सा विदधातु नः परिषदां तुष्टा कुजस्याङ्गना ॥

नान्द्यन्ते-सूत्र-धारः। अलमतिविस्तरेण (आकाशे) कर्णं दत्त्वा-किं ब्रूथ? किट्टशीयं नान्दी अष्टपदा द्वादशपदा वेति? अयि भोः द्विपदा वयं कदाचित्तु प्रियगृहिण्या सह मिलित्वा चतुष्पदाश्च भवामः, नाऽस्ति चान्यपदोन्नतिप्रत्याशा यूयं महाशया वहुपदगौरवाश्च तद्यूयमत्र पदविचारं कुरुत, वयं तु अस्मदेकमात्रशरणं गृहिणीपदमनुसरामः। (पुनराकाशे कर्णं दत्त्वा) किं ब्रूथ अहोनिर्लज्जता सुसभ्यभव्यास्मदनव्यजनपूर्णेऽस्मिन् सदसि प्रगल्भवचसैवं स्त्रीवशतामाकलयसीति, अयि भोः सभ्यतागर्व्विणः सभ्यताया मूलसूत्रमज्ञात्वैव किं सुधा सभ्यताभिमानमातनुथ? सर्व्वात्मना स्त्रीसेवैव सभ्यतायाः परमोत्कर्षमाख्यापयति। किं न पश्यथ यूयं, युष्मच्छिक्षागुरुषु सभ्यतादर्शेषु पाश्चात्यपुरुषेषु स्त्रीणां कीदृशः समुदाचार इति। ते हि—

उच्चैरश्वरथादिरोहणविधौ स्त्रीणामुपेत्य द्रुतम्
पृष्ठं स्वं तदधोऽर्पयन्ति चरणाधानार्थमासां मुदा।
हस्ताग्रञ्च वितत्य वामचरणन्यासाय यत्नात् पुन
र्यानात्ता अवरोहयन्ति पुरतः स्वेषां गुरूणामपि॥

अथवा किमत्र प्रश्नोत्तरपरम्परया वृथाकालहरणेन—

स्वयं शम्भुः सर्व्वं भवसुखमनित्यं परिहरन्
महायोगी नित्यं वहति शिरसैकां निजवधूम्।
तथाऽन्यस्याः पादौ दधदविरतं वक्षसि मुदा
जडत्वं संप्राप्तः शव इव परेषां क्व नु कथा॥

अयि मधुरभाषिणि, मम हृदयवासिनि,
क्वासि विलासिनि रचय सुभाषम् ।
चरणमनुसेवनं, जननतनुपावनम्
कलु सुपिन मम-लोकय दासम् ।
स्मरगरलखण्डनं मम शिरसि मण्डनम्
चरणयुगं तव कोकनदभासम् ।
हृदि सरसि काशतां मम सुचिरदासताम्
सम्यजनेप्विह नयतु विकाशम् ॥

(नेपथ्ये नूपुरशब्दं श्रुत्वा विलोक्य च) अये !—
हृदयाम्बुजेऽवकाशः कुर्वन्निवातीव वसन्तराजलक्ष्मीः
रचितमनोहरवेशा सेषा विलसति कृशाङ्गयद्य ॥

अहो ! प्रत्यहं प्रतिक्षणं तृष्णाविस्फारिताऽनिमेषलोचनम्यास-विविच्छदं परिदृश्यमानमपि क्षणे क्षणे नवतामापद्यते प्रेयसीरूपं तत्रच सत्यमुक्तं "क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीय-तायाः" इति, न जाने कयोपादान परम्परया, कीदृशि च समये विधिना निर्मिताऽसौ कृशाङ्गी, न ज्ञायते च मयापि पूर्व्वपूर्व्वासु जन्मपर-म्परासु कीदृशं सुदुष्करं तपोऽनुष्ठितम्, यस्याखण्डफलमिवाऽसौ दिव्याङ्गना मदीयतामापन्ना ?

किमेष स्वप्नोवा किमियमपि माया किमु मति
भ्रमोऽयं कुसुमं वा फलमपि हि पुण्यैरगणितैः ।
यदेषा तन्वङ्गी चकितहरिणीचञ्चलदृशो
रपाङ्गप्रोल्लासैः विविधरसभङ्गीं वितनुते ॥

(स्मृतिमभिनीय) अहह ! किमेतल्लोकोत्तरसौन्दर्य्यापहृतचेतसा मया वान्तं समश्यते। भवतु—

"नोचेदिन्द्रपुरीसुदुर्लभमिदं रूपं हि वङ्गेऽधुना

निर्म्मातुं प्रभवेत् कथं नु मनुजोदुर्भिक्षरोगाकुलः॥

सत्रापि वङ्गीयानां विशेषतस्तत्राधुनातनकृतविद्यानामकृतविद्यानां वा पाश्चात्यविद्यालयकृताध्ययनानां यूनामात्मसहधर्म्मिणी सौन्दर्य्यादिपक्षपातप्राबल्ये मदङ्गनोत्कर्षः सर्व्वैः स्वीकर्त्तव्यएव। अथवा दूरेऽस्तु तावद्वङ्गीयानां कथा, अस्मिन् खलु सागरावृतसद्वीपधरामण्डलेऽपि नाऽस्याः साम्यमवलोक्यते। तथाह्यपरजातीयासु ललनासु हि—

विड़ालाक्ष्यः काश्चित् स्तनजघनलावण्यरहिता

कृशा दीर्घाकाराः कनकसदृशाताम्रचिकुराः।

परा लम्बोदर्य्यः प्रविरलकचा ह्रस्वचरणा

निनासा वृत्तास्याः कठिनगठना वाऽपि च पराः॥

अथवा स्वर्गच्युता देवकन्येयं, तथा चोक्तम् कविगुरुणा—

अथवा

मानुषीभ्यः कथं नु स्यादस्य रूपस्य सम्भवः।

सडिम्बेलिसमज्योतिर्हि न कूपे जायते क्वचित्॥

भवतु पुनराह्वयामि। आर्य्ये इत स्तावत्।

नटी (प्रविश्य। अज्ज इयम्हि, आणवेदु अज्जो कोणिओओ अणुचिट्ठिअदुत्ति।

सूत्र। आर्य्ये यदि गृहीतनेपथ्याऽसि तदाराधय युगपन्नृत्यगीताभ्यामिमां नव्यसभ्यजनाकीर्णामुद्यानभोजनगोष्ठीम। प्रविष्टेयं त्वदागमनप्रतीक्षमाणा

कान्तं प्रदत्तसङ्केतं यथा भिसारिकेच्छते ।
यथा वा ग्रीष्ममध्याह्ने चातकोनवमम्बुदम् ।

किञ्च

एकश्चन्द्रस्तमोहन्ति न तारा: शतशोऽथवा ।
न गोष्ठी शोभते कापि विना हरिणलोचनाम् ॥

ततश्च वर्त्तमान शिचागुरुभि: समुन्नतसभ्यतादर्शैः श्वेताङ्ग महापुरुषै: ।

क्रीड़ाभोजनपानेषु नाट्ये चोपासनादिषु ।
सर्व्वत्र क्रियते गोष्ठी सार्द्धमर्द्धाङ्गभाग्जनै: ॥
मकारेण विना पूजा तान्त्रिकी निस्फला यथा ।
तथैव निस्फला गोष्ठी स्त्रीणां सन्निधिमन्तरा ॥

तथाहि—

भङ्गीं कुरङ्गनयनास्तरलैरपाङ्गै
र्वैरङ्गोक्तिभिश्च मधुरैर्विविधाङ्गभङ्गैः ।
नातन्वते युवतयोवत यत्र गोष्ठ्यां
गोस्थानमात्रमिह सा नरपुङ्गवाख्या ॥

ततएव सर्व्वत्रैव संघातेषु, विशेषत: पानभोजनोद्यानविहारा द्युत्सवगोष्ठीषु स्त्रीसाहचर्य्यमपरिहार्य्यमेवेत्यधुनातनवङ्गीय-कृतविद्यसभ्यजनैरप्यङ्गीकृतमेव। किन्तु देशस्यास्य कुसंस्काराहत-तया कुलमहिलाकुलस्वातन्त्र्यविरहात् तासु तासूत्सवगोष्ठीषु पवित्र कुलललनासाहचर्य्यमलभमानै: कल्याणानै-

एकरूपतया वाह्यभावदर्शि वैदेशिकचक्षुःषु धूलिरपि निक्षिप्ता किञ्च—

दुग्धस्य यदि तक्रं स्यात् गुड़ञ्च मधुनस्तथा।
कुलजानां प्रतिनिधौ कुलटायाञ्च का क्षतिः॥

तदेहि सङ्गीतकेनाराधयैनत् सदः

नटी। नाऽहं गमिस्सं लज्जइ खु मे हिअअं परपुरुसाणं अग्गदोविनिक्कमिदुं ता कुदो संगीदप्पसंगो।

सूत्र। (मस्तकं कराभ्यां धृत्वा समुपविश्य) आर्य्ये कुतोऽयं ते व्यामोहः?। अद्यापूरणविंशशताब्द्यवसाने मम सहचरीभूत्वा लज्जायन्त्रणामाकलयसि। अयि भोः किमिदं प्रलपितम्? शृणोतु तावदत्रभवती। सम्प्रति हि—

पाश्चात्यशिक्षामधिगत्य सम्यक्
विहाय लज्जामपरैश्च पुंभिः॥
कुलाङ्गना नृत्यति नृत्यरङ्गे
नटाङ्गनानां किमयं प्रलापः।

किञ्च

जगच्चक्षुः सूर्य्योऽपि च सुखमलं नेक्षितुमभू
दसूर्य्यंपश्यत्वं तत इह हि यासां सुविदितम्।
इदानीं स्वाधीना मुखकमलमनाहृत्य कुलजा
यथेच्छं यान्त्येताः सममपरपुंभिस्त्वविचला॥

परं मद्भाग्योपचयान्न सर्व्वासामेव कुलनलनानामेवं व्यवहारः, सन्त्यत्राद्यापि वह्वाः, याः खलूद्यापि प्राचीनपशुभावं यथायथं

सम्प्रतिरथ सर्व्वासु कुलाङ्गनासूदनशिक्षालोकापहृततमोमय लज्जावरणतया स्वैराहारविहारगोष्ठीष्वपि पुंसां साहचर्य्यमाचरितुं प्रवृत्तासु नकोऽपि नटीनर्त्तकीनां नामाऽपि पृच्छेत् यतस्ता एवेतासां स्थानमधिकुर्व्युः। ततश्च नाट्योपजीविनामस्माकं वृत्तिलोपात् सर्व्वथा समूलोच्छेदनमेव नियतम्।

(नेपथ्ये) अब्रह्मण्यमब्रह्मण्यम्।

सूत्र। (आकर्ण्य) अये क एष एवम्विधावसरे अस्मत्समदुःखिताकुलित इव सकरुणमब्रह्मण्यमब्रह्मण्यमित्युदीरयन्मामप्याकुलीकरोति? (अवलोक्य) एषोऽस्मदावाल्यसहचरः ससम्भ्रमं सोत्कम्पं इतएवाभिवर्त्तते। किन्नु खल्वस्यैतावदुद्वेगकारणम्? भवतु प्रतिपालयामीमन्तावत्।

(प्रविश्य यथानिर्द्दिष्टः पारिपार्श्विकः) अब्रह्मण्यमब्रह्मण्यम् (इति सावेगं परिभ्रमति)।

सूत्र। आर्य्य किमेतदत्याहितमुपस्थितम्?
येनाद्य सहजगम्भीरस्य भवतोऽप्येतादृशी विचलता!

पारि। भाव, किमन्यत्, वृत्तिलोपः खल्वस्माकम्।

सूत्र। आर्य्य, कथमिव।

पारि। श्रूयताम् भाव अद्य खलु कलिकातानगरशोभासन्दर्शनोपजातकौतूहलेन मया विचित्रनगरशोभां दर्शं दर्शं समन्तात् परिभ्रम्यातीवश्रान्तिमनुभूय तदपनोदनाय कस्मिंश्चित् मदिरालये प्रविष्टः।

अथ तत्र वहुविधविचित्रकथाप्रसङ्गेषूत्तरोत्तरविस्तृतिं गतेषु

केश्चित् सुमार्ज्जितरुचिगर्व्विविदग्धैः कीदृग उपायः परिकल्पित इति ? ततस्तत्रतेरषु सर्व्वेषु नेत्युच्चार्य्य श्रवणकौतूहलं विहखन्तु तेन पुनरेवाभिहितम् (कर्णे एवमेवम्) ततश्चेदानीम्—

अक्लिष्ट फुल्लकमलोपमकान्तिभाजां
रङ्गे भवेत् कुलभुवां यदि भावभङ्गी।
मोघं कुशीलववधूनटनं, किमत्र
सत्यम्बुजे भजति केतकिनीं द्विरेफः॥

वृत्तिलोपशङ्कयैवमाद्यनेकचिन्ताशतैराकुलोऽहं भवदन्तिकमुपगतः श्रुत्वाभावः प्रमाणम्।

सूत्र। (सहर्षं) आर्य्ये न भेतव्यं न भेतव्यं यद्येवं तदाऽलं हर्षस्थाने परिदेवनेन।

पारि। कथमिव।

सूत्र। (कर्णे एवमेवम्)

पारि। भाव तदा अस्माकमपि कौलीन्यं स्यात्।

सूत्र। जातिभेदविचाराभावे सर्व्वथा सिद्धमेव तत्। नटीं प्रति), आर्य्ये त्वामपीदानीं * विद्यालये प्रेषयिष्यामि। तत्र कियत् कालं शिक्षामधिगत्य पुंभिः सह परीक्षणपरम्परासु प्रतिद्वन्द्वितामाचरन्ती विदुषी भविष्यसि। (पारिपार्श्विकं प्रति) तदा गच्छतु आर्य्यः, वयमप्यविलम्बेन दीक्षिता भवेम॥

(नेपथ्ये मिलितस्वरेण) "कृपाहि केवलं" (सर्व्वे आकर्ण्य) अहोराजवर्त्मनि कश्चिदुत्सवोवर्त्तते वयमपि तत्र गच्छामः।

इति निष्क्रान्ताः सर्व्वे यवनिकापतनम्।

करतालिकाप्रदानानन्तरमैक्यतानवादनञ्च।

भरतवाक्यम्।

कलियुगमाहात्म्य

(विष्णुपुराणादुद्धृत

मैत्रेय उवाच ।

कलेः स्वरूपं भगवन् विस्तराद्वक्तुमर्हसि ।
धर्मश्चतुष्पाद्भगवान् यस्मिन् विप्लवमृच्छति ॥

पराशर उवाच

कलेः स्वरूपं मैत्रेय यद्भवान् प्रष्टुमि

वत्येव समासन्नं वर्त्तते यन्महामुने

ाश्रमाचारवती प्रवृत्तिर्न कलौ नृ

ऋग्यजुर्वेदविनिष्पादनहेतुका ॥

लौ धर्मार्था न वि

ानैव वह्निदेवाम

जातो वली सर्व

न्वभ्य एव वर्णभ्योयोग्यः कन्यावरोधने ॥

न्यैव कलौ शास्त्रं यस्य यद्वचनं द्विज ।

वताश्च कलौ सर्व्वाः सर्व्वः सर्व्वस्य चाश्र

म्यो नाश्रमः कलौ

कलौ स्त्रियोभविष्यन्ति तदा केशैरलङ्कृताः ?

परित्यक्ष्यन्ति भर्त्तारं वित्तहीनं तथा स्त्रियः ।
भर्त्ता भविष्यति कलौ वित्तवानेव योषिताम् ॥

योयोददाति वहुलं स स स्वामी तदा नृणाम् ।
स्वामित्वहेतुः सम्बन्धो भावी नाभिजनस्तदा ॥

गृहान्ता द्रव्यसंघाता द्रव्यान्ता च तथा मतिः ।
अर्थाश्चात्मोपभोगान्ता भविष्यन्ति कलौ युगे ॥

स्त्रियः कलौ भविष्यन्ति स्वैरिण्योललितस्पृहाः ।
अन्यायावाप्तवित्तेषु पुरुषाश्च स्पृहालवः ॥

अभ्यर्थितोऽपि सुहृदा स्वार्थहानिं न मानवः ।
पणार्द्धार्द्धमात्रेऽपि करिष्यति तदा द्विज ॥

समानपौरुषञ्चेतो भावि विप्रेषु वै कलौ ।
क्षीरप्रदानसम्बन्धि भावि गोषु च गौरवम् ॥

अनावृष्टिभयप्रायाः प्रजाः क्षुद्भयकातराः ।
भविष्यन्ति तदा सर्व्वा गगनासक्तदृष्टयः ॥

कन्दपर्ण फलाहारा स्तापसा इव मानवाः ।
आत्मानं पातयिष्यन्ति तदा वृष्ट्यादिदुःखिताः ॥

दुर्भिक्षमेव सततं तदा क्लेशमनीश्वराः ।
प्राप्स्यन्ति व्याहतसुखप्रमोदा मानवाः कलौः ॥

अस्नानभोजिनोनाग्निदेवतातिथिपूजनम् ।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम ॥

वहुप्रजाल्पभाग्यश्च भविष्यन्ति कलौ स्त्रियः ॥
उभाभ्यामथ [illegible]
कुर्व्वन्त्यो गुरुभर्तॄ [illegible]
स्वपोषणपराः क्षुद्रा देहसंस्कार[illegible]
परुषानृतभाषिण्यो भविष्यन्ति कलौ स्त्रियः ॥
दुःशीला दुष्टशीलेषु कुर्व्वन्त्यः सततं स्पृहाम् ।
असद्वृत्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः ॥
वेदादानं करिष्यन्ति वटवश्च तथाऽव्रताः ।
गृहस्थाश्च न होष्यन्ति न दास्यन्त्युचितान्यपि ॥
वनवासा भविष्यन्ति ग्राम्याहारपरिग्रहाः ।
भिक्षवश्चापिमित्रादिस्नेहसम्बन्धयन्त्रिताः ॥
अरक्षितारोभर्त्तारः शुल्कव्याजेन पार्थिवाः ।
हारिणोजनवित्तानां संप्राप्ते तु कलौ युगे ॥
योयोऽश्वरथनागाढ्यः स स राजा भविष्यति ।
यश्च यश्चाऽवलः सर्व्वः स स भृत्यः कलौ युगे ॥
वैश्याः कृषिवणिज्यादि संत्यज्य निजकर्म्म वत् ।
शूद्रवृत्त्या प्रवर्त्स्यन्ति कारुकर्म्मोपजीविनः ॥
भैक्ष्यव्रतास्तथा शूद्रा प्रव्रज्यालिङ्गिनोऽधमाः ।
पाषण्डसंश्रयां वृत्तिमाश्रयिष्यन्त्यसंस्कृताः ॥
दुर्भिक्षकरपीड़ाभिरतीवोपद्रुता जनाः ।

अधर्मवृद्धा लोकानां मूल्यमायुर्भविष्यति ॥
अशास्त्रविहितं घोरं तप्यमानेषु वै तपः ।
नरेषु नृपदोषेण बालमृत्युर्भविष्यति ॥
भविता योषितां सूतिः पञ्चषट्सप्तवार्षिकी ।
नवाष्टदशवर्षाणां मनुष्याणां तथा कलौ ॥
पलितोद्भवश्च भविता तदा द्वादशवार्षिकः ।
नाति जीवति वै कश्चित् कलौ वर्षाणि विंशति ॥
अल्पप्रज्ञा वृथानिन्दा दुष्टान्तःकरणाः कलौ ।
यतस्ततो विनश्यन्ति कालेनाल्पेन मानवाः ॥
यदा यदा हि पाषण्डवृद्धिर्मैत्रेय लक्ष्यते ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥
यदा यदा नराज्ञानादीश्वरः पुरुषोत्तमः ।
इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम् ॥
न प्रीतिर्वेदवादेषु पाषण्डेषु यदा रतिः ।
कलिवृद्धिस्तदा प्राज्ञैरनुमेयं द्विजोत्तमः ॥
कलौ जगत्पतिं विष्णुं सर्व्वस्रष्टारमीश्वरम् ।
नार्च्चयिष्यन्ति मैत्रेय पाषण्डोपहता नराः ॥
किं वेदैः किं द्विजैर्देवैः किं शौचेनाम्बुजन्मना ।
इत्येवं विप्र वक्ष्यन्ति पाषण्डोपहता नराः ।
अल्पवृष्टिश्च पर्ज्जन्यः शस्यं स्वल्पफलन्तथा ।
फलं तथाल्पसारञ्च विप्र प्राप्ते कलौयुगे ॥

ऽनवस्थापत्तेः। यत् श्रुतिषु आनन्दात्मत्वेन प्रसिद्धं, तथाहि सत्यं ज्ञानमनन्तं ब्रह्मेति। धनार्ज्जनकर्म्मादेः कुञ्जरशौचवत्दुःखा-निवर्त्तकत्वे न तत्र प्रवृत्तिर्विधेयेति श्रुतिमाह न कर्म्मणेति। केचित् प्रजावन्त ऋषयः द्रविणं धनं ईहमाना लब्धुमिप्सवस्तदर्थं यतमाना इति यावत् कर्म्मणा धनप्राप्तिहेतुभूतानि कर्म्माणि कुर्व्वन्त इत्यर्थः मृत्युं मरणं निषेदुः प्रापुः। कर्म्मवशात्ते पुनः पुनः संसार एव संसरन्तिस्म न तु कदाचिन्मोक्षमधिजग्मुरिति भावः। तथा परे अन्ये मनीषिणः ज्ञानिन ऋषयः कर्मभ्यः परं कर्म्मभिरलभ्यं ज्ञानमात्रलभ्यमित्यर्थः अमृतं मोक्षं आनशुः प्राप्तवन्तः केवलेन ज्ञानेनैव तेषां मुक्तिः श्रूयत इत्यर्थः। तदेतत् सर्व्वं कर्म्मफलं ज्ञानफलं अभिप्रेत्य विचार्य्य ग्रन्थकारः कारिकायामाह तद्विपरीतः श्रेया-निति—तस्मात् वेदोक्तात् दुःखाऽवघातकात् सोमादेर्विपरीतो-विरुद्धधर्म्मवान् सोमादिर्यथा अविशुद्धः क्षयातिशययुक्तः सङ्करश्च, यश्चोपायो न च तथा किन्तु विशुद्धः, हिंसादिसङ्कराभावाद-क्षयो निरतिशयफलश्च स श्रेयान् अयमनयोरतिशयेन प्रशस्यः, श्रेयानिति। तस्य श्रेयस्त्वमुपपादयति असकृदपुनरावृत्तिरिति श्रुतेः—असकृत् पुनः पुनः अनावृत्तिश्रुतेः अनावृत्त्यापादकश्रुतेः श्रुतिश्च एषदेव पथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमाव-र्त्तन्ते, नावर्त्तन्ते तयोर्द्ध्वमापन्नममृतत्वमेति, शश्वदेवं वर्त्तयन् याव-दायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्त्तते, न च पुनरावर्त्तते इति छान्दोग्योपनिषत्। तेषां न पुनरावृत्तिरित्यभ्यस्तानावृत्त्या-पादकबृहदारण्यकश्रुतेश्च।

वारणाय भावकार्य्यस्यैव अनित्यताभ्युपेया प्रकृते च दुःख ध्वंसस्य अभावरूपत्वेन भावत्वाभावान्नित्यत्व सिद्धिरिति भावः। उत्पन्न व्यक्तेः पुनरुत्पादासम्भवादाह दुःखान्तरेति कारणा प्रवृत्तिरेव कथं इत्यत आह विवेकेति। ननु विवेकज्ञानोत्तरमपि कथं न प्रवर्त्तते इत्यत आह तत्त्वोपरिष्टादिति। "यथाक्रियाः संप्रवर्त्तन्ते लोका इत्यारभ्य न पुनर्दर्शनमुपैति पुरुषस्य इत्यन्तग्रन्थे अत्वरार्थ-स्त्विति नन्वपकृष्टस्यापि तद्विपरीतस्य सम्भवेनातएव श्रेयनिति कथनासङ्गतिरिति परास्तम्, अतएव ऐकान्तात्यन्तिक दुःखा-पघातकहेतुत्वादेव। सत्वपुरुषान्यताख्यातिरूपसाधनस्य प्रशस्य तरत्वलाभाय मात्रपदोपादानम्। अल्पकालावच्छिन्नमानसाति रक्तदुःखापघातकत्वादिति समुदायार्थः। मृदादिकं सजातीयकार-णकं कार्य्यत्वादित्यनुमानेन मृदादिना व्यक्तेनाव्यक्तानुमानं। तयो-र्व्यक्ताव्यक्तयोः पारार्थ्येन पुरुषभोगापवर्गहेतुत्वेन (१)। ननु सत्त्वपु रुषान्यताख्यातिरूपस्य पुरुषार्थहेतोः सत्त्वपुरुषज्ञानाधीनत्वात् व्यक्त ज्ञानाधीनत्वाभिधानं व्यर्थमिति, अत आह इति ज्ञानक्रमेणेति तथा च यतोव्यक्तज्ञानं विनाऽव्यक्तज्ञानं न सम्भवति तदुभयज्ञानं विना च पुरुषविज्ञानमतस्तथाभिधानं इति भावः। ननु श्रवणा-दिभिरेव व्यक्तादिज्ञानेन सत्त्वपुरुषान्यताख्यातेः सम्भवेन मनना-त्मकमिदं शास्त्रं व्यर्थमित्याशङ्कानिरासार्थमाह—एतदुक्तम्भव-तीति तथात्मविपरीतभावनादिनोपयोगित्वान्न मननात्मक

---

(१) यत् यत् संहतं तत् परार्थं सम्भूयकारित्वात् गृहादिवत्, व्यक्ताव्यक्तादयोऽपि सम्भूयकारिणः ततश्च ते परार्था इत्यनुमानेन भिन्नतया पुरुषोज्ञेयः। सम्भूयकारित्वञ्चेतरसाहाय्येनार्थक्रिया-

शास्त्रस्य वैयर्थ्यमिति भावः। अतएव इन्द्रविरोचनयोर्गुरुमुखा-च्छ्रवणे समानेऽपि मननरतस्येन्द्रस्यैव तत्त्वज्ञानं, नतु विरोचनस्येति श्रवणम्। ननु अनादि जन्मपरम्पराश्लिष्टेन परिपन्थिना संस्कारेण मनने कृतेऽपि साक्षात्कारप्रतिबन्धः स्यादत आह दीर्घकालेति। आदरपदेन श्रद्धा ग्राह्या, सत्कारपदेन ब्रह्मचर्य्यविद्यावैराग्यादयः, तथा च तादृशसाधनसम्पन्नमननजन्यबोधेन तादृशसंस्कारोऽभि-भूयत इत्यर्थः। अस्मिन्नर्थे ग्रन्थकर्त्तुः स्वमतमाह तथाचेति अपरिमेयं अनपेक्षि, असम्बन्धि वा।

हाम्लेट-चरितम्।

(पूर्व्वानुवृत्तिः)

नृपेण तेन व्यवहर्त्तुमद्य
सामर्थ्यमस्मादधिकञ्च किञ्चित्
न चार्पयामोभवतोः स्वतन्त्रम्।
न वा भवन्तौ लिखितातिरिक्तं
किञ्चित् विधत्तां, युवयोः शिवोऽस्तु
पन्थाः, त्वरा कार्य्यविधायिनो च॥

कर्णिलियस, भलाटमण्डौ।

कार्य्येऽत्र चान्येष्वखिलेष्ववेहि
कर्त्तव्यनिष्ठौ खलु नौ सदैव॥

राजा। सन्देहलेशोन च कश्चिदत्र
शिवोऽस्तु [illegible]

वक्तु, किमिच्छा कथयस्व तावत्,
किञ्चित् त्वया प्रार्थितमेव पूर्व्वं
किमस्ति तन्मे वद लैरतेश।
विशङ्क मोघां मयि याचनां चे
न्न वक्तुमिच्छु र्वद तत् किमेवं
त्वयार्थितं स्यात् प्रियलैरतेश ?
किमस्त्यदेयं भवताप्ययाचऽम्
शिरोयथान्तःकरणानुबन्धि,
मुखञ्च हस्तोपकृतं यथा वा।
सिंहासनं डेनजनाधिपीयं
पितुस्तवैवाऽनुगतं तथेदम्॥
किं लैरतेशेच्छसि ?

लैर।———मत् प्रियेश
तवाभ्यनुज्ञां प्रति यातुमेव
फ्रान्सप्रदेशं यत आगतोऽहं
मुदा स्वयं दर्शयितुं तवाऽस्मिन्
राज्याभिषेके स्वमनोऽनुरक्तिम्।
जानेऽधुना कार्य्यमिदं सुसिद्धं।
यानाय तस्मात् पुनरेव तत्र फ्रान्से ममेच्छा प्रवणा मतिश्च,
ततोऽर्थये त्वत्सकृपाभ्यनुज्ञां ममाऽपराधस्य विमर्षणञ्च।

राजा। लब्धाऽभ्यनुज्ञा स्वपितुस्त्वया किम् ?
किं पोलोनियस् वदसि त्वमत्र।

पोलो। लब्धा सखेदानुमतिश्च मत्तः
स्वामिन् मुहुः प्रार्थनया ; यदाऽसौ—

सांख्यतत्त्वकौमुदी ।

तदेवं प्रेक्षावदपेक्षितार्थत्वेन शास्त्रारम्भं समाधाय शास्त्र मारभमाणः श्रोतृबुद्धिसमवधानाय तदेवं संक्षेपतः प्रतिजानीते । (१)

मूल प्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोड़शकस्तुविकारोन प्रकृतिर्नविकृतिः पुरुषः ॥३॥

पदच्छेदः । मूल-प्रकृतिः, अविकृतिः, महत्-आद्याः, प्रकृति-विकृतयः, सप्त, षोड़शकः, तु, विकारः, न, प्रकृतिः, न, विकृतिः, पुरुषः । पदार्थः । प्रकरोतीति प्रकृतिः कारणं, मूला चासौ प्रकृतिश्चेति मूलप्रकृतिः आद्या प्रकृतिः परमाणुपर्य्यन्तपरममहदवधिकस्यास्य ब्रह्माण्डमण्डलस्योपादान कारणमिति यावत् । अविकृतिः विक्रियते इति विकृतिः कार्य्यं न विकृतिः अविकृतिः न कस्यापि कार्य्यमित्यर्थः । महदाद्याः—महान् नाम प्रकृतेरुत्पन्नः अहङ्कारस्योपादानरूपस्तत्त्वविशेषः सः (महान्) आद्यः प्रथमो यासां प्रकृतिविकृतिरूपाणां ताः) महादाद्याः । महत् प्रभृतय

---

(१) पूर्व्वोत्तरार्थयोः सङ्गतिं प्रदर्शयितु संक्षेपेणोक्तं व्यूह चतुष्टयं प्रेक्षावदितयादिनानुवदन् पञ्चविंशत्तत्त्वरूप शास्त्रार्थं प्रतिज्ञायाः फलं दर्शयति तदेवेतयादिना प्रकृतस्य पुरुषाऽव्यक्ताख्याति प्रतियोगिकथनेनोपद्घातसङ्गतिरिति सूचितम् । तथाच चिन्तां प्रकृति सिद्धार्थामुपोद्घातं विदुर्बुधाः इति लक्षणात् । श्रोतृ बुद्धि समा-

इति यावत्। प्रकृति विकृतयः प्रकृतयश्चता विकृतयश्चे ति प्रकृति-विकृतयः कार्य्यकारणोभयरूपा इति यावत्। सप्त सप्तसंख्याकाः। षट् अधिकदश परिमाणमस्य इति षोड़शः ततः स्वार्थेकप्रत्ययः षोड़शकः, तु पूर्व्वव्यवच्छेदार्थः, अवधारणार्थश्च विकारः विकृतिः कार्य्यमिति यावत्। न प्रकृतिः (न कारणं)। न विकृतिः (न कार्य्यं)। पुरुषः पुरि शेते इति पुरुषः चित्-शक्ति श्चैतन्यम्।

अन्वयः। मूलप्रकृतिरविकृतिः, महदाद्याः सप्त प्रकृति विकृतयः विकारस्तु षोड़शकः (षोड़शकएव), पुरुषः न प्रकृतिर्न (वा) विकृतिः।

भावार्थः। सांख्यमते पञ्चविंशतितत्त्वानि पदार्था वा, तन्मयमेवैतत्सचराचरं जगन्मण्डलं। तानि च—(१) प्रकृतिः, (२) महान्, (३) अहङ्कारः, (४-८) पञ्चतन्मात्राणि—शब्द तन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रमिति, (९-१३) पञ्चमहाभूतानि—क्षितिः अप् तेजः, वायुः, आकाशमिति, (१४-२४) एकादशेन्द्रियाणि—वाक्, पाणि, पाद, पायु, उपस्थरूपाणि पञ्च कर्म्मेन्द्रियाणि, चक्षुः, श्रोत्र, नासिका घ्राण रसना रूपाणि, पञ्चज्ञानेन्द्रियाणि, मनश्चान्तरिन्द्रियमन्तःकरणमिति, (२५) पुरुषः। एतेषु मूल प्रकृतिः आद्या प्रकृतिः, अविकृतिः न कस्यापि कार्य्यं किन्तु [illegible] कारणरूपैव सा, तस्याः कारणान्तरस्वीकारे अनवस्थाप्रसङ्गादिति भावः। महदाद्याः सप्त महान् अहङ्कारः पञ्चतन्मात्राणि च प्रकृतिविकृतयः एतेषु कार्य्यत्वं कारणत्वमितुभयविधधर्म्मोवर्त्तते इति भावः, तथाहि महान् प्रकृतेः कार्य्यं, कारणञ्चाहङ्कारस्य, एवमहङ्कारः महतः कार्य्यं कारणञ्च पञ्चतन्मात्रेन्द्रियाणां तथा

कार्य्यरूपाणि तेषां स्वातन्त्र्येण न कस्यापि कारणत्वं स्वीकृतमिति भावः। पुरुषस्तु न कस्यापि कार्य्यं कारणम्वा पुरुषो न कस्मादुत्पन्नं तस्मादपि न किञ्चिदुत्पन्नमिति भावः। प्रकृति सर्गश्च विष्णुपुराणस्य प्रथमेंऽशे सविस्तरमुक्तः। यथा—

नाहो न रात्रिर्न नभो न भूमि-
र्नासीत् तमो ज्योतिरभून्न चान्यत्।
श्रोत्रादिबुद्ध्यानुपलभ्यमेकं
प्राधानिकं ब्रह्म पुमांस्तदासीत्॥
विष्णोः स्वरूपात् परतोहि तेऽन्ये
रूपे प्रधानं पुरुषश्च विप्र!।
तस्यैव तेऽन्येन धृते वियुक्ते
रूपेण तत् तद् द्विज! कालसंज्ञम्॥

प्रकृतौ संस्थितं व्यक्तमतीतप्रलये तु यत्। तस्मात् प्राकृतसंज्ञोऽयमुच्यतेप्रतिसञ्चरः॥ अनादिर्भगवान् कालो नान्तोऽस्य द्विज! विद्यते। अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः॥ गुणसाम्ये ततस्तस्मिन् पृथक् पुंसि व्यवस्थिते। कालस्वरूपं रूपं तद् विष्णोर्मैत्रेय! वर्त्तते॥ ततस्तत् परमं ब्रह्म परमात्मा जगन्मयः। सर्व्वगः सर्व्वभूतेशः सर्व्वात्मा परमेश्वरः॥ प्रधानं पुरुषञ्चापि प्रविश्यात्मेच्छया हरिः। क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ॥ यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते। मनसोनोपकर्त्तृत्वात् तथाऽसौ परमेश्वरः॥ स एव क्षोभको ब्रह्मन् क्षोभ्यश्च पुरुषोत्तमः।

भूतिः सर्गकाले द्विजोत्तम !॥ प्रधानतत्त्वमुद्भूतं महान्तं तत्
समावृणोत्। सात्त्विकोराजसश्चैव तामसश्च त्रिधा महान्।
प्रधानतत्त्वेन समं त्वचा वीजमिवावृतम्॥ वैकारिकस्तैजसश्च
भूतादिश्चैव तामसः। त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत॥
भूतेन्द्रियाणां हेतुः स त्रिगुणत्वान्महामुने !। यथा प्रधानेन महान्
महता स तथावृतः॥ भूतादिस्तु विकुर्व्वाणः शब्दतन्मात्रिकं ततः।
ससर्ज्ज शब्दतन्मात्रादाकाशं शब्दलक्षणम्। शब्दमात्रं तथाकाशं
भूतादिं स समावृणोत्॥ आकाशस्तु विकुर्व्वाणः स्पर्शमात्रं
ससर्ज्ज ह। वलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः॥ आकाशं
शब्दमात्रन्तु स्पर्शमात्रं समावृणोत्। ततो वायुर्व्विकुर्व्वाणोरूप-
मात्रं ससर्ज्ज ह। ज्योतिरुत्पद्यते वायोस्तद्रूपगुणमुच्यते। स्पर्श-
मात्रन्तु वै वायूरूपमात्रं समावृणोत्॥ ज्योतिश्चापि विकुर्व्वाणं
रसमात्रं ससर्ज्ज ह। सम्भवन्ति ततोऽम्भांसि रसाधाराणि तानि
च। रसमात्राणि चाम्भांसि रूपमात्रं समावृणोत्। विकुर्व्वा-
णानि चाम्भांसि गन्धमात्रं ससर्ज्जिरे। संघातोजायते तस्मात्
तस्य गन्धोगुणो मतः॥ तस्मिं स्तस्मिंस्तु तन्मात्राः तेन तन्मात्रता
स्मृता॥ तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते। न शान्ता
नापि घोरास्ते न मूढाश्चाविशेषणः॥ भूततन्मात्रसर्गोऽयमहङ्का-
रात् तु तामसात्। तैजसानीन्द्रियाण्याहुर्द्देवा वैकारिका दश॥
एकादशं मनश्चापि देवा वैकारिकाः स्मृता। त्वक् चक्षुर्नासिका
जिह्वा श्रोत्रमत्र च पञ्चमम्। शब्दादीनामवाप्त्यर्थं वुद्धियुक्तानि
वै द्विज !॥ पायूपस्थौ करौ पादौ वाक् च मैत्रेय ! पञ्चमी।
विसर्गशिल्पगत्युक्तिः कर्म्म तेषाञ्च कथ्यते॥ आकाशवायुतेजांसि
सलिलं पृथिवी तथा। शब्दादिभिर्गुणैर्ब्रह्मन् ! संयुक्तान्युत्तरो-

तथाहि—

तथैवनन्दभूपेन चाणक्यः भ्रातृवीकृतः ।
आहूय ज्ञानदौर्ब्बल्यात् कालसर्पः प्रकोपितः ॥

क्रुद्धस्तु चाणक्यः प्रतिज्ञां कृतवान् । तद् यथा—

"यावन्न प्रहिणोमि नन्दमवनीनाथं यमस्यालयं
यावन्नात्र नृपं करोमि वृषलं तस्यैव सिंहासने ।
यावच्चास्य तु मन्त्रिराक्षसमहं नामात्यतामानये
मुक्तां मूर्द्धि, शिखां न तावदशमोवध्नामि चैनां पुनः ॥"

एवं कृतप्रतिज्ञः स चाणक्यश्चन्द्रगुप्तनामानं राजवृषलं द्वारि दृष्ट्वाऽवोचत् । रे वृषल, यद्यस्मिन्राज्ये राजा भवितुमिच्छसि तदा मामनुगच्छत ।

वृषलश्च तथाविधगुभादृष्टप्रेरितस्तमनुजगाम । चाणक्यस्तु तेन वृषलेनानुगम्यमानस्तपोवनं गत्वा आभिचारिकेन तोयेन नवापि नन्दान् यमनिकेतनं नीतवान् ।

ततस्तस्याभिचारिकप्रयोगप्रभावेण नन्देषु विनष्टेषु चाणक्यश्चिन्तयामास यदेका तावत् प्रतिज्ञा पूर्णा, तदिदानीं चन्द्रगुप्तवृषलं नन्दसिंहासने राजानं कृत्वा द्वितीयां पूरयामि । राजा च विना सेनया कुतः सम्भवति ? सेना च धनाधीना, धनञ्च सम्प्रति मम हस्ते नास्ति, तत् किं करवामीति ।

ततः परामृश्य पर्व्वतकेश्वरं राजानमुपसर्प्योवाच—"राजन् पर्व्वतकेश्वर, कुमारोऽयं चन्द्रगुप्तो मया कुसुमपुरे राजा कर्त्तव्यस्ततो भवानिमं स्वबलैरूपकृत्यार्द्धराज्यं गृह्णातु इति ।

चन्द्रगुप्तं नन्दप्रदेशं कुसुमपुरं गत्वा राजानञ्चकार। लब्ध-राज्ये तु चन्द्रगुप्ते राक्षसप्रयुक्तेन पुरुषेणोपायनीकृतां सुन्दरीं चन्द्रगुप्तपुरतोनृत्यन्तीं तदीयश्रमजलपानघूर्णमानाभिर्मक्षिकाभि र्विषकन्येयमिति चाणक्यः परिचिन्त्य चिन्तयामास यदियं विष-कन्या चन्द्रगुप्तवधाय राक्षसेन परद्वारा प्रहिताऽस्ति, तदाऽनयैवार्द्ध राज्यहरस्य वधो भवतु, तदनन्तरं तां विषकन्यां तस्यैव पुरुषस्य द्वारा पर्व्वतकेश्वराय दापितवान्, तस्याश्च संभोगलुब्धे तपस्विनि पर्व्वतकेश्वरे मृते चन्द्रगुप्तस्य निष्कण्टकं राज्यं कृत्वा चाणक्यः पुनश्चिन्तयामास यदियं द्वितीया मम प्रतिज्ञा पूर्णा, तदिदानीं मलयकेतोर्भूपालस्य राज्याद्राक्षसं समानीय चन्द्रगुप्तस्य मन्त्रितां ग्राहयित्वा पूर्णप्रतिज्ञोभवामि। तदर्थमपि कृतएवास्त्युपायः, राक्षसस्य प्रियमित्रचन्दनदासो वसत्येवाऽत्र तस्य स्थाने राक्षसस्य गृहजनाः सन्त्येव। अन्यच्च धर्म्मभट प्रभृतिभिः पुरुषैश्च राक्षसनामा-ङ्कितमुद्रा समानीय दत्ता। सा राक्षसहस्ताङ्गुलीलिङ्गेति तया मुद्रयाङ्कितं सकटदासलिपिभूषितं पत्रं मलयकेतुं सेवमानस्य मम सहाध्यायिमित्रस्य भागुरायणस्य हस्ते प्रविष्टमेव। सकट-दासोऽपि मया निःसारिता राक्षस मन्ववर्त्तत एवं भद्रभटप्रभृतयः शूराः परमाप्ताः समयं कृत्वा धनपरितोषिताः कृत्रिमविरोधं कृत्वा पलायिताः सम्प्रतिमलयकेतोर्विश्वास पात्राण्येव विद्यन्ते। तेन लिखनेन तैः पुरुषैरस्मिन्नवसरे राक्षसमलय केतोः सौहृदभङ्गा-रिणा भवितव्यम्। एवं सम्पन्ने कारणकलापे कार्य्यसिद्धिरपि न सम्यक्तया प्रतिभाति यतः—

सम्पन्ने कारणं व्राते कार्य्यं सम्पद्यते परम।

नन्दा हता राज्यमिदं गृहीतं न्यवारि राज्यार्द्धहरोविपक्षः।
स्तोकाऽवशेषां किल मे प्रतिज्ञां मन्ये क्रमात् पूरयितैव धाता॥

तथापि अप्रमादी भवामि। ततः शार्ङ्गरवनामानं शिष्यमाहूया पृच्छत् वत्स चन्द्र गुप्तमभियोक्तुं कृत प्रयाणस्य मलयकेतोः किं वृत्तम्?।

शिष्यः। सहि अन्तिकमेवागतः किन्तु मन्त्रिराक्षसस्य सनिकारं निःसारणाद् व्याहृत्य त्रीणि दिनानि पथि विलम्बितः।

चाणक्यः। आः कथं राक्षसस्यापि निकारः? किन्तत् निमित्तम्?

शिष्यः। गहनं खलु राजचरितं क्वचिन्निमित्तनिरपेक्षापि क्रिया सम्भाव्यते। राक्षसनिकारे त्विदं निमित्तं यत् सकटदासलिपिविभूषितं पत्रं राक्षसमुद्राङ्कितं राक्षसानुजीविना विपक्षस्थानं नीयमानं वर्त्मनि प्राप्तम्।

चाणक्यः। तदिदं स्थानमेव निकारस्य राजापथ्यकारिणोध्रुवमेव निकारमनुभवन्ति। निकृतोराक्षसः क्वेदानीं श्रूयते।

शिष्यः। मानभङ्गदुःखितः क्वाप्यरण्ये।

ततो राक्षस मित्रस्य चन्दन दासनामवणिजोवधं प्रख्याप्य तद्रक्षणाय कृतप्रयत्नोराक्षसोधृतः चन्द्रगुप्तमन्त्रिपदं ग्राहितश्च। अथ पूर्णप्रतिज्ञ श्चाणक्यःशिखां बद्धा सोत्साहः स्वाभिमतस्थानं जगाम।

रोषोयस्य कृतान्तपत्तनमितो नन्दानव प्राहिणोत्
निर्व्वीजं वृषलाय नूनमभवत्तोषस्तु राज्यप्रदः।
स ख्यातः किल विद्यया च सकले बुद्धा च भूमण्डले
[illegible]

॥ स्वप्ननिद्राज्ञानावलम्बनं वा ॥ ३८ ॥

पदच्छेदः । स्वप्न-निद्रा-ज्ञान-अवलम्बनं, वा ।

पदार्थः । प्रत्यस्तमितबाह्येन्द्रियप्रवृत्तेर्मनोमात्रेणैव यत्र भोक्तृत्वं आत्मनः सः स्वप्नः । निद्रा तु पूर्व्वोक्तलक्षणा । तयोर्यत् ज्ञानं स्वप्नावस्थायां निद्रावस्थायाञ्च यादृशं ज्ञानं, भवति तादृशं ज्ञानं आलम्बनं यस्य एवं भूतं योगिनश्चित्तं, वा अथवा ।

अन्वयः । स्वप्न-निद्रा-ज्ञानावलम्बनं वा योगिनश्चित्तं स्थितिपदं लभत इति शेषः ।

भावार्थः । यत् स्वप्ने निद्रायाञ्च ज्ञानं तदपि योगी जाग्रदवस्थायां अवलम्बेत, तथाहि यथा निद्रायां सर्व्वेभ्यो विषयेभ्यश्चित्तं निवर्त्तते, तथा जाग्रदवस्थायामपि यदि योगिनश्चित्तं सर्व्वेभ्यो विषयेभ्यो निवर्त्तेत, यथा च स्वप्ने सर्व्वं मिथ्या तथा जाग्रदवस्थायामपि सर्व्वं मिथ्येति विचारयेत् ततः समाधिः सिध्यति । वाचस्पति मिश्रस्त्वेवं व्याख्यातवान्, यदा खल्वयं स्वप्ने विविक्तवनविवर वर्त्तिनीं चन्द्रमण्डलादुन्मिषन्तीमिव कोमलमृणालमञ्जुलबाहु-कातिशिरश्चन्द्रमनोज्ञे योगी कामपि कामिनीं दृष्ट्वा प्रबुद्धः प्रसन्न-मनास्तदा तामेव स्वप्नज्ञानावलम्बीभूतां अनुचिन्तयतस्तस्य तदेकाकारचित्तस्य चित्तं स्थितिपदं लभते । एवं निद्रायां सुखमहमस्वाप्समिति प्रत्यवमर्शो भवति यथाभूतज्ञानावलम्बनमपि चित्तस्थिरता सिध्यति ।

यत् सुखं जायते तत्र धारयेत्, एवं स्वप्ननिद्राज्ञेयालम्बनं चित्तं स्थितिं लभते ।

यथाभिमतध्यानाद्वा ॥ ३९ ॥

पदच्छेदः । यथा—अभिमत--ध्यानात्, वा ।

पदार्थः । अभिमतं अभीष्टं अनतिक्रम्य ध्यात्वा चित्तमाहा ।

अन्वयः । वा (अथवा) यथाभिमतध्यानात् चित्तमेकाग्रतां लभते इति शेषः ।

भावार्थः । बहूनां यदेवाभिमतं हरिहरमूर्त्यादिकं तदेवादौ ध्यायेत् । तस्मादपि ध्यानात्तत्र लब्धस्थितिकाः चित्तस्यान्यत्रापि विवेकपर्य्यन्तसूक्ष्मेषु विषयेषु साधनान्तरं स्थितिर्योग्यता भवतीत्यर्थः । केचित् यथाभिमते वस्तुनि बाह्ये चन्द्रादौ, अभ्यन्तरे नाडी चक्रादौ वा भाव्यमाने चेतः स्थिरं भवतीत्याहुः ।

Or by the contemplation of that which one likes most.

वृत्तिः । किं बहुना यदेवेष्टं शिवरामकृष्णादिरूपं तदेवध्यायेत्, तत्र लब्धस्थितिकमन्यत्रापि स्थितिं लभते । अभिमतमनतिक्रम्य यथाभितं तस्य ध्यानादिति विग्रहः ।

ननु चित्तस्य स्थितिर्जायत इत्यत्र किं ज्ञापक मित्यत्राह—

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४० ॥

पदच्छेदः । परमाणु-परम-महत्त्व-अन्तः, अस्य, वशीकारः ।

पदार्थः । परमाणुर्नाम क्रमशोभिद्यमानस्य वस्तुनोऽनिरवयव सूक्ष्मांशविशेषो, यः पुनर्भक्तुं न शक्यते, परममहत् नाम आकाशादि यदपेक्षया महत् नास्ति, परमाणुश्च परममहांश्च तयोर्भावः परमाणुपरममहत्त्वं तदेव अन्ते अवसाने यस्य सः, परमाणु परममहत्त्वान्तः । अस्य एकाग्रतापन्नस्य चेतसः अथवा एकाग्रचेतसो यो-

भावार्थः। यस्य पुनर्योगिनश्चित्तं पूर्व्वोक्तानामुपायानामन्यतमे नैकाग्रतां प्राप्नोति, तस्य तादृशस्य चित्तस्य अतिसूक्ष्मादारभ्य अतिस्थूल पर्य्यन्तं यावद्वस्तु तत्र स्वायत्तता भवति, चित्तं यथाकामं सर्व्वेष्वेव वस्तुनि लब्धप्रवेशं तदेकाग्रतामाशु प्राप्नोतीत्यर्थः।

From a particle to the extremly large, all is in his power.

वृत्तिः। अस्य चित्तस्य सूक्ष्मे निविशमानस्य यः परमाण्वन्तो-वशीकारः अप्रतिघातः तथा स्थूले निविशमानस्य परममहत्त्वा-काशान्तोऽप्रतिघातः तेन परेण वशीकारेण चित्तं लब्धस्थितिकं इति ज्ञात्वा स्थितुरुपायानुष्ठानादुपरमत इत्यर्थः।

एवं चित्तस्थितेरुपाया उक्ताः ज्ञापकश्च वशीकार उक्तः संप्रति लब्धस्थितिकस्य चित्तस्य किं विषयः किं रूपश्च संप्रज्ञातोयोगोभवतीति उत्तरं पठति।

क्षीण वृत्तेरभिजातस्येव मणेर्ग्रहीतृ

ग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः॥ ४१॥

पदच्छेदः। क्षीणवृत्तेः, अभिजातस्य, इव, मणेः, ग्रहीतृ, ग्रहण, ग्राह्येषु, तत्स्थ-तदञ्जनता, समापत्तिः।

पदार्थः। क्षीणा लीना मन्थरत्वं प्राप्ता इति यावत् वृत्तयो व्यापारा यस्य सः, अभिजातस्य संस्कारेण निर्म्मलस्य मणेरिव, स्वाभाविक प्राप्तोज्ज्वलस्य स्फटिकमणेरिवेति वा ग्रहीतृ ग्रहण ग्राह्येषु ग्रहीता ज्ञानफलभोगी आत्मा, ग्रहणं ज्ञानसाधनमिन्द्रियाणि, ग्राह्यं ज्ञेयं वस्तु, विषय इति यावत् ग्रहीता च, ग्रहणञ्च, ग्राह्यञ्च, तेषु, तत्स्थतदञ्जनता, तत् तिष्ठतीति तत्स्थं, तदञ्जनत्वं तन्मयता तदाकारपरिणाम इति यावत्, तत्स्थस्य तदञ्जनता तत्-स्थतदञ्जनता (६ष्ठीतत)

ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिरिति कथ्यते इति शेषः।

भावार्थः। यथा संस्कारेण क्षीणस्वस्वापद्दोषाणि विशिष्टो माञ्जि- [illegible] स्फटिकमणिर्यो यद्यद्वस्तु आश्रयति तद्रूपं प्राप्नोति तदाकारेण परिणमते इति यावत्, [illegible] शुद्धसत्त्वप्रधानस्य चेतसः ग्रहीतृ, ग्रहण ग्राह्येष्विति व्युत्क्रमेणोक्ते-ष्वपि स्थूलिकायक्रमात् [illegible] ग्रहीतृष्विति बोद्धव्यम्; ततः प्रथमं [illegible] ग्रहीतरि [illegible] ग्राह्यग्रहणग्रहीतृणां मध्येष्विति यावत्, यत्र कस्यचिद्ध्येयवस्तुनः [illegible]-गमः समापत्तिः। [illegible] स्थूलसूक्ष्म [illegible] चित्तं तदाकारेण परिणमते, सा च [illegible] एवं ग्रहणे ग्रही-तरि च [illegible] बोद्धव्यम्। एतच्च १७ सूत्रस्य व्याख्या-नाऽवसरे निरूपितम्।

As a pure gem reflects an object near it and presents its form and its colour; so the heart free from all (other) feeling shows one feeling in which the spirit, an object, and its knowledge are reflected. this is its, proficency.

वृत्तिः। यथाभिजातस्य कुलीनस्यातिस्वच्छस्य स्फाटिकमणेः जपा-कुसुमाद्युपरागस्वरूपाभिभवेन रक्ताद्याकारता भवति, तथाऽभ्यास-वैराग्याभ्यां क्षीणरजस्तमोवृत्तिकस्य चित्तमणेः स्थूलसूक्ष्मभूता-त्मकग्राह्येषु ग्रहणेष्विन्द्रियेषु ग्रहीतरि पूर्वोक्तवितर्कविचारानन्दा-स्मितानुगमात् चतुर्विधस्तद्विषयकः प्रतिभासः। अत्र सूत्रे अर्थक्रम-बलात् लब्धा ग्राह्यग्रहणग्रहीतृषु तत्स्थस्य तदुपरक्तस्य चित्तस्य

भिन्नं पदं अविभक्तमिव स्यात् तं ग्राह्यं क्षीणवृत्तेः तत्स्थमिति योग्यं यद्वा तत्स्थं च तदञ्जनञ्च तस्य भाव स्तत्ता क्षीणवृत्तेस्तथा समापत्ति रित्यर्थः सेयं संप्रज्ञाताख्या समापत्तिः पुनरवान्तरभेदैश्च-तुर्धा भवति सवितर्का निर्वितर्का, सविचारा, निर्व्विचारा चेति। तत्र सवितर्कायाः स्वरूपमाह—

हाम्लेट् चरितम्।

(पूर्व्वानुवृत्तिः)

राजा। गच्छाऽस्तु चाध्वनि शुभं तव लैरतीस
सत्कर्म्मभिः स्वसमयं गमयाऽप्रमत्तः।
कार्य्यं स्वसाध्यमपि वाञ्छितकार्य्यजातम्॥
हाम्लेट्, सहोदरसुतोऽपि सुतोऽसि, मेऽद्य

हाम्। भ्रातात्मजोच्चपदभाक् स्वसुताच्च हीनः।

राजा। आच्छाद्य चित्तमधुनाऽपि च शोकमेव
स्थितस्तथा तव तथैव च किंस्विदेषः?

हाम्। नैवं, ममैष सुखसूर्य्यमहं सनोचे

राज्ञी। हाम्लेट् प्रियात्मज विदूरय मन्युवेगं
प्रेमार्द्रदृष्टिमधुनार्पय डेनभूमौ।

साधारणं, प्रक्रान्तोऽप्यसताध्यवासितः । (१)

काम् । साधारणं जननि सत्यमिदं,

राज्ञी । ——————————यदीत्थं

वैशिष्ट्यमेवमधुना किमु दृश्यते ते ?

हास् । किं दृश्यते जननि ? नैव तदस्ति सत्यं

जानाम्यहं किमपि दृश्यत इतरदीन ।

शीलं न चास्य मम नाटीयवस्त्रमेतत्,

नाचारधार्य्यगुरुशोकजनोचितवेशः,

कृच्छ्राद्विनिर्गतमिदं श्वसनं च दीर्घं

नावा सदाविगलदश्रुजलप्रवाहः,

नैवावसादमलिनो मम वाह्यभावः

सम्भूय वै तदखिलं न च शोकचिह्नम्

मां तत्त्वतोऽस्ति खलु दर्शयितुं समर्थम्।

सत्यन्त्विमानि ननु शोकनिदर्शनानि

वाह्यानि, यानि मनुजोऽभिनयाय धत्ते

अन्तर्गतोमम तु दारुण शोकएष

अक्षोदर्शिभिर्हि, निदर्शयितुं, ततोमे-

हृद्वेदनानुगत एष परिच्छदोऽपि ॥

---

(१) संस्कृत नाटकेष्वेवम्विधस्थले शौरसेनीभाषाप्रयोग एव नियमितः। सा च भाषेदानीं व्यवहाराभावादनुवादमपेक्षते, इत्यस्माभिरापाततः संस्कृतानुवाद एव प्रकाश्यते यदि परमेश्वर-

धातुसूत्रम् ।

जि न च्वि वेङि धातू [illegible], श्वि नञ् श्रुतौ ।
श्रिञ सेवायां टुश्वोश्विवृद्धि गमने वर्द्धनेऽपि च ।
शिञ्श् बन्धनेऽथ षिङ् ईषद्धास्ये णिङि लिदात् ।
प्रयोजकादिभये ञित् ; ह्वि न गत्यान्तु वर्द्धने ।
च्चिक्षये प्रगहिंसे प्रवासे च विंग्र इत्परा: ॥० [illegible] ॥
ईदकान्ति गतिक्षेप भोजन प्रजनाशिषु ।
ईक [illegible] डुक्रीञ्ग्रहव्य परिवर्त्तने ।
स ङिव्हरवपरिभ्योऽथ ज्ञोवयोहानितोगिरि ।
डीङ्श्च विहायसां गतयां णीञ् प्राप्तौ पुनरेव स: ।
धर्म्मव्यये तथोत्क्षेपे प्रमेयनिश्चयार्थके ।
शुल्कर्णीकारयोर्धेङित् कर्त्तृस्थेऽनङ्ग [illegible] ।

न चिरिणीति । जयति । परापकर्षफलककत्ववुत्कर्षव्यापार: तत्त्वेन तु पराजय: पराभवोऽभिभवश्चैकार्थका: परोत्कर्षफलक कत्वपकर्षव्यापार: तेन युद्धात् पराजयते इत्यादौ पराजेरपि जयएव व्यापार: । [illegible] युद्धात् पराजयते इत्यादौ पराजेरकर्म्मकता दृश्यते । [illegible] सकर्म्मता । अभिभवार्थे अकर्म्मकता परापूर्व्वत्वेऽपि तथा । एतेन चैत्रेण मैत्रोजित: पराजित इत्यर्थ: । जित इति कर्म्मणि क्त: । विशब्देन तस्याभिभवार्थं प्रकाशितुं न पार्य्यते । तेन जेवीति सूत्रे परमतकुलञ्च जि अभिभव इत्यस्यापि ग्रहणमित्युपाध्यायसर्व्वस्वा-दय इति गोयीचन्द्र: । श्वियुजादि: जयति. जायमानि । [illegible]

गुरुस्त्रियायां गम्यायां गम्ये सम्मानने स ङित् ।
वेतने गम्यमाने स ङिदथ दीङ्युपक्षये ॥
दोधीङ् देवने दीप्तां धीङ्यु स्वादनादरे ।
धीङ्य पानेऽथ प्रीङ्प्रीतौ कान्तौ च प्रीङ् यतर्पणे ।
भिलोभये न षिङितु सञ्जिङ्वाद यस्तत: ।
श्रोगिणमीति श्रुतौ शीङ्शि सुङगज गतौ इखि ।
वेश्विवैजनतोक्ष केचिद्धीषनताविति ।
वोङ्गुञ्चवनतोनीक्षिद्द्रावक्षि भिसुङ्क्षिपि ।
णिङि ङित्तु विसंवादे सम्मानव्यक्तुलिर्थ्यपि ।
पञ्चसूरी क्षि सं परीदं वादि वी षि सती ऋचित् ॥

णाति हार्वित ह्रीङर्थे रिणोति क्षिणातीति प्रयोगान्ताभावात् ।
विजायतीति प्रयोगानुपपत्तेश्च इत्यस्वरसात् कोपीतुरक्तं । न च
ष्रिणाति. प्रिणुमि । स्तु तौ स्वाभ्यस्तं स्तोत्रमिति । जन्नयति श्रयते । दुश्व-
यथु । द्वौ सून: । क्ष सूयात् । लुङि अश्वयीत् अशिश्वियत्, अश्वि
श्वत् । जन सिनोति, सिनुते । जम सिनाति, सिनीते त्का: सित: ।
ग्रासकर्मकर्त्तरि वाच्ये तु सिन:, सिनवान् ग्रास: स्वयमेव । ङ-स्म-
यते । प्रयोजकादितरवधिभावे पञ्चमी । णिङि परे प्रयोजक कर्त्तृ-
तोविविस्मयेऽर्थे स्मिङ इत् आत् स्यात् । सङित् स्यात् विस्मापयते ।
न क्षिनोति, क्त क्षयति, क्षीण:, क्षीणवान् । ष क्षियाति ष क्षिया ।
क्षित: । ण क्षियति, क्त प्रक्षीण: ॥ इदन्तवर्ग: ॥ ईर्देति इ एति, क्त
अयति । यङ ईयते । डुक्री त्रिमं । जष क्रीणाति, क्रीणीते । सङि
दिति विक्रीणीते परिक्रीणीते । गिञ्त्रिणाति । खि ञ्जायति ञ्यति ।
डङ डीयते । ङ्यु डीयते, डीन: विहायसां पक्षिणां । ञ नयति
नयते । पुन: स नीञ धातु: धर्म्मार्थवाप्येऽर्थे ङित् स्यात् । यथा

A

VOCABULARY OF TECHNICAL TERMS

We find almost all the Indian scholers of these days have been engaged in translating scientifical works in their respective vernaculars. But owing to want of a guide for expressing the technical terms used in those works in the vernacular languages different men coin different words according to their own choice to express the same thing, while others used the original terms as they are in the text. Inorder to get over this difficulty we have compiled a large number of such English words with their Sanskrit equivalents. We commence with the physics.

Acid अम्लं
Adamantine spar कुरुविन्द:
Aeriform वायुजातीय:
Agate चित्ररेखाङ्कितप्रस्तर:
Air वायु:
Alchemist रसवादी, धातुवादी
Alcohol तीव्रासव:
Alkali अम्लविरोधि, प्रत्यम्लं
Alum स्फटी,
Alumina . स्फटीजनकजातीयं
Aluminum स्फटीजनकं
Amethyst अरुणप्रस्तर:
Analysis व्यस्तकरणम्
Animal and vegetable life स्थावर-जङ्गमजीवनम्
Annihilation आत्यन्तिकनाश:
Artificial कृत्रिमं
Asbestos अदाह्यपटजनम
Blue नीलं
Burnt air दग्धवायु:
Camphor कर्पूर:
Carbon अङ्गार:
Carbonate of lime अङ्गारायितचूर्णं
Carbonic Acid आङ्गारिकाम्लं
Card पिधानफलकं
Chalcedony द्राक्षावत् प्रस्तर:
Chemical affinity रासायनिकाकर्षणम्
Chemistry रसायनशास्त्रम्
Colonr रूपं
Combustible शीघ्रदाह्यं
Combnstion दाह:
Conduction of heat उष्णतासञ्चारणम्
Confusion सङ्कर:
Constituent part घटकावयव:
Convection उष्णतोत्पादनक्रमम्

Deffusion मिश्रणं
Dissimilarity वैधर्म्म्यं
Distillation अभिषव:
Diving Bell मज्जनघंटा
Earth पृथ्वी
Electricity विद्युत, तडनिशक्ति:
Emerald मरकत:, हरिन्मणि:
Ether आकाश:
Evaporation वाष्पीकरणम्
Flint अग्न्युत्थानप्रस्तर:, अग्निप्रस्तर:,
Filtration उत्पवनम्
Fire तेज:, अग्नि:
French chalk फ्रान्सदेशीयचूर्णम्
Galvanic trough वैद्युतपात्र संग्रह:
Heat ताप:
Hydrogen जलकर:
Iice हिमं
Ignition ताप:
Illumination प्रकाशनक्रिया
Impoderable Elements गुरुत्वहीन-भूतानि
Instantaneous —
Light mach दीपशलाका
Indirect action परम्परीपाय:
Light प्रकाश:
Lime चूर्णम्
Lime stone चूर्णप्रस्तर:
Lime-water चूर्णजलम्
Liquid द्रवद्रव्यम्
Luminous दीप्तिमान्
Lycopodium राल:
Magnesia [illegible]
Marble धवलोपल:, दुग्धपाषाण:, सांघमर्मर इति भाषा
Materiai Substances वाह्यद्रव्यं, सावयवद्रव्यम्

मद्यपायिन: प्रतिज्ञा ।

कस्मिंश्चिज्जनपदे कश्चिन्मद्यपायी निवसतिस्म । स हि नित्यमेव मद्यपानरत:, क्षीणसम्पत्, हीनबलश्च चौर्य्यद्यूतपरायणोऽजायत । तथाचोक्तं ।

भिक्षो मद्यनिषेवनं प्रकुरुषे ? किन्तेन मांसं विना,
मांसञ्चापि तव प्रियं प्रियमहो वाराङ्गनाभि: सह ।
वेश्या चार्थरुचि: कुतस्तवधनं ? चौर्य्येण द्यूतेन वा

असज्जनसम्पर्कात् सकृत् सुरास्वादे जा... ...ऽसुरप्रवृत्तिर्वर्द्धते, ततश्च यावज्जीवं न सुरां परित्यक्तुं शक्नोति।

अथ स भद्रमुखः चौर्य्यमनुष्ठि... ...ष्ठन् प्रतिवेशिभिरवधीर्य्यमाणः सञ्जातलज्ज आत्मानं धिक्कृ... ...य प्रतिज्ञां कृतवान् न पुनर्मद्यं पास्यामीति। एवं प्रतिज्ञा... ...य स तद्दिने निजकर्म्मस्थानं गत्वा भद्रोचितानि कार्य्याणि चकार। सर्व्वदा स्वबन्धूनां समीपे सुराया बहुप्रकारां निन्दाञ्च कृतवान्। कथितवांश्चाहो अपगता मे मोहनिद्रा ज्ञानसूर्य्यः समुदितश्चेति। एवं सगर्व्वं दिवसं निनाय।

अथास्ताचलमुपगतो भगवान् मरीचिमाली, समजनि च गोधूलिरागरञ्जितान्तिमसन्ध्या, कर्म्मस्थानीयानि स्थगितान्यभवन् कर्म्माणि, स्व स्व गृहं प्रति निवृत्ताश्च सर्व्वे कर्मचारिणः। सोऽपि स्वगृहं प्रतिचलितः। अथागच्छन् पथि महान्तं कलरवमशृणोत्। तदनुसारतः कियत्पदानि गत्वाऽग्रतोऽतिमहान्तं मदिरालयमेकमपश्यत्। दृष्टवांश्च तत्र असंख्यमानवाः समवेताः साङ्गनं तदालयं सर्व्वतः सम्पूर्य्य स्थिताः, सर्व्व एव मदिरापानोन्मत्ताः; केचिदुद्दामं नृत्यन्ति, अपरे तारस्वरं गायन्ति, अन्ये प्रचण्डं प्रवादयन्ते, अपरे साङ्गभङ्गं परिभ्रमन्ति; तदन्ये मुखविकारं कृत्वा पथिकान् भाययन्ति एवं सर्व्वतः पुञ्जीकृतान् सर्वांस्तानवलोक्य चिन्तयामास अहो प्रभावो मद्यस्य यत्तु—

सुखं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
अलसं कार्य्यदक्षञ्च वृद्धञ्च तरुणं तथा॥

किं बहुना मद्य पानं खलु जीवत एव स्वर्गसुखं समर्पयति, विस्मारयति च सांसारिकदुःसह क्लेशजातं। धिङ्मूर्खो मे प...

तादृशी जनता जायते। ततश्चानुपातगणनया श्रमजीविनः सर्व्वएव मद्यपायिन इति प्रतीयते, तत्कथं केवलमहमेकाकी तादृशसुखीयसुखाद्वञ्चितस्तिष्ठामि ? तदहमपि मदिरालयं गत्वा उदरपूर्त्तिं यावत् मद्यं पिबामि, एतावत्पर्य्यन्तं मद्यपानमकुर्व्वतोमे शरीरं अवसाद सागरे निमग्नमिव, नाहमात्मनोऽङ्गेषु प्रभवामीति।

एवं चिन्तयन्नेव स मदिरालयं गत्वा यथेष्टमद्यपानेन तद्दिनोपार्ज्जितं सर्व्वमर्थं निःशेषयामास। रिक्तहस्तो गृहं प्रतिनिवृत्ते। तत्र गत्वा तदागमनमार्गं प्रतीक्षमाणां यथाभावात् कृतोपवासां सशिशुपुत्रां युवतीं भार्य्यां, वर्षीयसीं मातरञ्च ददर्श। स्वयमपि तावत्-पर्य्यन्तं न किमपि भक्षितवान्। ततश्चापसृते मदवेगे यदा प्रकृतिस्थोऽभवत् तदा सर्व्वेषां स्वपरिजनानां तथाविधक्लेशमवलोक्य पुनरेव पूर्व्ववत् प्रतिज्ञामकरोत्, पुनरेव विशुद्धतया दिवसं विश्रम्य सायं पथि पूर्व्ववत् मदिरालयसमीपे सर्व्वं विस्मृत्य मद्यपानमकरोत्। एवं स प्रत्यहं प्रतिज्ञां करोति, प्रत्यहञ्च तां विस्मृत्य मद्यं पिबति।

अथ स मनसि विचारितवान् चक्षुरेव मे शत्रुः। इदं हि मदिरालयमवलोक्य चित्तं विलोभयति, ततश्च प्रलुब्धं चित्तं स्वकृतां प्रतिज्ञां विस्मरति। ततश्चाद्यप्रभृति समाच्छाद्य चक्षुषी गमिष्ये येन मदिरालयस्य दर्शनमपि न स्यात्। एवं प्रतिज्ञाय परेद्यु वस्त्रेण चक्षुषी दृढतरमाच्छाद्य कर्म्मस्थानात् गन्तुमारेभे। कियत् पदान्येव गत्वा मदिरालयोऽपक्रान्त इति विविच्य चक्षुषुद्घाटितवान्, ददर्शचाग्रत एव तन्मदिरालयं, दर्शनमात्रेण तस्य चेतः समाकृष्टं बभूव, ततः पुनरेव मद्यपानप्रवृत्तिर्मद्यपानञ्च कृतम्। परेद्युर्वि-

तद्दिने तथैवाकरोत्। स कर्म्म-स्थानादेव चक्षुषाच्छादन वेगेन प्रस्थितः, मदिरालयमनतिक्रम्य गतश्च। मदिरालयमतिक्रम्य चक्षुरु-द्घाट्य तस्य मनसि गर्व्वोऽभूत् अहोमे वीरता! यथैवाङ्गीकृतं तथैव सद्यः प्रतिपालितम्। वीरोऽहं सम्वृत्तः वीरस्य मद्यपानमनुचितमेव, विना मद्यपानं वीरत्वं क्व शोभते? इति स प्रत्याहृत्य पुनरेव मदिरालयमागत्य यथेष्टं मद्यपानमकरोत्।

प्रवरनिर्णयः।

(१) काण्वानाम् आंगिरसाजमीढ काण्वेति
(२) हरितानाम् आंगिरसांवरीषयौवनाश्वेति
(३) संकृतीनां आंगिरस, सांकृत्य, गौरिवीतेति
(४) रथीतराणां आंगिरस, वैरूप्य, रथीतरेति
(५) मुद्गलानां आंगिरस, भार्म्याश्व, मौद्गल्येति
(६) कपीनां आंगिरस, सामहाव्य, वार्ह्यव्येति
(७) विष्णुवृद्धानां आंगिरस, पौरुकुत्स, त्रासदस्यवेति

एते सप्त शुद्धाङ्गिरसाः भिन्नप्रवराः आङ्गिरसानुवृत्तावपि "आङ्गिरसं मुक्त्वे" ति वचनात्।

(१) अत्रीणां आत्रेया,ऽर्च्चनानस, श्यावाश्वेति
(२) गविष्ठिराणां आत्रेयाऽ, र्च्चनानस, गविष्ठिरेति
(३) वभ्रूदकानां आत्रेयाऽर्च्चनानस, वभ्रूदकेति
(४) मुद्गलानां आत्रेया, ऽर्च्चनानस, पौर्व्वतिथेति

एते चत्वारः समानप्रवराः तुल्यर्षित्वात्

(३) शाण्डिल्यानां काश्यप, वत्सार, शाण्डिल्ये ति; काश्यप, वत्सा वैदलेति वा, काश्यप,वत्साराऽसितेति वा, शाण्डि ल्याऽसित, देवलेति वा इति चतुर्धा प्रवराः।

(४) लौगाक्षीणां काश्यप, वत्सार, वसिष्ठे ति।

एते चत्वारः समानप्रवराः काश्यपानुवृत्तेः चतुर्थप्रवरे काश्यपानुवृत्त्यभावेऽपि त्रिभिः प्रवरैः समानप्रवरत्वात् काश्यपैरविवाहः। लौगाक्षीणां वासिष्ठपदानुवृत्त्या द्व्यामुष्यायण त्वाद्वसिष्ठै रविवाहः।

(१) वासिष्ठानां वासिष्ठे ति।

(२) कुण्डिनानां वासिष्ठ, मैत्रावरुण, कौण्डिन्येति।

(३) उपमन्यूनां वासिष्ठेन्द्रप्रमद, भरद्वसुव्ये ति।

(४) पराशराणां वासिष्ठ, शक्ति, पराशरेति।

एते वासिष्ठाश्चत्वारः समानप्रवराः वसिष्ठानुवृत्तेः।

(१) कुशिकानां वैश्वामित्र, देवरातौदलेति।

(२) रौहितानां वैश्वामित्राऽष्टक, रौहितेति।

(३) रौक्षकानां विश्वामित्र, रौक्षक, रैवतेति।

(४) विश्वामित्राणां वैश्वामित्रारसदेव तनसेति।

(५) मौजायनानां विश्वामित्र, मधुवृन्द, मौजेति।

(६) धनञ्जयानां वैश्वामित्र, माधुच्छन्दस, धनञ्जयेति।

(७) कतकानां वैश्वामित्र, कातय, कौलेति।

(८) इन्द्रकौशिकानां विश्वामित्रेन्द्र कौशिकेति।

(९) अघमर्षणानां वैश्वामित्राऽघमर्षण, कौशिकेति।

(१०) पौराणां वैश्वामित्र, पौराणेति।

(१) आगस्तीनामगस्ति दार्ढ्यच्युतेध्मवाहेति ।

(२) दार्भवाहानां आगस्त्य, दार्ढ्यच्युत, दार्भवाहनेति ।

(३) सांभवाहनानां आगस्त्य, दार्ढ्यच्युत, सांभवाहनेति ।

(४) सोमवाहनानां आगस्त्य, दार्ढ्यच्युत, सोमवाहनेति ।

(५) यज्ञवाहनानां आगस्त्य, दार्ढ्यच्युत, यज्ञवाहनेति ।

चतुर्णामगस्तीनामागस्त्यपदानुवृत्त्या मिथःसमानप्रवरत्वम् ।

इति प्रवरनिर्णयः ।

अत्र संग्रहश्लोकाः—

एकोऽपि च मुनिर्येषां प्रवरेष्वनुवर्त्तते ।
सगोत्रास्ते मिथोज्ञेया भृगुमङ्गिरसं विना ॥
शुनकाः स्युर्वसिष्ठैः काश्यपैः शाण्डिल्या अपि ।
भारद्वाजास्तथा गर्गाः पञ्चे तुल्यार्षदर्शनात् ॥ यद्वा
च्यवनो गौतमोऽगस्त्योभरद्वाजोऽत्रिकश्यपौ ।
विश्वामित्रोवसिष्ठश्च यत्रप्रवरेष्वमी ।
वर्त्तन्ते ते सगोत्राः स्युः काश्यपैः शाण्डिलास्तथा ॥
शुनकाः स्युर्वसिष्ठैर्भारद्वाजैश्च गर्गका इति ।

अत्र प्रमादेन समानगणगोत्रप्रवरकन्योद्वाहे ज्ञानोत्तरकालं मातृवदेनां बिभृयात् ॥ गर्भश्चेदुत्पन्नः स न शुध्यति । काश्यपो भवति गोत्रेण ज्ञात्वा गुरुतल्पगः तदुत्पन्नः चण्डालस्स ज्ञेय इति । श्राद्धकमपि सगोत्रप्रवराय न देयमित्याहुः ।

पुस्तक प्राप्तिस्वीकारः ।

वाल्मीकियन्त्रे कलिकाताराजधान्यां वाप्टिस्टमिसन यन्त्रे मुद्रितम्।
सम्वत् १८१०।

इतः प्राक् महामहोपाध्यायश्रीचन्द्रकान्ततर्कालङ्कारप्रणीतं वैशेषिकदर्शनभाष्यं सादरं समधिगत्य कथमस्यालोचनं करिष्याम इति विचिन्तयत्स्वेवास्मासु तैरेव महामहोपाध्यायैरपरं ख प्रणीतं पुस्तकद्वयं प्रकाश्यास्मभ्यं समर्पितं, तयोरेकं कौमुदीसुधाकर मपरं सटीककुसुमाञ्जलिपुस्तकम्। यावदेकस्यैव समालोचनगुरु भारोनाऽस्मत् स्कन्धादवतारितस्तावदपरौ द्वौ भारौ सन्निहितौ, ततश्च भारचितयक्रान्तानामस्माकं कीदृग्गतिर्भवेदिति न ज्ञायते।

कौमुदी सुधाकरस्य विस्तृतसमालोचनं समयसापेक्षं। इदं काव्येषु दृश्यकाव्येषु तत्रापि च प्रकरणेऽन्तर्भूतम्। तदस्यालोचनं काव्यत्वदृश्यकाव्यत्वप्रकरणत्वपरीक्षणापेक्षि। तदयं तदपहाय पुस्तकमिदं सङ्क्षेपतः समालोचयाम इति सङ्कल्पोऽभवत्। परं तादृग संक्षिप्तसमालोचनं हि ग्रन्थस्य केवलस्तुतिमात्रपरं, शुद्धनिन्दावादपरं वा भवति। किन्त्वत्र न तयोरन्यतरं पक्षमाश्रयितुं वयं पारयामो यतो आद्यः खलु केवलं पृथग्जनत्वलाञ्छनं प्रख्यापितं भवेत् कविना च स सावज्ञं विगर्हितएव। तथाच

पृथग्जनानां स्तुतिरप्यपार्थी
यतो न जानन्ति गुणागुणांस्ते।
विलोकनीयस्य न जातु शिल्प
स्यान्धस्तवात् शिल्पिगुण प्रकर्षः।

अन्तिमः खलु पक्षः (निन्दावादः) अस्माकं पाण्डित्यप्रख्यापको ग्रन्थकारस्याभिमतश्च तथा च तदुक्तिः—

तिरस्कृतिरपि श्लाघ्या गुणज्ञानां न संशयः।
तिरस्कुर्वन्ति हि स्थाने सुतरां ते कृतश्रमाः॥

साम्प्रतं समयाभावात् कृतश्रमत्वाभावे तिरस्कृतिरपि न शक्यते कर्त्तुमस्माभिः। किञ्च ग्रन्थस्यास्य स्तुत्यात्मीय पृथग्जनत्वख्यापनात

१८८७ खृष्टाब्दीय विद्योदयोल्लिखित विषयाणां निर्घण्टुः ।

क्षितीशवंशावली-चरितम् ।

॥ श्रीरामचन्द्रायनमः ॥

वाल्मीकिः सुप्रसिद्धः कविकुलतिलकोवर्णयन् सूर्य्यवंशं,
पाराशर्य्यः कवीन्द्रोऽभवदपि रचयन् भारतं वंशमग्रम् ।
तत्कर्षं के लभन्ते त्रिजगति महतां कीर्त्तयन्तो न कीर्त्तिं,
तद्वंशं वर्णयामः कलिमलमथनं भट्टनारायणस्य ॥

पुरा वङ्गे विषये आदिसूरनामा नरपतिरासीत् । स शास्त्र दृष्ट्या प्रजाः पुत्रवत् प्रतिपालयामास । अथैकदा तस्य नृपतेः प्रासादोपरि कश्चिद्गृध्रः पपात । राजा च तं दृष्ट्वा भाविविघ्नं मन्यमानोमहतीं पण्डितसभां चकार । पप्रच्छ च भोः भोः पण्डिता मम गृहोपरि गृध्रोऽपतत् । ततश्चानिष्टमाशङ्क्यते, तस्य शान्तिः केति ? । ततः पण्डिता युगपदूचुः । "भो देव तमेव गृध्रं निहत्य तन्मांसेन होमः क्रियतां ततः "शान्तिर्भविष्यति ।" राजा पुनराह स गृध्रः कथं धर्त्तव्यः ? तन्मांसेन होमविधानं वा कीदृक् ? विशेषेण वदत । ततः सर्व्वे तूष्णीं स्थिताः ।

अथ तत्सभोपविष्टः कश्चिद्ब्राह्मणोऽचिरमेव कान्यकुब्जदेशादागतोजगाद । "राजन् मया तीर्थयात्राप्रसङ्गेन कान्यकुब्जदेशे गतम् । तत्रभवतोगृहे यथा गृध्रः पपात, तत्रापि राजगृहे तथैव गृध्रः पपात । ततः कान्यकुब्जाधिपतिर्भट्टनारायणादि-ब्राह्मणानानीय तैर्ब्राह्मणैस्तं गृध्रं मन्त्रेण समाहूय तन्मांसेन हावितवानिति मया प्रत्यक्षीकृतम् । अतोभवानपि भट्टादीनानीय तथा करोतु" ।

तान् साग्निकान् यज्ञोपकरणसामग्रीसंभृतानानीय नवनवत्यधिक नवशतीयशकाब्दे आधुनिकाङ्कित (९९९) वासे निवेशयामास।

अथ प्रभाते ब्राह्मणाः कृतसन्ध्यावन्दनादिक्रियाकलापाः पत्न्यादीन् स्वस्वगृहे स्थापयित्वा दुर्व्वाक्षतहस्ता राजानं द्रष्टुं गन्तु मुद्यताः। राजा च प्रसादोपरिस्थितः पादद्वयनिबद्धचर्म्मपादुकान्, सूचीविद्धवस्त्रावृतदेहान्, पथि चर्व्वितताम्बूलकषायरञ्जिताधरौष्ठ-पुटान्, दूरतएव विलोक्य तैरनुपलक्षितः सावज्ञं तत्रैव तस्थौ। अथ ब्राह्मणा द्वारं समागत्य दौवारिकमूचुः। "भोः प्रतिहारिन् कान्य-कुब्जदेशीयानस्मान् द्वारागतान् राजानं निवेदय।" ततः प्रतिहारी कियत् दूरं गत्वा पुनरागत्योवाच। भो ब्राह्मणा राजा इदानीं सुष्वाप नायं साक्षात्समय" इति। ततोब्राह्मणाराज्ञोऽनादरं बुद्धाऽपि जितरागद्वेषादितया आशीःकरणार्थानीतदूर्व्वाक्षतादिकं द्वारोपान्तस्थितशुष्कतरमल्लकाष्ठे मन्त्रं पठन्तः पञ्चधा स्थापयित्वा स्वस्वस्थानं गताः। ततः परदिने तस्मान्मल्लकाष्ठात्तरुणतरपल्लव शालिन्यः पञ्च शाखाः समुत्थिता दौवारिकादयः सर्व्वे दृष्ट्वा विस्मिता राजानं विज्ञापयामासुः। "देव द्वारप्रान्तावस्थितशुष्कमल्लकाष्ठे तरुणतरपल्लवशालिन्यः पञ्चशाखाः समुत्थिता इति महदाश्चर्य्यम् ?

अनन्तरं राजा समागत्य विस्मित इव प्राह "शुष्ककाष्ठात् शाखोत्पादे किं कारणम्"? ततोदौवारिकादय ऊचुः। "देव पूर्व्व-दिने कान्यकुब्जागतपञ्चब्राह्मणा अस्मिन् शुष्ककाष्ठे पञ्चसु स्थानेषु मन्त्रपाठपूर्व्वकं दूर्व्वाक्षतादिकं स्थापयामासुस्ततः कारणात् शुष्का-दपि काष्ठात् शाखाः प्रादुर्बभूवु"रिति श्रुत्वा राजा प्राह एवमेवेति। ततो राजा स्वापराधमपनिनीषुर्गलल्लग्नीकृतवासाः सपरिवारस्तेषां समीपमागत्य सानुनयमुवाच। "यूयं देवप्रकृतयः साधवः, वयं मूढाः, युष्माकं महिमानं न विद्म इति [illegible]

राजन् अस्माकं रोषोनास्ति इति जानीहि। यद्यस्माकं रोषोऽभविष्यत् तदा सपरिवारं त्वत्पुरं भस्मसादभविष्यत्। तदलमनुनयेन यदर्थं वयमानीतास्तदर्थं यतस्व"। ततोराजा भक्ष्यद्रव्यादिभिस्तान् पूजयित्वा लब्धानुज्ञः स्वपुरमागत्य शान्तिकसामग्रीं यथादेशं संगृह्य तान् ब्राह्मणानाह। "मया यज्ञसामग्री समाहृता। यूयमनुग्रहेण यज्ञं निष्पादयत" इति राज्ञा निमन्त्रिता भट्टादयो ब्राह्मणाः शाकुनसूक्तादिभिर्मन्त्रैस्तं गृध्रमाकृष्य तन्मांसैर्विधिवद्यज्ञं समापयामासुः। राजा च तैनैव गतवाधो दक्षिणादिभिस्तान् सन्तोष्य हृष्टमना उवाच "भो भो गुरवो यूयमत्र वसतिं मदनुग्रहेणानुमन्यध्वम्। ततोदक्षादयश्चत्वारो भट्टमुखमेव निरीक्षन्तेस्म। ततो भट्टोयथाभिलषितं नरेन्द्रस्येत्याह, राजा च लब्धानुग्रहोहृष्टः पञ्चानां निवासयोग्यं बहु सौधादिसमाकुलं पुरपञ्चकं निर्म्माय तेभ्योददौ। ते च तत्र सम्वत्सरमेकं सुखमवात्सुः।

अथ कान्यकुब्जे विदितप्रभावच्छितीशनामनरेन्द्रपुत्रस्य भट्टस्य लोकातीतकर्म्मभिर्भृशं परितुष्टो राजाह "प्रभो मया कियन्तो ग्रामा दीयन्ते कृपया तान् ग्रहीतुमर्हसि"। भट्टः प्राह-"दुग्ध, तिद्धह-नाग-हिरण्य-तिल--लोहादि-सहिता ग्रामा मया न ग्रहीतव्याः। राजाह-"अनुगृहोतेन किङ्करेण मया तदा किङ्कर्त्तव्यं ? मम पारलौकिकसद्गतिर्वा कथं भविष्यति"। इति श्रुत्वा भट्टः पुनराह "मम धनानि बहूनि विद्यन्ते, तैर्मया कतिचिद्ग्रामाः क्रीयन्ते भवता विक्रीयन्ताम्, भवतो यदि ममोपकारे वाञ्छाऽस्ति तत्रैव समुपचितोपकारः क्रियताम्"। श्रुत्वा राजाह तथैवाऽस्तु। ततः स्वल्पेन मूल्येन वहवो ग्रामा विक्रीताः, तेषु च ग्रामेषु प्रतिवर्षलब्धवराकरा ग्रामान्तरलब्धवराकरेषु वर्द्धिताः। भट्टेन च क्रीता ग्रामास्तर्विंशति-

ततः स राजा भट्टोऽपि मृतः परलोकमगात्। ततोभट्टस्य षोड़शपुत्राः पितृतुल्यगुणग्रामा आदिवराह-वाटु-वाम-नान-निपु-गुंजि-गुंतु-अमान्तु-गुणविक-अनिल-मधु-कामदेव-सोम-अदीन-संज्ञका अनुपमसदाचारविनयविद्यागुणैः सुप्रतिष्ठिताः सर्व्वमान्या अभवन्। तत्रादिवराहप्रभृतयश्चत्वारोज्येष्ठा विषयात्यन्तविरक्तास्तप स्यामेवानुतिष्ठन्तः स्नेहाधिक्येन चतुर्णामवरजमितरेषामेकादशानां ज्येष्ठं निपुनामानं राजनीतिविशारदं राज्यप्रतिपालनक्षमं करुणानिधानं राज्येऽभिषिषिचुः। स च स्वाध्याययागादि श्रौतस्मार्त्तादिकर्म्मतत्परोऽपि अष्टाविंशतिसंवत्सरान् केशर ग्रामे परमां पुरीं निर्म्माय तत्र वसन् धर्म्मेण प्रजाः प्रतिपालयामास। ततः प्रभृति अद्यापि तत्सन्तानाः सर्व्वे केशरग्रामिकत्वेन प्रसिद्धाः। ततस्तस्मिन् परलोकं गते तत्सुतोऽपि-हलायुधः सकल जनवल्लभोऽपि धर्म्मेण पञ्चदशवर्षान् राज्यं शशास।

ततो हलायुधे मृते तत्पुत्रो हरिहरो महाविभवसम्पन्नो विंशति वर्षान् राजा बभूव। तस्मिन् परते तत्सुतः कन्दर्पः परमधार्म्मिको द्वाविंशतिवर्षान् राजा बभूव। तस्मिन्नपि क्षितिमधिशय्य प्राप्त परलोके तत्सुतो विश्वम्भरनामा अष्टाविंशतिवर्षान् निखिल गुणनिधानो नरपतिरासीत्। तथैव तस्मिन् मृते तत्पुत्रोनरहरिनामानुपमगुणग्रामः सप्तविंशतिवर्षान् राज्यं पालयामास। ततस्तत्पुत्रो नारायणसमानगुणो नारायणनामा चतुर्विंशतिवर्षान् राज्यं प्रतिपालयामास। तस्मिन् प्रमीते (प्रमृते ?) तत्सुतोऽप्यशेषलोकप्रियत्वात् प्रियङ्करनामा ऊनत्रिंशद्वर्षान् नृपतिरभवत्। तस्मिन् विंशतिसंवत्सरान् प्रतिपालितराज्ये त्यक्तप्राणे तत्पु-

चैकादश्पुरुषा निष्करमेवादिसूरनृपात् क्रीतं राज्यं सुखेन पालयामासु: ॥

इति त्रितीयवंशावलीचरिते द्वितीय: परिच्छेद: ।

कामनाम्नो नरपतेश्चत्वार: पुत्रा विश्वनाथप्रभृतय: पितरि मृते राज्यस्यांशं ग्रहीतुं परस्परं विवदन्तेस्म। अस्मिन्नेव समये म्लेच्छ देशादागत्य सुलतानमासुद गजनवीनाम्ना प्रसिद्धजवनेन (१)इन्द्रप्रस्थ-नगराधिपं निर्जित्य तत्पुरे स्वाधिपत्यं चकार। एतत् श्रुत्वा काम-सुता विश्वनाथादयो विवदन्त: (विवदमाना:?) इन्द्र प्रस्थ पुराधिप जवनं सम्राट् कक्ष्यमुपययु:। जवनाधिपोऽपि वहुना कालेनापि-तद्विवादं परिच्छेत्तुमशक्नुवन् विश्वनाथादीनाह। भवन्तो राज्य-करं मह्यं दातुं स्वीकुरत। अनन्तरं ज्येष्ठोविश्वनाथोजवनाधि-पाय निजराज्यस्य करं दातुं जवनाधिपानुमत्या पैतृकं सकलं राज्यमवाप।

तस्य च सोदरास्त्रय: करदानं न स्वीचक्रुर्जगदुश्च। "वयं निष्करपैतृकराज्यस्य करं दातुं न शक्नुम" इति। अतएव ते राज्याऽधिकारं नावापु:। विश्वनाथोऽपि जवनाधिपं परितोष्य काँकदोप्रभृतिवहुभिर्देशान् पैतृकराज्यातिरिक्तान् लब्ध्वा प्रसिद्ध-प्रताप एकत्रिंशद्वर्षान् राजा बभूव। तस्मिन् मृते त्रिलोचन राय स्तस्य पुत्र.त्रिंशद्वर्षं राजा बभूव। तस्मिन्नपि क्षितिमधिशास्य पर-लोकं गते तत्पुत्र: संसारिनृपतिरभूत्। षड्विंशतिवर्षं क्षिति मधिशास्य तस्मिन् मृते तत्पुत्र: षष्ठीदास ऊनत्रिंशद्वर्षान् नृपो बभूव। तस्मिन्मृते तत्पुत्र: काशीनाथराय: चतुस्त्रिंशद्वर्षान् राजा बभूव।

एतस्मिन क्षितिमधिशासति त्रिनीशे [illegible]

गज: परिभ्रष्टोऽरण्यानीं परिभ्रमन् कदाचित् कदाचित् ग्रामे समागत्य लोकानुपप्लावयामास।

अथैकदा काशीनाथरायस्य कुत्रचित् ग्रामे समागत्य स गज: समस्तान् लोकान् विद्रावयामास। काशीनाथोपि लोकमुखात् श्रुत्वा बहुभि: सैन्यै: समाहूतस्तं गजं व्यापादयामास। एष च वृत्तान्तस्तद्देशावस्थितयथार्थवृत्तान्तलिखनार्थनियुक्तामात्येन निज स्वामिने इन्द्रप्रस्थपुरेश्वरजवनाय विशेषतो लिखित:। इन्द्रप्रस्थपुरेश्वरोऽपि सम्यगवेत्य महारोषाविष्ट: काशीनाथं नियम्य प्रेषयितुं जाँहागीरनामराजधान्यामधिकृतं जवनं लिखनेनाज्ञापयामास, सैन्यञ्चादिदेश। अथ जाँहागीरनगरेश्वर: प्राप्तानुज्ञो बहूनि सैन्यानि दिदेश उवाच च काशीनाथं सपरिवारं बध्वा इन्द्रप्रस्थपुरं प्रेषयत इति। काशीनाथोऽपि निजचरप्रमुखात् सर्व्वं ज्ञात्वा मन्त्रिभिर्मन्त्रयित्वा पलायमानो भागीरथीतीरं गन्तुमुपचक्रमे। जवनाधिपतिप्रेषितसैन्यं च पश्चात् पश्चादागच्छतिस्म। अथ कियता दिनेन दिनैकदेशगस्य मार्गान्तरितौ जवनाधिपसैन्यकाशीसाथौ बभूवतु:। ततो वागोयानाख्यप्रदेशान्तर्गत आन्दुलियानाम ग्रामपूर्व्वभागावस्थितां नदीमुत्तरीतुं काशीनाथ उपविवेश। तत्रैव काचित् कैवर्त्ती मत्स्यान् विक्रेतुमाजगाम। काशीनाथोऽपि मत्स्यान् दृष्ट्वा हृष्टोबभूव चिन्तयामास च। मम वराटादिकं नास्ति मत्स्यस्य बहुदिनानि न भुक्त:। अतोमत्स्योऽयं केनोपायेन नेतव्य इत्यादि।

अनन्तरं स्वहस्तावस्थितहीरकघटितं स्वर्णाङ्गुरीयकं तस्यै विन्यस्य एकं महान्तं मत्स्यं जग्राह, जगाद च मम पश्चादायात-

घटितस्वर्णाङ्गुरीयकं कैवर्त्तीहस्ते दृष्ट्वा पप्रच्छ। अये कैवर्त्ति भवत्या बहुमूल्यमङ्गुरीयकं कुतः प्राप्तम् ? तूर्णं वद, नोचेद्भवतीचौर्य्येणेदं जग्राह इति लक्षये। ततश्च देशाधिपे तथा विज्ञापिते तव समुचितोदण्डो भविष्यति। इति श्रुत्वा कैवर्त्ती ससम्भ्रममाह, एकोब्राह्मणो मत्स्यं नीत्वा तन्मूल्यं वराटकमाने तु मङ्गुरीयकं स्थापयित्वा गतः। ततो जवनेश्वरसैन्यं पुनराह-क्व स ब्राह्मणः अस्मान् दर्शय। ततः सा कैवर्त्ती अन्विष्य तस्यां नद्यां स्नात्वा अनन्यमनसा देवतां पूजयन्तं तं कथयामास। जवनाधिपसैन्यञ्च तथा श्रुत्वा काशीनाथं बबन्ध। कियन्तः परिवाराश्च पलायन्तेस्म। काशीनाथोपि बद्धा सैन्येन निवेदितो दुरात्मनाधिपेनघातितोऽपि भगवन्नारायणनामान्युच्चैरुच्चारयन् तत्तत्प्राणोयोगिभिरप्यलभ्या गतिमाप।

काशीनाथ पत्नीच ससत्वा सुवर्णशतद्वय सहिता एकेन भृत्येनैकयादास्या परिचारकैकब्राह्मणेन सहिता हरिकृष्णसमुद्रारस्य वाट्यां पितृमन्दिर इव तस्थौ।

इति क्षितीशवंशावली चरिते तृतीयः परिच्छेदः।

अथ काशीनाथ पत्नी अनुकूलाखिल ग्रह शुभलग्ने शुभलक्षण लक्षितं पुत्रमेकं सुषाव। तस्य च रमणीयमूर्त्तित्वात् पण्डिता रामेति नाम निर्द्दिदिशुः। समुद्रारोऽपि पुत्ररहितस्तस्मिन् पुत्रस्नेहं वर्द्धयामास। श्रीरामवत् शैशवाभ्यस्तसमस्तविद्ये प्राप्तोपनय संस्कारे नीतिशास्त्रपारगे प्राप्तयौवने समुद्रारः स्वीय-राज कर्म्मणि स्नेहाधिक्येन सुकुमारगुणतया महावंशतयाच परितुष्टो नियोजयामास। अमात्याश्च सर्व्वे तदाज्ञामेवानुवर्त्तन्तेस्म।

गजः परिभ्रष्टोऽरण्यानी परिभ्रमन् कदाचित् कदाचित् ग्रामे समागत्य लोकानुपप्लावयामास ।

अथैकदा काशीनाथरायस्य कुत्रचित् ग्रामे समागत्य स गजः समस्तान् लोकान् विद्रावयामास । काशीनाथोपि लोकमुखात् श्रुत्वा वहुभिः सैन्यैः समावृतस्तं गजं व्यापादयामास । एष च वृत्तान्तस्तद्देशावस्थितयवनवृत्तान्तलिखनार्थनियुक्तामात्येन निज स्वामिने इन्द्रप्रस्थपुरेश्वरजवननाथ विशेषतो लिखितः । इन्द्रप्रस्थपुरेश्वरोऽपि सम्यगवेत्य महारोषाविष्टः काशीनाथं नियम्य प्रेषयितुं जाहागीरनामराजधान्यामधिकृतं जवनं लिखनेनाज्ञापयामास, सैन्यञ्चादिदेश । अथ जाँहागीरनगरेश्वरः ग्रामानुग्री वहूनि सैन्यानि दिदेश उवाच च काशीनाथं सपरिवारं वध्वा इन्द्रप्रस्थपुरे प्रेषयत इति । काशीनाथोऽपि निजचरमुखात् सर्व्वं ज्ञात्वा मन्त्रिभिर्मन्त्रयित्वा पलायमानो-भागीरथीतीरं गन्तुमुपचक्रमे । जवनाधिपतिप्रेषितसैन्यं च पश्चात् पश्चादागच्छतिस्म । अथ कियता दिनेन दिनैकदेशगम्य मार्गान्तरितौ जवनाधिपसैन्यकाशीसाथौ वभूवतुः । ततो वागोयानाख्यप्रदेशान्तर्गत आन्दुलियानाम ग्रामपूर्व्वभागावस्थितां नदीमुत्तरीतुं काशीनाथ उपविवेश । तत्रैव काचित् कैवर्त्ती मत्स्यान् विक्रेतुमाजगाम । काशीनाथोऽपि मत्स्यान् दृष्ट्वा हृष्टोवभूव चिन्तयामास च । मम वराटादिकं नास्ति मत्स्यस्य वहुदिनानि न भुक्तः । अतोमत्स्योऽयं केनोपायेन नेतव्य इत्यादि ।

अनन्तरं स्वहस्तावस्थितहीरकघटितं स्वर्णाङ्गुरीयकं तस्यै विन्यस्य एकं महान्तं मत्स्यं जग्राह, जगाद च मम पश्चादायातकश्चो भृत्यो भवत्यै समुचितं मूल्यं मया विज्ञापितं दत्वाङ्गुरीयकं

घटितस्वर्णाङ्गुरीयकं कैवर्त्तीहस्ते दृष्ट्वा पप्रच्छ; अयि कैवर्त्ति भवत्या बहुमूल्यमङ्गुरीयकं कुतः प्राप्तम्? तूर्णं वद, नोचेद्भवतीचौर्य्येणेदं जग्राह इति लक्ष्ये। ततश्च देशाधिपे तथा विज्ञापिते तव समुचितोदण्डो भविष्यति। इति श्रुत्वा कैवर्त्ती ससम्भ्रममाह, एकोब्राह्मणो मत्स्यं नीत्वा तन्मूल्यं वराटकमाने तु मङ्गुरीयकं स्थापयित्वा गतः। ततो जवनेश्वरसैन्यं पुनराह-क्व स ब्राह्मणः अस्मान् दर्शय। ततः सा कैवर्त्ती अन्विष्य तस्यां नद्यां स्नात्वा अनन्यमनसा देवतां पूजयन्तं तं कथयामास। जवनाधिपसैन्यञ्च तथा श्रुत्वा काशीनाथं बबन्ध; कियन्तः परिवाराश्च पलायन्तेस्म। काशीनाथोपि बद्धा सैन्येन निपीडितो दुरात्मनाविधेनताडितोऽपि भगवन्नारायणनामान्युच्चैरुच्चारयन् त्यक्तप्राणो योगिभिरप्यलभ्यां गतिमाप।

काशीनाथपत्नी च सत्वरा सुवर्णशतद्वय सहिता एकेन भृत्येनैकयादास्या परिचारकैकब्राह्मणेन सहिता हरिकृष्णसमुद्रारस्य वाट्यां पितृमन्दिर इव तस्थौ।

इति क्षितीशवंशावली चरिते तृतीयः परिच्छेदः।

अथ काशीनाथपत्नी अनुकूलाखिल ग्रह शुभलग्ने शुभलक्षण लक्षितं पुत्रमेकं सुषाव। तस्य च रमणीयमूर्त्तित्वात् पण्डिता रामेति नाम निर्द्दिदिशुः। समुद्रारोऽपि पुत्ररहितस्तस्मिन् पुत्रस्नेहं वर्द्धयामास। श्रीरामवत् प्रेमवात्सल्यसमस्तानिले प्राप्तोपनय संस्कारे नीतिशास्त्रपारगे प्राप्तयौवने समुद्रारः स्वीय-राज कर्म्मणि स्नेहाधिक्येन सुकुमारगुणतया सद्वंशजत्वाच्च परितुष्टो नियोजयामास। अमात्याश्च सर्व्वे तदाज्ञामेवानुवर्त्तन्तेस्म।

समुद्रारवाटीजातत्वात् प्राप्तसमुद्रारराज्यत्वाच्च तमपि सर्व्वे

ततः स्वानुरूपगुणकुलविराजितपत्न्यां चतुरः पुत्रान् दुर्गा-दास-हरिवल्लभ-जगदीश-सुबुद्धि-संज्ञकान् जनयामास षट्त्रिं-शद्वर्षान् राज्यं पालयामास च। तेषां ज्येष्ठो दुर्गादासराय एका-दशवर्षवयसि वर्त्तमानः प्राप्ताभिनवोपनयनसंस्कारो वल्लभपुरग्राम समीपवर्त्तिनदीतटे कौतुकं दिदृक्षुः कदाचिदुवास। तस्मिन्नेव काले इन्द्रप्रस्थपुरेश्वरजवनप्रेषितः कश्चित जवनामात्यो महता सैन्येन परिवृतस्तरिमारूढस्तत्राजगाम। तत्सैन्यञ्च दृष्ट्वा इतरे भीत्या पलायिता दुर्गादासस्तत्रैव तस्थौ। जवनामात्यस्ततस्तमाह भो ब्राह्मण हुगुलोति प्रसिद्धनगरमितः कियत् क्रोशान्तरितं तत्र गमने वा कः पन्थाः? जानासि चेत् कथय। ततो दुर्गादासो जालिकः द्वारा-विदिताखिल मार्गवृत्तान्तस्तन्नगरनाख्यानं तत्राख्यसमीपे यावन्तो ग्रामा नद्यां यावन्ति वक्राणि तेषु परिमाणं, तेषुच यावन्मानं जलमेतत् सर्व्वं प्रत्यक्षदृष्टमिव कथयामास: जवनाधिपोऽपि तस्य सौन्दर्य्यं मेधावित्वं प्रागल्भ्यञ्च संस्मृत्य संस्मृत्य प्राह भवतः प्रागल्भ्यादिना भृशं परितोषितोऽस्मि तन्मया सार्द्धं हुगलि प्रदेशे समागच्छेति, सोऽपि भ्रातृभिः सह मन्त्रयित्वा तथा च-कार।

तत्र गते च तस्मिन् वहुमानपुरःसरं वस्त्रालङ्कारादिकं भक्षणा-द्यर्थंव्ययितव्यधनञ्च दत्वा पारसीकशास्त्रमध्येतुं नियोजयामास नियोजितश्च तीक्ष्णबुद्धित्वात् स्वल्पेनैव कालेन समधिगताखिल पारसीकशास्त्रार्थतत्त्वाजवनाधिपस्य तोषमधिकं जनयामास। परितुष्टश्च जवनेश्वरो जावनिकभाषा प्रसिद्ध कानगोइ कर्म्मणि नियोजयितुमाज्ञसो दुर्गादासो जागद। वयं पुरुषक्रमेण राजानः परसेवां कदापि न जानीमः। ततो जवनाधिपः पुनराह। मया लिपिद्वारा इन्द्रप्रस्थपुरेश्वरं निवेद्य भवतो नाम्ना समुत्कर्षो राज्यञ्च

अनन्तरं तया कुमारस्य [illegible] इन्द्रप्रस्थपुरेश्वर [illegible] ख्यातिं लब्धवान् इन्द्रप्रस्थपुरेश्व राधिष्ठतया काननगरे [illegible] स्वर्गं ययौ ।

कियत्कालानन्तरं निजालयादागत्य [illegible] पुरनामनगरे पुरीं निर्माय मनुजासमर्पितकं राज्यं [illegible] वर्षान् शशास । [illegible] फतेपुरनामग्रामे, [illegible] कुड़ालगाछिग्रामे, [illegible] पाटिकाबाड़ी ग्रामे पुरीं निर्माय सुखमवात्सुः ।

तदानीन्तु [illegible] प्रतापादित्यस्य [illegible] निष्कण्टं पृथिवीमुपभुञ्जते [illegible] प्रतापादित्यो विजितारिवर्गो महाधनसम्पन्नः [illegible] आसीत् । इन्द्रप्रस्थपुरस्य [illegible] प्रतापादित्यस्तु पुनः पुनः [illegible] प्रस्थापित [illegible] सैन्यानि निर्जित्य [illegible] ।

अस्मिन्नेव समये [illegible] बहुगणो संस्थितामात्येन च प्रतापादित्यस्य दौर्जन्यं बहुविधं लिपिद्वारा इन्द्रप्रस्थपुरेश्वरं विज्ञापयामास यथा प्रतापादित्यो बहुबलसम्पन्नः यस्य द्वारि द्वापञ्चाशत्सहस्रधन्विनः एकचत्वारिंशत्सहस्रधन्विनः अश्वारोहा अपि बहवः [illegible] सन्ति, अन्यं-चासंख्या [illegible] पदातिकैः स [illegible] बाधते । किं बहुना [illegible] ।

[illegible] । [illegible] । [illegible] पारसीकादि शास्त्रमधीते, [illegible] ; प्रतापादित्यस्तु [illegible] शास्त्राणि [illegible] ।

नामात्यः समायास्यति, तदा वयं तदनुचरीभूय प्रतापादित्यं बद्धा प्रेषयिष्याम इत्यादि ।

अनन्तरं इन्द्रप्रस्थपुरेश्वरो लिपितः प्रतापादित्यस्य दौर्जन्यं समधिगच्छन् कचुरायेणापि इन्द्रप्रस्थपुरगतेन साक्षिणैव तदानीमेव तद्दौर्ज्जन्यं गोचरीकृतम् । अथ इन्द्रप्रस्थपुरेश्वरो रोषात् प्रस्फुरिताधरोष्ठाविंशत्यां सेनापतिभिः सह मानसिंहनामानं कञ्चित् प्रधानामात्यमादिदेश यथा "मानसिंह भवान् महता सैन्येन परिवारितः प्रतापादित्यं दुरात्मानं झटिति बद्धा समानयतु" ।

ततो मानसिंहो महाप्रसादोऽयं देवस्येत्याज्ञां शिरसि निधाय बहुसैन्यवृतोनिर्जगाम निर्गतस्य यस्य प्रकोपात् तस्मात् लोकाः पलायाञ्चक्रिरे, राजानश्च प्रायो न साक्षाद्बभूवुः । अथ कतिपयदिनान्तरं चापड़ाख्यग्रामसमीपवर्त्तिनदी तटे तत्सैन्यं समाजगाम । तत्समीपस्थ राजानः सपरिवारस्तद्भयात्तिरोहिताः बभूवुः । भवानन्दमजमुदारस्तु महासाहसिक एकएव साक्षाद्भूय समुचिताशीर्निवेदनादिपुरःसरं करविनिहितहैममुद्रादिकं साक्षात् कारयन् सत्कृत्य मानसिंहं बहुपरितोषयामास, जगाद च—"प्रभो महाबलपराक्रम, भवता मानसैन्यैस्तद्भीताः सकलराजानः पलायिताः । अहमेकः कतिपयग्रामाधिपो धर्म्मविनेतारं भवन्तं निरीक्षितुमिहागम्, मयाशीर्व्वादकेन यदि किञ्चित् कार्य्यमस्ति तदाज्ञापये"ति । ततो मानसिंहोमजमुदारमुवाच । "भो मजमुदार नदीमुत्तरीतुं समुचितोद्योगः क्रियताम् । यथा सुखेन सैनिकाः पारं यान्ति" । मजमुदारः पुनराह "प्रभो यद्यप्यह मल्पपरिवारस्तथापि भवदाज्ञया सर्व्वं निष्पादयिष्यामीति ।" ततोबहुविधनौकावाहकादि समवधानेन करितुरगादिसमाकुलं तत्सैन्यं सुखेनोत्तारयामास । अनन्तरं मानसिंहोऽपि प्राप्तनदीपारोमजमुदारं

धारामिव [illegible] निरोक्षितमात्मना [illegible] दिनत्रिप्रमाणं [illegible] दुर्दिनं समाक्रान्तं [illegible]। कुत्रापि [illegible] सैन्यस्य चिन्ताप्यस्य बभूव। तस्य च नातिपूर्व्वं मजमुदारोऽपि लक्ष्मीप्रतिमया सह गोविन्दप्रतिमाया विवाहमहोत्सवं कारयितुं बहुविध[illegible]द्रव्यादिसमुचितं [illegible] मासादितवान्। तादृश महावृष्टिमध्ये [illegible] शाश्वतोऽकार्यत्वतया ततो निवृत्तमनास्तेन सम्भारेण तदानीं क्रीतभूरिभक्ष्यद्रव्यादिना च [illegible] प्रकृतीनां मानसिंहस्य च यथोचित[illegible] परमहर्षिकरमातिथ्यं सम्पादयामास। सपरिवारो मानसिंह[illegible] दुर्दिनमपि सुखेनैवातिवाहयामास। ततः सप्ताहानन्तरं दुर्दिनावसानतया प्रकाशित दिङ्मण्डलो परमतोषपरायणः पुनर्मजमुदारमुवाच। "भो मजमुदार इतः प्रतापादित्यनगरं कियता दिनेन गन्तुं शक्यते? कस्मिन् दिने वा कुत्र सेनानिवेशः कर्त्तव्यः? इति लिखित्वा देहि।" श्रुत्वा च मजमुदारः सविशेषं सर्व्वं लिखित्वा समर्पयामास। मानसिंहोऽपि बहुभिः साधुवादैर्मजमुदारं सत्कृत्य सप्रसादमाह। "भो मजमुदार महामते मया प्रतापादित्यं सपरिवारं विनिर्जित्य पुनरागमनसमये भवताभिलषितं वक्तव्यं श्रुत्वा तत्सर्व्वमवश्यं कर्त्तव्यम् त्वमपि मया सार्द्धं प्रतापादित्यपुरमागच्छ।" इत्युक्त्वा विरराम। ततः कतिपयैर्दिवसैर्मानसिंहो बहुबलपरिवारितः प्रतापादित्यनगरीं परिप्राप्तः। अनन्तरं चरमुखात् विदितमानसिंहागमनवृत्तान्तो विरचित दुर्भेद्यदुर्गान्तरविन्यस्तसेनासमुदायोऽनधिगतमानसिंह प्रतिमास्त्रशस्त्र प्रहारी मानसिंहसैन्यं बहुभिः शस्त्रास्त्रैर्द्विपञ्चाशत्सहस्रचर्म्मिभिरेकपञ्चाशत्सहस्रधन्विभिर्महाबलैरश्वारूढैश्च परिवृतो बहुमर्द्दनं चकार। [illegible]-

भित्त्वा दुर्गं भेदयत ; नोचेद्भवतां समुचितं दण्डं विधास्यामि ।”
इत्याज्ञा सर्व्वानेकदा दुर्गभेदने नियोजयामास । ते च मान-
सिंहाज्ञया द्विगुणपराक्रमा इव क्रोध कषायितनेत्राः युगपत्
कृतबहुसंप्रहारा दुर्गं निर्भेदयामासुः ।

अथ विनष्टदुर्गप्रतापादित्यसैन्यं मानसिंह सैन्यञ्च बहुधा
बहुदिवसं युद्धपरायणं बभूव उभयसैन्यमेव कियत् कियत् ननाश ।
अथ प्रतापादित्यबलं स्वल्पावशिष्टतुरगसमाकीर्णमवलोक्य मजमु-
दारेण सह मन्त्रयित्वा मानसिंहो बहुविधबहु करितुरगगण सङ्कीर्णं
एकदैव सहस्रसहस्रतुरगादिभिरुपेतः प्रतापादित्य सैन्यं परि-
प्राप्तः क्षणेन तदुपसंहृत्य प्रतापादित्यं बद्ध्वा लौहमयपिञ्जरे निक्षिप्य
पुनरिन्द्रप्रस्थं जवनाधिपं निवेदितुं चलितः ।

अथ कियता कालेन चापड़ाख्यग्रामसमागतः पुरोऽवस्थितं मज-
मुदारमुवाच । “भो मजमुदार भवतो व्यापारेणास्मिन् संग्रामे महान्
संतोषो कृतः अविरलमहाहदुर्दिने च मम सैन्यस्य प्राणरक्षा कृता
अतस्तव समीहितं ब्रूहि मया तदवश्यं कर्त्तव्यम् ।” इत्येवं
समादिष्टो मजमुदारो भट्टनारायणस्य आदिशूरनगरागमन वंशपर-
म्पराराज्यशासन काशीनाथरायपलायन जवनाधिप कर्त्तृक तन्नि-
धनादिकं सर्व्वं कथयामास, बागोयानाख्यप्रभृतिचतुर्द्दश प्रदेश-
राज्यार्थं स्वाभिलाषं चोद्घाटयामास । एतत्सर्व्वं समाकर्ण्य
मयैतदवश्यं कर्त्तव्यमित्युरीर्थ्य मजमुदारेण सह इन्द्रप्रस्थाधिपं
जवनेश्वरं द्रष्टुं चलितः । अथ बद्धस्य पथि गच्छतः प्रतापादित्यस्य
वाराणस्यां पञ्चत्वमभवत् ।

अनन्तरं मानसिंह इन्द्रप्रस्थं गत्वा तत्र जवनाधिपं सर्व्वं जय
वृत्तान्तं विज्ञापयामास । मजमुदारस्य महादुर्द्दिनसमये समस्त
सैन्यस्यातिथ्यं प्रतापादित्यजये सहकारित्वं च विस्तरेणजवना-

प्रादितदायादं कचुरायनामानं यशोहरदेशराज्यं शासितु माज्ञा-
पयामास; यशोहरजिदितिनामरूप प्रसादञ्च ददौ। पूर्व्व-
निहतस्वीयहस्तिक काशीनाथ रायस्य सुतो मजमुदार इति परि-
चयं जानन् तथाविधातिथ्यादिश्रवणेन च परमपरितुष्टो जवने-
श्वरो मानसिंहमाह "अरे मानसिंह काशीनाथसुतो मजमुदारो
महानुभावः प्रतापादित्यजये च महोपकर्त्ता; तस्मै कश्चिदभि-
लषितप्रसादो दत्तो न वा?"। मानसिंह आह "वागीयानाख्यचतु-
र्द्दशप्रदेश राज्यार्थी मजमुदारोऽत्रैव समागतो वर्त्तते, राज्यप्रसा-
दश्च देवस्याज्ञां विनाऽस्माभिर्दातुं न शक्यते।"

इति श्रुत्वा जवनाधिपः पुनराह "भो मानसिंह मजमुदारं तद-
भिलषित राज्य प्रसादकलिपिमिह्नानय"। ततो मानसिंहो मजमुदा-
रेण जवनाधिपस्य साक्षात्कारं कारयामास, मजमुदारश्च कृतप्र-
णामो जवनाधिपेन वहु सम्भाष्य स्वावासं जगाम। अनन्तरं जव-
नाधिपो मानसिंहेन सह मन्त्रयित्वा मजमुदाराय अभिलषितं
राज्यं दातुमङ्गीचकार तत्प्रेषितपत्रार्थं राज्ञेन प्रसिद्धख्यातिं च
स्वाक्षरेणानुमोदयामास।

अनन्तरमभिलषितराज्यसम्पादकाशेष व्यापारं झटिति
सम्पाद्य मानसिंहेन कृतवहुविधसत्कारः स्वदेशं मजमुदारः
प्रस्थितः। अथ कियत्कालेन वल्लभ पुरसंज्ञग्रामस्थस्वपुरमागतश्च
जवनाधिपानुज्ञया प्राप्तचतुर्द्दशराज्ये स्वाधिपत्यं विस्तारयामास,
प्रजाश्च धर्म्मेण पालयतिस्म। माटियारि संज्ञनगरे देउलियाख्य
धाम्नि च पुरीं निर्म्माय तत्र देवप्रतिमानि च संस्थाप्य कतिचिद्दिनानि
तत्रोवास।

इति क्षितीश वंशावलीचरिते चतुर्थः परिच्छेदः।

अथ कतिचिद्वत्सरानन्तरं तद्राज्यकरग्राहक जाँहागीरनग-

मास। अथ दूत प्रमुखादितो विदित वृत्तान्तोऽतिप्रियेण मल्लेन च्चं हनुवस्य यौयौकण्णरायस्य पुत्रेण गोपीरमणरायनाम्ना पौत्रेण सह जांहागीरनगरं गतः। तदधिकृतजवनश्च किञ्चित् छलमाश्रित्य मजमदारं कारागारे ववन्ध। तत्पौत्रश्च तद्बन्धन मोचनायानुदिनं यततेस्म। अथैकस्मिन् दिवसे मजमुदार पौत्रो गोपीरमणरायः स्नातुं नदीमगमत्। तत्र च घट्टसमीपावस्थित मेकं महोपलं देवतापूजासनार्थं घट्टमानेतुं वहवः शूरा व्यापार-यामासुः। प्रस्तरस्य महागौरवेण तेषां सर्व्वाः क्रिया विफला बभूवुः। अथ तस्मिन्नेव काले कश्चित् हस्तीपको मत्तमत्त हस्तिन मेकं पानीयं पाययितुं तत्रैव निनाय शूराश्च हस्तीपकमाहुः। "अये हस्तीपक अनेन हस्तिना एनं महोपलं घट्टे संस्थापय भवते वयमाहारार्थं भवदभिमतं द्रव्यादिकं दास्यामः।" तत्श्रुत्वा स हस्ती पकस्तं महोपलं घट्टं नेतुं तं हस्तिनं योजयामास। स च हस्ती तं महोपलं उद्धत्तुं पुनः पुनः प्रेरित करोऽपि महोपलस्य दैर्घ्य-प्रस्थाधिक्ये न धत्तुं न शशाक। विफलितकरिव्यापरो हस्ति पकोऽपि निःश्वस्य निवृत्तः स्वस्थानं गतः। गोपीरमण एतत् सर्व्वं दृष्ट्वा सर्व्वान् शूरानाहूयाब्रवीत्।

"अये शूरा एतस्य प्रस्तरस्य घट्टा नयनाय युष्माकं शूराणामेता-वानायासः? किमेतत्? पश्यत एकाकिना मयैवानीयते।" इत्युक्त्वा महोपलं लीलया दोर्भ्यां गृहीत्वा समुद्धृत्य सर्व्वानाह। "यूयं कथ-यत महोपलोऽयं कुत्र स्थापनीय" इति।

ततस्तै र्रादिष्टस्थाने महोपलं लीलया स्थापयामास। तत् दृष्ट्वा सर्व्वे विस्मिताः परस्परं तस्य वीर्य्यं प्रशंसन्तः स्वस्वस्थानं गताः। रायोऽपि कृताह्निकक्रियः स्वस्थानं गतः। ततः परदिवसे पौरा जांहागीरनगराधिकृतं जवनं विज्ञापयामासुः। "प्रभो गोपीरमण

कुञ्छितमदमत्त महाकरिप्रयासो हेलया समुत्तोल्य पट्टे स्थापितः एतन्महदाश्चर्य्यम् ।" एतच्छ्रुत्वा सोऽनुचरानाह। "स ब्राह्मणः कुत्र अन्विष्यास्मत्साक्षात् समानयत।" तं च समन्विष्य रायं साक्षात्कारयामास ।

अधिकृत जवनश्च रायमाह "अये राय महोपलो भवता समुद्धृत्य पट्टे स्थापितः ? राय आह "महाबलस्य चरणौ स्मरता ज्ञानतमयेऽनायासेन समुत्तोल्य पट्टे स्थापितः तत्र प्रभूणां महिमैव हेतुः ।"

ततोऽधिकृत जवना पुनराह "भो ब्राह्मण मम समक्षं महोपलो भवता पुनरुत्तोलनीय इति मया द्रष्टव्यम् ।" रायः पुनराह-"यथा निर्द्देशः प्रभूणां तथा कर्त्तव्य मेव ममेति" ।

ततो बहून् मल्लान् समादिश्य शकटद्वयश्च प्रेष्यतं महोपलं महता व्यापारेण साक्षात् समानयामास । अथाधिकृतजवनः रायमाह "भो राय महोपलं समुत्तोलय ।" ततोरायः यथा व्यवहारं अधिकृत जवनं नमस्कृत्य दोर्भ्यां तमुपलमुद्धृत्य कुत्रस्थापनीय इत्युक्त्वा तदादिष्ट स्थाने निवेशयामास । अधिकृतजवनो महापरितुष्ट मनसा राय मुवाच । "भो राय भवता शौर्य्येणाहं परितोषितोऽस्मि । तद्भवतः किं प्रार्थनं प्रकाशय ।" ततोराय आह "प्रभो मानसिंहबन्धुतुल्यस्य इन्द्रप्रस्थाधिप जवनेश्वर दत्तवागीयान् प्रभृति चतुर्द्दशभूप्रदेश राज्याधिपस्य प्रभुचरणानुग्रह सम्पादित तद्राज्यस्थैर्य्यस्य श्रीमद्भवानन्द मजमुदारस्य पौत्रोहं श्रीगोपीरमण शर्म्मा । मम पितामहः प्रभुकारागारे स्वीकृत राज्यकरा दत्तावशिष्टदानाभाव हेतुना बद्धोवर्त्तते । तं मोचय एतदेव मम प्रार्थनीयं अन्येन धनादिनं प्रयोजनं न किञ्चित् ।" एतच्छ्रुत्वा परितुष्टोऽधिकृत जवनः कारागाराधिकारिणमाह "अरे कारारक्षक आद्यैवास्य लौहवलयं छित्वा मजमुदारमानय ।" इति शृण्वन् गोपीरमणराय

प्रभो राजन्चेत् अत्र समानीतस्य पितामहस्य चरणबन्धनलौह वलयो मया कर्त्तनेन च्छेदनीय” इति श्रुत्वाधिकृत जवनस्तथाज्ञापयामास ।

अथ लौहवलय वद्ध चरणोमजमुदारोऽधिकृत जवनाधिप समक्षमागतः । अनन्तरमधिकृत जवनाज्ञया तस्य पादबन्धन लौहवलयं करव्यापारेण गोपोरमणोवभञ्ज । दृष्ट्वा सर्व्वे विस्मिता बभूवुः । अधिकृत जवनश्च मजमुदारं गोपीरमणञ्च प्रसादादिना परितोष्य स्वदेशं प्रस्थापयामास । तौ च स्वालय मागत्य वहुविधान् यज्ञान् इष्टा पूर्त्तादि कर्म्माणि च संपादया मासतुः । मजमुदारस्य च त्रयः पुत्राः श्रीकृष्णराय गोपालराय गोविन्दराम राय नामानः सुप्रसिद्धाः वर्त्तन्तेस्म । मजमुदारः पुत्रेभ्यः स्वीय राज्यं विभज्यदातुं पुत्रानुवाच । मया विभक्तं राज्यं समांशेन यूयं गृह्णीत। इति श्रुत्वा ज्येष्ठः श्रीकृष्ण राय आह । “राज्यस्य विभागो न भवति । ज्येष्ठस्यैव सकलं राज्यमिति रीतिः प्रसिद्धैव ।” इत्याकर्ण्य मजमुदारः सकोपमाह “भवान् कृती विद्वांश्च अन्यद्राज्यं कथं न करोषि ?” इति श्रुत्वा श्रीकृष्णः पुनराह “गुरूणां युष्माकं चरणप्रसादश्चेत् किमिदं विचित्रम् ? इत्युक्त्वा पितरं प्रणम्य तेनानुज्ञातः शीघ्रमेव इन्द्रप्रस्थं जगाम, गत्वाच तत्र महता प्रयासेन तदधिप जवनेश्वरेण सह साक्षात् चकार, स्वाभिलषितं च निवेदयामास । परितुष्टो जवनाधिपः खोषदहेति प्रसिद्ध भूभागस्य उखड़ेति भूभागस्य राज्यस्याज्ञाञ्चकार । प्राप्तराज्यश्च कियता कालेन स्वगृह मागत्य कृताभिवन्दनादिक्रियो मजमुदारं समस्तं निवेदयामास । मजमुदारश्च सर्व्वं श्रुत्वान्तं वहु प्रशशंस । एवं विंशतिवर्षं सुशासितराजस्य मजमुदारस्य प्राप्तपरलोकस्य श्रीकृष्णः स्वार्ज्जित राज्यं तदितरौ भ्रातरौच विभज्य प्राप्तं पैतृकं राज्यं शशासतुः ॥

परितोषितो रामचन्द्रस्य रामजीवनस्य च सर्व्वं व्यवहारं जाहागीरनगराधिकृतप्रधानजवनं स्वीयलिखनेन विज्ञाप्य तत्स्वाक्षराङ्कितं रामचन्द्रस्य राज्याधिकारित्वसूचक लिखनमानाय्य समर्पितराज्यं रामचन्द्रं स्वदेशं प्रस्थापयामास ।

ततस्तेन प्रस्थापितः श्रीनगरस्थितराजधानीमाक्रम्य राज्यं शासितुमुपचक्रमे । रामजीवनोऽपि योद्धुकामः सैन्यसञ्चारं चकार । कदाचित् कदाचिच्च युद्धमपि तयोरभवत् । एवं सविवादमेव वर्षत्रयं कियन्तं कियन्तं कारं जवनप्रधानाय ददत् पैत्रिकं राज्यं रामजीवनः शशास । रामचन्द्रोऽपि कतिपयग्रामेषु कदाचिदधिकारं चकार । अथ केनाप्युपायेन रामजीवनो रामचन्द्रं वञ्चयित्वा जाहागीरनगरे निरुद्धं स्थापयामास स्वयमेव निखिलं राज्यं निर्द्वन्द्वं पालयामास । जाहागीरनगराधिकृतजवनप्रधानं साक्षात्कर्त्तुं कदापि न जगाम, देयत्वस्वीकृतकरञ्च न सकलं ददौ, अवशिष्टमधिकमासीत् ।

एतत् सर्व्वं ज्ञात्वा जवनप्रधानः सक्रोधो राधावल्लभनामानमेकमाज्ञाकारिणं देयत्वस्वीकृतकरावशिष्टस्य [illegible]करस्य च ग्रहणार्थं राज्यस्य कियन्तः करा रामजीवनेन [illegible] इत्यवगन्तुञ्च रामजीवनराज्ये प्रस्थापयामास । आगते च तस्मिन् कतिपयदिनानन्तरं राधावल्लभेन सार्द्धं बलात्कारपूर्व्वकं करग्रहणनिमित्तकपरस्परप्रवर्त्तितपरुषवाक्कलहेन सुमहद्वैरमुपस्थितमिति राधावल्लभोऽत्यन्तविवर्द्धितरोषराशिर्जाहागीराधिकृतजवनसन्निधौ रामजीवनस्य महद्दौर्जन्यं न्यायोपात्तकरदाने च प्रातिकूल्यं बहुविधं प्रकाशयन् तदनुजस्य रामकृष्णरायस्य च सौजन्य-

राज्यं भवति, तथा अकाधिपत्याहतं [illegible] राज्यं राज्यभ्रष्टं स्थापयितुं [illegible] इति ।

एतस्मिन्नेव [illegible] रिपुर्वेति गजेन्द्र [illegible] पुरं [illegible] लुण्ठितम् । [illegible] शोभा-सिंहेन [illegible] वर्द्धमान [illegible] स्थितनाखोदिस्थ [illegible] समागतम् । तदानी-मेव [illegible] पदव्रजानागतीति [illegible] सपरिवारस्य पला-यनावसरकालोऽपि, युद्धासक्तो च पूर्णं न जाता का उपायः कर्त्तव्यः, सपरिवारस्य नाश उपस्थित इति चिन्तयन् स्वपुत्रं श्री-जगत्रामनामानं कोविज्ञाविधं कृत्वा स्त्रीणामारोहणयोग्य-यानेन परदलैरनुपलक्षितं [illegible] सन्निधौ [illegible]नगरे प्रेषयामास । परकृतजनानां परिवाराणां महानपकारोदुरवस्था भविष्यतीति चिन्तयंस्तान् स्वयमेव जघान ।

अथ [illegible] समागत्य हतपरिवारं कृष्ण-रामरायं निहत्य वर्द्धमानमुपद्रावयामास । पलायनपरायणश्च जगत्रामं [illegible] प्रदेशे निभृतं स्थापयामास । शोभासिंहस्य [illegible] वर्द्धमाने स्वाधि-पत्यं [illegible] । [illegible] रम्यतरमूर्त्तिः केनाप्युपायेन जीवनं धारयन्ती सिंहेनाकृष्टा [illegible] दृष्टा च सिंहः कामवशगोऽभवत् । तया सह रन्तुमुपचक्राम च ।

ततस्तस्मिन्नभिः मनुपचारसमीपं सहसा नोपमीलाभ्या निः-घोषितवैरिपक्षेण जातवर्द्धमानचिराधिपत्येन च विविच्य सा भोक्त-व्येति निषिद्धोनिवृत्तमना बभूव । वर्द्धमानजयजातमहादर्पश्च इन्द्रप्रस्थपुरेश्वरस्य वङ्गादिदेशाधिपत्यं विघटयितुं बह्वीषु राजधानीषु

[illegible] सिन्धूनां प्रसङ्गं व्यनक्ति । अथ
[illegible] चाक्षुषात् सुबहलाल्लोहितमिव
[illegible] इति प्रसिद्धवृक्षि
[illegible] क्षयं [illegible], पश्चात्तुरगारूढ़ै रपि
[illegible]रूढ़ा आ[illegible]ता: ।

तत [illegible] सिंहलैन्यो इन्द्रप्रस्थाधिपसैन्येन तीक्ष्णतरा-
[illegible]: सिंहलसैनिका: केचिच्छिन्ना, अपरे
भिन्ना, [illegible] चूर्णिता:, परे च [illegible] इति [illegible]
[illegible] पलायनपरा: [illegible] । [illegible]
[illegible] प्रधमाना [illegible] दुन्दुभिनादेन [illegible]
[illegible] । [illegible]
[illegible]
[illegible]
[illegible] ; [illegible] च
[illegible] छत्रपरिच्छदा-
हृता: [illegible] पदातिभि हत: साक्षात्
चचार । [illegible] नृपतीन्
निरीक्ष्य [illegible] । अमी तावन्नृपा: क्षुद्र-
वंशजत्वात्, नैषां [illegible] परिच्छद एतेषां, रामकृष्णरायस्तु
महानंशप्रसूतोऽसङ्ख्यपरिच्छदाहृत:, मत्परिच्छदसदृश एवास्य परि-
च्छद: रूपेण च द्वितीय: कन्दर्प इव, तेजसा च साक्षात् सहस्र-
रश्मिरिव, वयसा च [illegible]सदृश: सैन्यगणैरपि बहुभिर्वृतो ऽस्मा-
[illegible] परिच्छदाच्छन्न[illegible] लोचनानन्दजनको
गौड़ाधिदेशी प्रधाननृपतिरयमेवेति ।

अथ रामकृष्णं समुचिताचरणेन कृतसत्कारपूर्व्वकं साक्षात्-

[illegible] न मानुषिनीलवादिविज्ञापनेन तदङ्गं सम्पाद-
[illegible]।

[illegible] स्वामि दाक्षिणात्यब्राह्मणः प्रधानो बड़
[illegible] आसीत् तेन सार्द्धं रामकृष्णस्य मैत्रमासी-
[illegible] कालेन तद्गत रामकृष्णस्यानुपूर्व्यं क्रियते सर्व्वशास्त्रनिपुण
[illegible] प्रसिद्धमेवं तदभिमतनिर्वाहाय
[illegible]।

[illegible] राज्यं शासतस्तस्य यशोहराधिपनृपेण
[illegible] मनुद्वैरमभवत्, रामकृष्णेन च
[illegible] तदधिपं च निर्जित्य
[illegible] लुण्ठयित्वा परेषां नृपाणां [illegible]
[illegible] स्त्रीय-स्त्रीव-विविदनमनुदितं [illegible] लोका अपि-
[illegible] भवतीति।

[illegible] यत्कार्य्यार्थं लिखति
[illegible] निर्व्वाहयति। इन्द्रप्रस्थाधिपेन
जाँहागीरनगरेऽधिकृतो जाफरखाँ इति प्रसिद्धजवनः सदापकारं
चिकीर्षुरपि न किञ्चिदप्यपकारं कर्त्तुं शशाक, स्वीकृतदेयकरञ्च
[illegible] यद्ददाति तदेव प्राप्नोति समुचितं करं कदापि न ग्रहीतुं
शक्नोति। एवमेवैकादशवर्षान् राज्यं शशास, देयत्वस्वीकृतक-
रस्य स्वल्पमेव दत्तं, बहुतरमवशिष्टमासीदिति महता प्रयासेन
जाँहागीरनगरे नीत्वा पूर्व्ववद्धेन रामजीवनरायेण सहैकत्र छलेन
रामकृष्णरायमपि निरुद्धं बन्धयामास, बद्ध एव कतिचित् काला-
नन्तरं मसूरिकारोगेण पञ्चत्वमवाप। इन्द्रप्रस्थाधिपतिरोऽपि
तच्छ्रुत्वा बहुशोकाविलः खिन्नोबभूव।

तदनन्तरं जाफरखाँ इति प्रसिद्धजवन इन्द्रप्रस्थाधिपपौत्रं निवे-
दयामास, यथा रामकृष्णरायोमृत इदानीं [illegible]

समर्पणीयम्। अन्या च आसां [illegible] पुत्रः, पुत्रपुत्रः, पौत्रा-
दिर्वा योऽस्ति तस्मै समर्पय। पुनरपि यवन आह। पुत्रः
पुत्रपुत्रः पौत्रादयोऽपि न सन्ति। श्रुत्वा इत्थं [illegible]
राजकर्म्मकुशलाय रामकृष्णाय [illegible]
[illegible] समर्पय। पुनरपि यवन आह "इह सर्वं
[illegible] नास्ति, किन्तु तस्य ज्येष्ठभ्राता [illegible]
[illegible] वर्त्तते, आज्ञा, भवति चेत्तस्मै समर्पये"। [illegible]
यदि [illegible] रामकृष्णस्य कोऽपि नास्ति तदा सुतरां
तस्य ज्ये[illegible] राज्यं [illegible]-
द्वीपराज्येऽभिकृत्य बहुविधवाहनभूषणवस्त्रादिप्रसाददानेन तं सत्-
कृत्य स्वदेशे प्रस्थापयामास। अन्यत्र च [illegible] व्यवहारपूर्व्वक
[illegible] तैरनुज्ञातो [illegible] राज्यं
प्रसाद। [illegible] कुशलः नाना
विधगुणविशिष्टश्च राजकर्म्मणि दक्षः प्रजानामनुरञ्जकोऽभवत्।
तस्य पुत्रो रघुरामरायनामा [illegible] महाप्रताप
परायणः [illegible] जीवत्येव पितरि प्रजानुरञ्जकोऽभवत्
सततं पितुः [illegible] यशोवितानयामास।
अयञ्च [illegible] च [illegible]। तथाहि मुरशिदाबादनवाबकृ-
ताधिकारेण [illegible] किञ्चित् किञ्चित् छलमा-
श्रित्य तस्मै राजानो [illegible], तद्वं पितरस्तु सुदूरदर्शी रघुरामो-
ऽपि [illegible]। तदैव च रामगाड़ इति प्रसिद्धदेशाधिप
उदयरायनामा नृपो जवनाधिपेन कृतविवादो [illegible] सैन्यसङ्घैः
वीरकाटीनामस्थाने कृतदुर्गविन्यासो [illegible]। जवनाधि-
पोऽपि बहुसैन्यपरिवारैः [illegible] सेनापतिमुदय-
रायं [illegible] नियोजयामास। बहुविधसङ्ग्रामादनन्तरं [illegible]-

रामजीवनानुमत्या युवराजं स्वसुतं पारिपार्श्विकं कल्पया-
कार ।

अथ कतिपयदिनानन्तरं लाहरिमल्लोदयरायसैन्यं सम्मु-
खीनप्रायं बभूव। तदनन्तरं केनापि हेतुना दूरतरावस्थितसैन्य-
समुदायं युवराजेन सह मन्त्रणायामासक्तं पञ्चषट्सहचरमात्र
परिवृतं [illegible] गोलामस्मादुदनामजवनस्य
कनीयान् [illegible] तरुणतरवयस्को युद्धविचक्षणस्तुरग
वरमारूढोऽत्युज्ज्वलनीलतलवारिचर्मा स्वानुरूपवयो .वाहन
भूषणशस्त्रास्त्रादिभिर्दशभिः सादिभिः सह लाहरिमल्लमुद्दिश्य
धावतिस्म। लाहरिमल्लोऽपि तथा दृष्ट्वा युवराजमुवाच। "भो
युवराज मादृशां सैनिका दूरेऽवस्थिता बलाधिकैररिभिश्च वयं प्राप्त-
प्रायास्तदिदानीं किं विधेयं बलवद्भिरस्माभिः स्वल्पबलैरस्माभि
र्युद्धे भङ्गं न निरीक्ष्यते"। इति श्रुत्वा युवराज आह। "भो महा-
सत्त्व युद्धे पलायनमकीर्त्तिकरं त्वयि पलायिते च सैनिका
अवश्यं भङ्गं यास्यन्ति तेषु च पराभूतेषु वैरिहस्तग्रस्तानां आपाद
स्वाङ्गस्तग्रस्तानां वा विघ्नोऽप्यवश्यं भविष्यति। अतोयुधिस्थैर्य-
मालम्ब्य, विचतुराः पुरुषाः उद्यतायुधा अपि मया झटिति
व्यापादनीयाः ततश्चापरेऽपि वैरिणो नूनं भङ्गं यास्यन्ति। इति
परस्परं कथयतोस्तयोर्नातिदूरे द्रुततरवाहिततुरगोगोलामस्मादुद
कनीयान् कोपविनिःसृततीक्ष्णतरासिः कालकल्पइव लाहरिमल्लं
समाजगाम। पुरोवर्त्तिना नयनेन पश्यन्नपि पश्चादपसरन्निव युव-
राजमाह। "भो युवराज आसन्नोऽयं वैरी कथमिदानीमपि नास्य
वारणे प्रयत्नः क्रियते धीमद्भिः"। श्रुत्वा युवराजः सस्मितमाह
"स्थिरोभव अलमनया शङ्कया मम कर्त्तव्यं समासन्नतरे वैरिणि
गोचरीकर्त्तव्यम्"।

तत्पृष्ठलग्नो भल्ल: [illegible]। [illegible] तथाविधक्रमेण [illegible] गोलाश्ममामुदकनीयांसं [illegible]मुत्पाद- [illegible] कर्णाकृष्टेन तीक्ष्णशरेण विव्याध, शरश्च तस्य पिहितलौहकवचमपि वक्षो विभिद्य सुदूरमपसृत:। शरनिर्भिन्नहृदयेन च स एवंविधो दृढप्रहारी धन्वी युवा प्रत्यक्षी- कृतरघुयुद्धेन मया नालोचित इत्यादि क्रमेण रघुरामं स्तुवन्नश्व- पृष्ठात् पपात जगाद च। "भो महाराजकुमार मम महती चिन्ता बाधते तव शरपात[illegible] परिक्षता: पलायिता [illegible] मां पार्श्वे यापय। श्रुत्वा [illegible] रघुं तुरगाद् [illegible] तं समाश्वासयन् युवराज आह। भो महावीर अस्माकं सेनामध्ये त्वं नीयसे, चिकित्सया भवत: प्रतीकारो विधेय:, यथारुचि भवतां प्रकाशय। श्रुत्वा स आह भो युवराज किमेवं ब्रवीषि ? तव शरपातेन मम [illegible] युधि वीरतमस्य- मरणेऽस्माकं खेदो नास्ति। यावद्देहे प्राणा वसन्ति तावद[illegible]स्य मम पुरस्तात्[illegible]। युवराजोऽपि निपतदश्रुधारया तमभिषिञ्चन् [illegible]। [illegible] स मृतो यथोचितां गतिमाप।

अथ कृतजयशब्दे [illegible] निश्चित- [illegible] परिभ्रमयन् असंख्यबला- हनो युवराजं पुरस्कृत्य समुच्छ्रितजयपताको [illegible] समागत्य जाफरखांजवनं रघुरामस्य विक्रमं युधि शौर्यं मन्त्रणाचातुर्यं च सर्वं निवेदयामास। श्रुत्वा जाफरखांजवनोऽपि परमपरितुष्टो युव- राजं [illegible] रघुरामस्य [illegible] निश्चितमित्यादि। रामजीवनोऽपि परमपरितुष्टो [illegible]राशीर्भिरभिनन्दयामास। इति तस्य सर्वलोकविस्मापनीय कर्माण्यद्यापि लोकैर्गीयन्ते स्म।

अथ द्वात्रिंशदधिकषोड़शशतीशकाब्दे रघुरामस्य पुत्रोऽनुकूलाखिलग्रहसंस्थाने शुभलग्ने प्रजानामानन्दनिचयं सम्पादयन् पितुः पितामहस्य चापाराानन्दपयोधिमुद्वेलयन् परमरमणीयमूर्त्तिः समजायत। जाते च तस्मिन् ज्योतिर्विदः समागत्य जन्मलग्नादिकं विचार्य्य बहुविधगुणसम्पन्नो बालकोऽयं भविष्यति इति तत्पितरं पितामहञ्च निवेदयामासुः। राजा च तान् वाहनभूषणवसनालङ्करणादिना सत्कृत्य स्वस्वस्थानं प्रेषयामास। अथ परमानन्दसागरनिमज्जदखिलप्रजासमाजमुख परम्परापरिश्रुतमहानुभावमहोमहेन्द्रानिजकुमारजननवार्त्तापीयूषराविरुल्लपितान्तराल्द्भमान्नमसद्भनरमम्परा अपि उत्तरोत्तरसमेधमानदिदृक्षा परम्परापरिगृहीता निजपरविषयवासिनोऽपि द्विजातयः कृत पूगवन्याः दिग्विदिगभ्यो बहुशः समाजग्मुः, आगत्य च ते जातोऽयमभिनवकुमारो रोगशोकादिहीनोगुणगणनिधानोदीर्घजीवी भूयादित्यादिकमुच्चारयामासुः। ततो राजा तान् ब्राह्मणान् सत्कृत्य स्वस्वस्थानं प्रस्थाप्य कुमारस्य षाण्मासिकसमये मौहूर्त्तिकावेदितशुभलग्ने महत्या समृद्धा नामकरणान्नप्राशनसंस्कारौ विधास्यन् अङ्ग वङ्गकलिङ्गमगध - काशीलाञ्चीप्रभृतिविषयवासिनोनृपतीन् नृपतिकुमारान् तपःस्वाध्यायनिरतब्राह्मणादींश्च निमन्त्रयामास।

तेषां निवासार्थं वसनादिमयनानाविधसौधावलिविराजित सुचतरमदनगणशोभमानं श्वेतनीलपीतरक्तप्रभृतिनानाविधपताकावलिभूषितं वसनादिमयप्राचीरवेष्टितं क्रोशायामार्द्धक्रोशविस्तारं पुरं निर्म्माय खाद्यप्रभक्ष्यभोज्यादिद्रव्यं च तत्र संस्थाप्य समागतनृपादीनां योगक्षेमनिर्वाहार्यस्त्रात्यगणञ्च अनाहूतानां कौतुकादिदृक्षूणां च समागतानां नानाविधवर्णानामुपभोगार्थमुच्चावचप्रचुरभक्ष्यद्रव्याणि कल्पयामास। यत्र दधि

[illegible]दीनां का गणना। अथ संस्कारपूर्व्वे दिने समागतान् द्विजनृपादीन् यथोचितसत्कारेण प्रागुपकल्पित वासे निवेश्य भक्ष्यद्रव्यादिना सन्तर्पयामास। परदिने च तेषु सभोपविष्टेषु मौहूर्त्तिकाविदित शुभलग्ने कुमारसंस्कारमुपचक्रमे। तत्र च ब्राह्मणादीनां वेदध्वनिभिः सूतमागधवन्दिप्रभृतीनां स्तोत्र पाठैर्न्यायमीमांसादिशास्त्रविदां परस्परवादैः शङ्खघटाभेरीतूरी [illegible] परमानन्दभरमन्थरवार रमणीगणनिसंष्टु[illegible]परिवर्द्धि-[illegible] द्विजगण-भोजनार्थपरिवेशनकालोननीयन्तां, भोज्यन्तां, प्रतिगृह्यन्तामित्याद्यनेकविधसचिवगणकोलाहलैः [illegible]-[illegible]श्चिचतुरादिदिनं समाकुलचतुर्दिगन्तरालापि धरणी सुलालि-[illegible]संस्कारमहोत्सवं परि-लोकयन्तो पाणिपीड़नसंस्कारमितोऽप्यधिकया समृद्ध्या कयाऽपि धन्यया भविष्यतीति संचिन्तयन्ती परमानन्देनाधिकं विराज-तेऽस्म। अनन्तरं दानमानादिना परितोषिता द्विजनृपतिगणाः कुमारमाशीर्भिरभिनन्दयामासुः, “यथा नानागुणसम्पन्नश्चिरं निष्क-ण्टकं पृथिवीं पालयतु, यथा च यत्कर्त्तुमिच्छति परदेवता तद-खिलं सम्पादयतु” इत्यादि।

ततोद्विजादिगणेषु स्वस्वस्थानं प्रस्थितेषु प्राशनसंस्कारस्योत्तर कर्त्तव्यमखिलं सम्पाद्य [illegible] जाफरखां [illegible] मुरशिदाबादाख्यपुरं नीतो रामजीवनरायः कति-चित्कालानन्तरं दशवर्षशासितराज्यो मृतः परमागतिमवाप।

ततस्तत्सुतो रघुरामनामा पूर्व्वोक्तकीर्त्तिमाद्भुभावो रघुरिव

आसीत्, तत्समो दयालुर्धार्मिकः प्रतापान्वितश्च द्वितीयो नासीत्। देवद्विजातिगणपरितोषमादधानः कृष्णनगरे वर्षद्वयं राज्यं प्रति-पालयामास॥

ततोजाफरखाँ जवनेन पूर्व्वमेवेतरे राजानो नियमिताः। पश्चा-द्रघुरामरायोपि मुरसिदावादनगरे बन्दितो रक्षितः। बद्धेनापि तेन याचकानामयाचमानब्राह्मणेभ्यो वृत्तिकरी भूमिः प्रायः प्रति-दिनमेव दत्ता, यदा च येन यत्प्रार्थितं तदेव तेन ततस्तल्लब्धमिति। बद्धेन च तेनैवादृशमयीं कारुण्यपुण्यपुञ्जानानन्यशासनां महीं शशास।

ततः कियत्कालानन्तरं मुरसिदावादात् कृष्णनगरे समागत्य चतुरोमासान् राज्यं प्रतिपालयामास, तस्मिन् राज्यं शासति ब्राह्मणानां क्वापि दारिद्र्यं न जनानाञ्च नाधर्म्मलेशः, बान्धवाश्च सुख-सागरमग्नाः सन्तः सर्व्वे कार्याकार्यविवेकविरताः। ततः स्वयमपि कृतयागादिक्रियः सर्व्वोपभोगसंशासितराज्यः पञ्चाशदधिकषोड़-शशतीशके भागीरथीतीरे मुक्तप्राणः परमांगतिमवाप।

ततस्तस्मिन् वर्षे मुरसिदावादाधिकृतजवनानुमत्या तत्सुतं श्रीकृष्णचन्द्रनामानं बहुगुणनिधानममात्या राज्ये च सिषिचुः।

परिशिष्टम्।

(१) नवनवत्यधिकनवशतीमिताब्दे आदिशूरनामा भूपतिर्वङ्गे कान्यकुब्जदेशात् भट्टनारायण, दक्ष, श्रीहर्ष, छान्दड़, वेदगर्भसंज्ञकान् पञ्च ब्राह्मणानानिनाय। अथेदानीं तत्र भट्टनारायणवंशस्यैकशाखाविस्तृतिर्लिख्यते।

(२) क्षितीशः भट्टनारायणस्य पिता कान्यकुब्जे राजेतिख्यात आसीत्।

(३) भट्टनारायणः—९९९ शकाब्दे वङ्गे आगतः तत्र च आदिशूरात् कतिग्रामेषु निष्करमधिकारं प्राप्य तत्र चतुर्विंशतिवर्षान् राज्यमकरोत्। तस्य षोड़शपुत्रेषु निपुनामा तदधिकारमलभत। स च केशरग्रामे अष्टाविंशतिसंवत्सरान् राज्यमकरोत्। केशरग्रामेऽवस्थानादद्यापि तद्वंशीया केशरग्रामिकत्वेन प्रसिद्धाः।

(४) हलायुधः—निपु पुत्रः, पञ्चदशवर्षान् राज्यं शशास।

(५) हरिहरः—हलायुधपुत्रः, विंशतिवर्षान् राज्यमकरोत्।

(६) कन्दर्पः—हरिहरपुत्रः द्वाविंशतिवर्षान् राज्यमकरोत्।

(७) विश्वम्भरः—कन्दर्पपुत्रः अष्टाविंशतिवर्षान् राज्यं शशास।

(८) नरहरिः—विश्वम्भरपुत्रः एकविंशतिवर्षान्।

(९) नारायणः—नरहरि पुत्रः, चतुर्विंशतिवर्षान्।

(१०) प्रियङ्करः—नारायणपुत्रः, अष्टाविंशवर्षान्।

(११) तारापतिः—प्रियङ्करपुत्रः, एकचत्वारिंशद्वर्षान्।

(१२) कामः—तारापतिपुत्र, द्वाविंशवर्षान्।

(१३) कामस्य चत्वारः पुत्राः विश्वनाथप्रभृतयः। तेषु विश्वनाथः करदानेन यवनाधिपं परितोष्य काँकादीप्रभृतिबहुविधदेशान् निष्करराज्यातिरिक्तान् लब्ध्वा एकत्रिंशद्वर्षान् राजा बभूव।

(१४) कंसारिः—विश्वनाथपुत्र, अष्टत्रिंशद्वर्षान् नृपोबभूव।

(१५) काशीनाथः कंसारिपुत्रः, स च चतुस्त्रिंशद्वर्षान् राज्यं

शुभलक्षणं सुलक्षणलाञ्छितं पुत्रमेकं सुषाव। तस्य च रमणीय [illegible] रामेति नाम निर्द्दिदिशुः। स हरिकृष्णसमु-द्वारस्य वाञ्छां पूरयन्नागतः संवर्द्धितश्च बभूव। समुद्धारवाटी जातत्वात् ग्रामसमुद्धारराज्यत्वाच्च तमपि सर्व्वे रामसमुद्धारनाम्ना प्रथयन्तिस्म। स दुर्गादास-हरिवल्लभ-जगदीश-सुबुद्धिसंज्ञकान् चतुरः पुत्रान् जनयामास, षट्त्रिंशद्वर्षान् राज्यं पालयामास च। तेषां ज्येष्ठो दुर्गादासः केनचिज्जवनामात्येनानुगृहीतः पारसीकविद्या-मधीत्य समधिगताखिलपारसीकशास्त्रार्थतत्त्वो जवनाधिपस्य तोष-मधिकं जनयामास। स एव पश्चात् भवानन्दमजमुदार इति प्रसिद्धो बभूव। भवानन्दः विंशतिवर्षान् राज्यं शशास। तस्य त्रयः पुत्रा आसन् ज्येष्ठः कृष्णरायोऽपुत्रकोमसूरिकारोगेण मृतः, मध्यमो गोविन्दरायोराजकर्म्मणि न तादृक् कुशलः, कनिष्ठोगोपालरायश्च नानागुणसम्पन्नः सप्तवर्षान् राज्यं शशास।

(१६) राघवरायः—गोपालरायपुत्रः नियमितकरदानादिना जवनाधिपं परितोष्य एकाधिकपञ्चाशद्वत्सरान् सुरपतिरिव पृथिवीं शशास।

(१७) रुद्ररायः—राघवपुत्र-एकादशवर्षान् राज्यं चकार, तस्य त्रयः पुत्राः रामजीवनोरामचन्द्रोरामकृष्णश्च तयोरामजीवनः पित्रा राज्येऽभिषिक्तो बभूव। रामचन्द्रश्च वाहुवलेन जवनाधिपं परितोष्य पश्चाद्राज्यमवाप। पुनारामजीवनस्तं कौशलेन वञ्चित्वा राज्यमधिचकार। पुनः सोऽपि जवनाधिपेन वद्धः। ततो जवनाधि-पस्तदनुज्ञाय रामकृष्णाय राज्यं ददौ। रामकृष्णोऽपुत्रकोमृतः पुनरपि रामजीवनोराज्यमवाप। राम जीवनरायः दशवर्षंशासित राज्यमासीत्।

(१८) रघुरामरायः रामजीवनपुत्रः त्रयोदशवर्षाणशासित राज्यमासीत्।

(१९) कृष्णचन्द्रः रघुरामपुत्रः।

पुनर्मुद्रणम्।

सम्प्रति स्वस्वदेशीयराजन्यवर्गैतिहासिकत्वेन प्रसिद्धानां ग्रन्थानामभावपूर्णेऽस्मिन् भारते वर्षे द्वावेव तथाविधौ ग्रन्थौ लब्धौ। तयोः प्रथमो राजतरङ्गिणीति प्रसिद्धः काश्मीरराजवंशावलीचरितप्रख्यापको द्वितीयोऽस्मत्समालोच्यक्षितीशवंशावलीचरितनामकोऽयं नवद्वीपाधिपतेः श्रीकृष्णचन्द्ररायस्य पूर्व्वपुरुषचरिताख्यापकः। ग्रन्थोऽयं कस्मिन् समये केनाभिलिखित इति न विज्ञायते ततश्च स्वयमभिलिखितकालस्यास्यैतिहासिकनिरूपणे महीयस्येव दरिद्रताऽस्माकम्, ग्रन्थोऽयं कृष्णचन्द्रस्य राज्याधिगमात् प्रागेव लिखित इत्यनुमीयते। ग्रन्थस्यास्य भाषाऽतीव सरला, तेनाऽयं संस्कृतशिक्षाप्रवृत्तानां छात्राणामतीवोपकारकः। एतदध्ययनेन न केवलं क्षितीशवंशीयानामितिहासः, किन्तु तत्तत्कालीनानामपरेषामपि वङ्गजनपदस्थदेशाधिकारिणां चरितं, तथा हिन्दुजवनाधिपतीनां परस्परं व्यवहारादयश्च ज्ञायन्ते। ज्ञायते च जवनाधिपाय किञ्चिन्मात्रं करमर्पयित्वा हिन्दुनरपतयः सर्व्वतः स्वातन्त्र्यमनुभवन्तिस्म। दैवादस्वीकृतकराप्रदाने च कियत्कालं तेषां कारावन्धनरूपोदण्डोऽभवन्न तु राज्याधिकाराद्विच्युतिरिति। पुस्तकमिदमतीवदुर्लभमासीत्। पूर्व्वं सर् ग्रार चैम्बरस्नामधेयेन वङ्गदेशाधिकरणप्रधानपुरुषेण कति हस्तलिखितानि संस्कृतपुस्तकानि क्रीतानि। ततः पञ्चत्वमापन्ने तस्मिन् तत्पत्नी तानि इङ्गलण्डाधीश्वरस्य विक्रेतु मियेष। अथ इंलण्डराजपुरुषे तदभीप्सित मूल्यमर्पयितुमस्वीकृतवति प्रुसियाधिपेन यथोचितमूल्यं प्रदाय तानि क्रीतानि। इदं पुस्तकं तेषुस्थितम्। ततः १८५२ खृष्टाब्दे वार्लिन नगरे अस्य मुद्रणं जातम्। इदमेव मुद्रितपुस्तकमवलम्ब्य वयं पुनर्मुद्रयामः।

२५ वैशाख १८१० }

श्रीहृषीकेश शर्म्मा

परिशिष्टम्

एकवर्णार्थसंग्रहः ।

श्रीरामः शरणम् ।

नमस्कृत्य शिवं वैद्यगौराङ्गमल्लिकात्मजः ।
भरतः कुरुते पद्यै रेकवर्णार्थसंग्रहम् ॥ १ ॥*
न हलः केवलस्यास्ति उच्चारणमिति स्वरैः ।
अन्तःस्थै श्चैकता तस्य मता कक्कादयोयथा ॥ २

स्वरवर्णकोषः ।

अः श्रीपतौ वर्त्ततेऽर्थे स्वल्पार्थप्रतिषेधयोः ।
अभावेऽप्यनुकम्पायामनव्ययमुदीरितम् ॥ ३
आ ब्रह्मण्यव्ययं तु स्मृतौ वाक्यसमुच्चये ।
समायामपि काङ्क्षस्वल्पार्थाभिविधिष्वपि ॥ ४
उपसर्गोऽथ आ-शब्दः समन्तादीषदर्थयोः ।
प्रतप्राप्तिर्य हादीनां चार्थानां धातुयोगतः ॥ ५
आध्यापको भवेदिस्तु, कुसुमायुध उच्यते ।
इ अव्ययं रुषोक्तौ स्याद्भेदानुकम्पयोरपि ॥ ६
ई लक्ष्म्यां स्यादव्ययं तु विषादे करुणारुषोः ।
उः शिवे स्यादव्ययं तु अनुकम्पानियोगयोः ॥ ७
सम्बोधने रुषोक्तौ च पादपूरण इष्यते।
ऊरक्षायामव्ययं तु वाक्यारम्भानुकम्पयोः ॥ ८
ऋकारो देवतायामव्ययं वाक्यनिन्दयोः ।
ॠदैत्यजननी वाक्यकुत्सयोॠ-तु अव्ययम् ॥ ९

ऌकारो देवयोनिः स्यात् ॡमाता सङ्किरुच्यते ।
एर्व्विष्णुः स्यादव्ययं तु स्मृतामन्त्रणहूतिषु ॥ १०
ऐः शम्भुः स्यादव्ययं तु स्मृतामन्त्रणहूतिषु ।
ओकारः स्यादजयोनिरव्ययं स्मरणे तथा ॥ ११
आह्वाने चानुकम्पायां तथा सम्बोधने मतम् ।
औरन्ते स्यादव्ययं तु हूतौ सम्बोधनेऽपि च ॥ १२
अं भवेत् परमं ब्रह्म अः स्याद्विष्णुस्त्रिनेत्रयोः ॥ १२

इति स्वरवर्णकोषः ।

अथ व्यञ्जनवर्णकोषः ।

कः पुमान् ब्रह्म वाय्वात्मसूर्य्याग्नियमवर्हिषु ।
दक्षः प्रकाशयोः कं तु शीर्षे वारिणि शर्म्मणि ॥ १
कुर्धरित्री स्त्रियामुक्ता क्वव्ययं पापकुत्सयोः ।
निवारणे विनिर्द्दिष्टं मीषदर्थे च कोविदैः ॥ २
खमाकाशेन्द्रियक्षेत्रदेवलोकेषु शर्म्मणि ।
संविदने शून्यविन्दौ प्रकाशपूरयोर्मतम् ॥ ३
गो-गणेशे गन्धवाहे गन्धर्व्वे गीतिगानयोः ।
गा-गाथायां गदायाञ्च गौः पुमान् वृषवज्रयोः ॥ ४
स्वर्गे रश्मौ चन्द्रमसि स्त्रियान्तु दिशि वाचि च ।
दृक् सौरभेयो वाणेषु सलिले धरणावपि ॥ ५ ।
[illegible] घण्ट्यां मतोऽस्त्रन्तु गर्हणे वर्हणेऽपि च ।
[illegible] ज्ञायां [illegible] सा [illegible] परिकीर्त्तिता ॥ ६
ङो भैरवो [illegible] विषये स्पृहा ।
चश्चौरश्चन्द्रमाश्चोक्तश्चं चक्रो चन्दने स्मृतम् ॥ ७
चाऽव्ययं स्यात् समाहारेऽप्यन्योन्यार्थे समुच्चये ।
अन्वाचये तथा पादपूरणेऽप्यवधारणे ॥ ८

पक्षान्तरेऽपि, छस्तु स्याच्छेदने लिपु निर्म्मले ।
जवने तरलेऽप्येवं छा-तु वेदेध्वनौ मता ॥ ९
जःस्याज्जेतरि विज्ञाते जवने च प्रयुज्यते ।
जूः स्वराकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च ॥१०
झोझञ्झावात उद्दिष्टस्तथा नष्टोऽपि पण्डितैः ।
ञः स्यात् घर्घरशब्देऽपि गायने शासने दिवि ॥ ११
टः स्यात् शब्दे कवन्धे च टा पृथिव्यां प्रकीर्त्तिता ।
ठः स्यान्महाध्वनौ शून्ये शङ्करे चन्द्रमण्डले ॥ १२
ठा ध्वनौ डः शिवे त्रासे शब्दे च परिकीर्त्त्यते ।
ढो-ढक्कायां निर्गुणे च ध्वनिनिर्णययोरपि ॥ १३
णः प्रकर्षे निर्वृतौ च ज्ञाननिश्चयोरपि ।
तस्तु सुरे युद्धवङ्कवर्गेषु क्रोड़ पृष्ठयोः ॥ १४
त्वव्ययं स्यात् प्रशंसायां पक्षान्तरनियोगयोः ।
भेदेऽवधारणे पादपूरणेऽपि समुच्चये ॥ १५
विनिग्रहे थस्तु शैले थथृ द्वौ हयलक्षणे ।
दो दाता दं कलत्रं स्यात् दा दाने च्छेददात्टषु ॥ १६
धो धर्म्मो धर्म्मराजोऽपि धाताधीरोधनाधिपः ।
धूर्धूर्त्ते इन्द्रिये कर्म्म चिन्तनेऽपि प्रकीर्त्त्यते ॥ १७
नः स्याद्बुद्धेऽपि विप्रेऽथो उपमाप्रतिषेधयोः ।
अव्ययं न समुद्दिष्टं जानुवन्धस्तु न ध्वनिः ॥ १८
अभावे च निषेधे च स्वरूपार्थेप्यतिक्रमे ।
ईषदर्थे सादृश्ये च तद्विरुद्धतदन्ययोः ॥ १९
अप्राशस्त्येऽप्यव्ययं न निषेधाभावयोः स्मृतम् ।
अवश्यं निर्निषेधे स्यात् क्षमार्थे संशयेऽपि च ॥ २०
नित्यार्थे कौशले क्षेमे विरामेऽन्तिकदानयोः ।
राख्यधोभागविन्यासे मोक्षान्तभावबन्धने ॥ २१

आश्चर्येऽप्युपमर्गाद्ये निर्णयेऽपि निश्चये ।
नीः स्यान्नवि नीतौ च नुः स्तुतौ परिकीर्त्तितः ॥ २२
अव्ययं नु वितर्के स्यादुपमा प्रश्नयोरपि ।
विकल्पेऽनुनयेऽतीते नक्षत्रपूर्वपर्य्ययोः ॥ २३
नन्दः पण्डितैर्मुख्ये पुरुषेऽपि प्रयुज्यते ।
नो अव्ययमभावे स्यान्नौर्नौकायां प्रयुज्यते ॥ २४
पः पातकेऽपि पवने भवेत् पाः पातृपानयोः ।
फो झञ्झावात फुत्कार दक्षे निष्फल भाषणे ॥ २५
फिः प्रकोपे मतो बः स्याद्वरुणे वर्व्वरे घटे ।
इवार्थे त्वव्ययं व स्यादव्ययं वा समुच्चये ॥ २६
उपमायां विकल्पे च नानार्थातीतयोरपि ।
एवार्थे च वितर्के च विशिष्टे पादपूरणे ॥ २७
विः स्यात् पक्षिण्यव्ययं वि वियोगपादपूरणे ।
विच्छेदे निश्चये हेतौ विग्रहे सहने तथा ॥ २८
ईषदर्थव्याप्तिशुद्धा लब्धनाभिभवेषु च ।
वि ज्ञानातीतयानार्थेष्वेष्टार्थेषु प्रयुज्यते ॥ २९
उपसर्गेऽव्ययं विः स्यान्नञर्थे गमने तथा ।
विघ्नप्रदानवैरूप्येऽव्ययं वै पादपूरणे ॥ ३०
सम्बोधने चानुनये हेतावध्यवधारणे ।
भः स्याद्दैत्यगुरौ भृङ्गे मयूरे भस्म च स्मृतम् ॥ ३१
भा दीप्तौ च गभस्तौ च भीर्भये समुदाहृता ।
भूः स्थानमात्रे भूमौ च तथोत्पत्तौ प्रयुज्यते ॥ ३२

मः स्याद्ब्रह्मणि चन्द्रे च चन्द्रशेखरमन्त्रयोः ।
मं मङ्गलं समुद्दिष्टं मा पद्माविद्ययोर्युतौ ॥ ३३
मा स्यान्मातरि माने चाव्ययं मा वारणे तथा ।
विकल्पे यो यमे वायौ याने त्यागेऽपि मातरि ॥ ३४
रः पावके च तीक्ष्णे च रादाने ग्रहणे मता ।
रीर्गतौ हनने चोक्ता, रैः शब्दस्वर्णवित्तयोः ॥ ३५
ल इन्द्रे च ह्लादने, ला ग्रहणे लोः स्मृतास्त्विषि ।
लूश्छेदे रस्तु वाते स्यात् शान्तेऽपि वाः सुखे गतौ ॥ ३६
वोः प्रभागभनव्याप्ति क्षेपणेष्वदने मता ।
वरुणे वं शकुन्तौ विर्वावे वित्त अव्ययम् ॥ ३७
ओष्ठ्यं वह्वः प्राहुर्दन्त्यवश्चेति केचन ।
शः शम्भुः शं शुभं प्रोक्तं शीः स्वप्ने परिकीर्त्तिता ॥ ३८
श्चाव्यं पूजने प्रोक्तं शूर्हिंसायां प्रयुज्यते ।
षः श्रेष्ठः कीर्त्तितो धीरैः षूस्तु गर्भविमोचनम् ॥ ३९
सः स्याद्विष्णौ हरे दर्भे सा लक्ष्मीदुर्गयोर्मता ।
अव्ययं सुसकृद्धो स्याद्गृशार्थेऽनुमतावपि ॥ ४०
क्षच्छ्रे तथैव पूजायामुपसर्गोव्ययं तु सु ।
अर्च्चायामप्यनायासे तथातिशय इष्यते ॥ ४१
हः-शम्भौ वर्त्तते शब्दो तथा कोपनिवारणे ।
अव्ययं तु ह सम्बुद्धौ नियहे पादपूरणे ॥ ४२
क्षिपायामपि कुत्सायां नियोगे च प्रयुज्यते ।
हा शोके स्याद्विषादे च निन्दापीडार्थयोरपि ॥ ४३

हि-पाद पूरणे शब्दे सम्भ्रमेऽप्यवधारणे ।
हेतौ हेतूपदेशे च विशेषासूययोरपि ॥ ४४

ही विस्मये विषादे च दुःखे हेतौ च कीर्त्त्यते ।
हे सम्बोधनआह्वानासूययोश्च प्रयुज्यते ॥ ४५

हैहो चाह्वान सम्बुद्ध्योर्हो शब्देऽपि तयोर्म्मतः ।
यद्यपि क्ष स्त्रिवर्णात्मा तथाप्येकोनिगद्यते ।
नाम्नानुरोधात् षान्तोऽपि पृथगेव हि पठ्यते ॥ ४७

ग्रन्थे विश्वप्रकाशादौ महेश्वर मुखैर्बुधैः ।
षान्ताः पृथङ्निवद्धास्ते षान्तवर्गे तु कैश्चन ॥ ४८

ख्यातानानेकवर्णानामर्थानां कियतां कृतः ।
संग्रहोऽयं परे त्वर्था ज्ञेयास्तन्त्रान्तरेक्षणात् ॥ ४९

इति गौराङ्गमल्लिकात्मजश्रीभरतसेनकृतएकवर्णार्थ
संग्रहः समाप्तः ।

———

अथद्विरूपकोषः ।

भवेदाषाढ़ आशाढ़ो विषुवद्विषुवं तथा । (१)
मातुःष्वसा मातुःस्वसा कशायां कथिता कषा ।
शम्बरं सम्बरं प्रोक्तं (२) कुशलं कुसलं विदुः ॥
वाशरो वासरोऽपि स्याद्वशिष्ठोऽपि वसिष्ठकः (३) ।
मूषलो मूसलः प्रोक्तः शूकरः सूकरोऽपि च ॥
शृगालोऽपि सृगालः स्यात् शारः सारोऽपि सम्मतः (४) ।
कोशः कोषेऽस्तु कथितमश्रु चाऽपि सतां मतम् ।
शण्डः षण्ड स्तथाख्यातः सण्डोऽपि त्रिविधोमतः
शूरः सूरोऽपि चादित्ये विश्वक् विष्वक् स्मृतं (५) वुधैः ॥
स्यात् किशलयं किसलयं वशुकं वसुकं तथा (६) ॥
आलीःस्यादालिरप्येवं वल्मीकोवाल्मिकोमतः ॥
गाण्डीवं गाण्डिवं प्रोक्तं पाण्डुरः पाण्डरस्तथा (७)
पारावतः पारवतः (८)कवाटञ्च कपाटकम् ॥
अन्त्यश्चान्तः (९) सुखं सौख्यं नखरं णखरं (१०) स्मृतं
वाल्मीकिः वाल्मिकश्चापि वालुका वालिकापि च ॥
मथूरा मथुरा प्रोक्ता (११) कफोणिः कफणस्तथा (१२) ।
द्वारपि द्वारमित्याहुः (१३) सरिसपः सर्षपस्तथा ॥
धूस्तूरोधुस्तूरप्रोक्तारस्त्वन्तिकाऽपरात्तिका तथा (१४) ॥

---

(१) विषुवं, विश्रुवं तथेति (ख), विषुपद्विषुवं तथेति (ग), (२) शम्बलं, सम्बलं प्रोक्तमिति (ख), (ग) पुस्तके श्लोकस्यास्य चतुर्थचरणं नास्ति ॥ (३) वषिष्ठक इति (ग), (४) सारोऽपि चाचके इति (ग), (५) श्रु तमिति (ख) (ग) । (६) छन्दकं चन्दकं तथेति (ख), चुल्लचं चूल्लकं तथेति (ग) (७) पाण्डरं पाण्डुरं तथेति (ख) (८) पारावात इति (ग) । (९) अन्तं चान्त्यमिति (ग) । (१०) न खर, नखरं तथेति (ख) । नगरं नागरं विदुरिति (ग) (११) मधुरा, मथुरा, प्रोक्ता इति (ख), मथुरा माथुराप्रोक्ता इति (ग) (१२) कफोणक

असद्भिर्नसद्भिः कारञ्जश्च कलिञ्जकः (१५)
परिहारः परीहारः विहारादेर्द्विरूपता (१६)।
अरण्यवनिभूम्यादेर्द्वैरूप्यमपि चेष्यते (१७)॥
आपोगण्डस्त्वपोगण्डः पिधानमपिधानकम्॥
अवतंसोऽवतंसश्च (१८) वहितोऽवहितस्तथा (१९)॥
अर्य्य आर्य्यस्तथा प्रोक्तः खुरप्रश्च क्षुरप्रकः।
जामाताऽपि च यामाता याया जाया प्रकीर्त्तिता॥
योषा जोषाऽपि च ख्याता सुवासिन्यां सुवासिनी।
काङ्कः काङ्क्षैवागुरुश्च अगागुरुपुरदाहृता॥
सुत्रामाऽपि च सूत्रामा किङ्किणी कीङ्किणीतथा (२०)।
जातीफलं जातिफलं यष्टीमधुमतन्तथा॥
तनुस्तनूश्चतनुश्चैव (२१) पर्य्यन्तं परिजन्तथा (२२)।
अभ्रमभ्रमपिख्यातं खानित्रञ्च खनित्रकम् (२३)॥
धन्याकञ्चापि धान्याकं खड्गी खड्गोद्विधा मतः।
विरिञ्चिश्च विरिञ्चोऽपि परशुः पर्शुरेव च॥
पृषतः पृषदुद्दिष्टो वेश्या वेस्या च कीर्त्तिता।
सुरापाणं सुरापानं भुजङ्गो भुजगोमतः॥
तुरङ्गस्तुरगश्चैव कवन्धश्च कमन्धकम्।
अग्रमग्रमपिख्यातं शारिः सारोऽपि कीर्त्तितः॥

---

(१४) अन्नीकालवन्तिकामतेति (ग)। (१५) कलिञ्जश्च कलीञ्जक इति (ख), कालिञ्जश्च कलिञ्जक इति (ग) तत्रपरिरम्भः परीरम्भ इत्यधिकः पाठोवर्त्तते। परीरम्भः, प्रतीकार वीहारादौ द्विरूपतेति (ख) प्रतीहारः, प्रतिहारः परीवादेर्द्विरूपतेति (ग)। (१७) तूर्य्यादि द्वैरूप्यमपि दृश्यते। (१८) अवतंसोऽवतं सश्चेति (ख, ग) (१९) अवहितं वहितं तथेति (ख)। (२०) काकिणी काकिनी तथेति (ख) (ग) (२१) तनुस्त्वचैवेति (ख)। दीर्घान्तमपि सम्मतमिति (ग) (२२) पर्वितं स्याद्दविनकमिति (ख, ग)।

[illegible] बन्धुरश्चापि कन्दरं कन्दमप्यथ (२४) ।
उद्यानमपि चोद्यानमायुश्चायूरपि स्मृतम् (२५) ॥
जम्बिरोऽपि च जम्बीरोवरुणोवरणोवपि च ।
रात्रिञ्चरो रात्रिचरः सततं सन्ततं तथा ॥
निष्ठेवोऽपि च निष्ठीवः स्तिमित स्तीमितस्तथा (२६) ।
जिह्मा जिह्वश्च कथितौ [illegible] ॥
रिकथस्रक्थमपि प्रोक्तं रिष्टिश्चरिष्टिश्च सम्मतः ।
[illegible] पूरुषः पुरुषस्तथा ॥
उदकश्चोदकश्चैव कटः [illegible] (२७)
लज्जा लज्जया तथा प्रोक्ता प्रततिर्व्रततिस्तथा (२८) ॥
नृत्यं [illegible] गयायां कथ्यते गयः (२९) ।
गम्भीरश्च गभीरं स्यात् प्रकाशः प्रकशस्तथा (३०) ॥
प्रादेशोऽपि [illegible] ।
सङ्कुचोनिकुञ्चोवापि स्यातां विज्जलहिज्जलौ ॥
आगस्तिः स्यादगस्त्योऽपि यमश्च यमजोमतः (३१) ॥
[illegible] प्रोक्तौ वृत्तश्च वर्त्तुलस्तथा (३२) ॥
[illegible] (३३) तथा पूर्व्वैश्च दृश्यते ।
कुटीर [illegible] ननान्दिका ॥

---

(२३) धुविश्चं स्याद्वविचकमिति (ख, ग)

[illegible]

[illegible] (ख, ग) । (२८) [illegible] (ग) (२९) अतःपरं (ख) पुस्तके कथितं काथितश्चैव बहुभिः सम्प्रकीर्त्तितं इति पाठोवर्त्तते । (३०) प्रकाशःप्रकश-

आमीचायामिचिका स्यात् (३४) अटिलीऽङ्कुशस्तथा ।
मासि जैष्ठे तथा ज्येष्ठः पौषे पुष्योऽपि सम्मतः ।
अष्ठिमानस्थिमानेव वाग्वि वाचा दिशादयः । (३५)
अग्निपक्षाग्निपक्षात्तु क्षिप्तक्षिप्तमिति स्मृतः ॥
चेटी चेड़ी च कथिता रजःस्तु रजसोऽमतः (३६) ।
मक्षएव मक्षवात्तु स्नातं चिन्तनं तथा (३७) ॥
नारिकेलादिषु द्वैधं महाकालादिवर्ज्जनात् ।
डिम्भो डिम्ब इति ख्यातः कावरः कूवरोऽमतः (३८) ॥
आर्द्रमार्द्रं धुतं धौतं निघ्रातं जिघ्रितं तथा (३९) ।
घ्राणं घ्रातं पुनः प्रोक्तं गुढ़ं गूढ़ं मतां मतम् (४०) ॥
क्षीणं क्षीतञ्च विख्यातं घुष्टञ्च, घुषितं तथा (४१) ।
दान्तञ्च दमितं शान्तं शमितं पूर्णं पूरितं ॥
जप्तञ्च जपितञ्चैव क्लिष्टं क्लेशितमेव च ।
तुष्टञ्च तुषितं विद्धं वेधितं विज्ञविश्रुते ॥

(ख) । वङ्क्षी वाङ्कलः भीकः ङद्वयवर्धनः (ग) । (२३) काटकं कांटकन्तथेति (ग) (२४) आमिचः स्यादामिचाऽपीति (ख) ।

(३५) अष्ठिमान्, अस्थिमानेव वाग्वाचा, दिक्दिशादय इति (ख)

(३६) चेटी चेंटी च कथिता रयः ख्यातोरजोमतः इति (ख), भगदर्भादिः कथिता रजः ख्यातं रजं मतं इति (ग) ।

(३७) समरव समुनाऽर्थिमलचिलना तथेति (ख), मङ्खेवमखादेवी चेतनं चितनमथेति (ग) ।

(३८) कूरवः, कूरवस्तथेति (ख) ।

(३९) आर्द्रमार्द्रं धुतं धौतं काटकं काटकान्तथेति (ख), धुतं धूतमिति (क) ।

(४०) गूढ़ं गुप्तं मतं तथेति (ख) ।

ऋतं ऋतमृतञ्चैव भिन्नं भेदितमेवच ।
छितं दातञ्च दत्तं स्यात् (४२) धूपितं धुपितं तथा ।
मृगायितञ्च मृगितं मार्गितं ब्रुवते बुधाः ॥
अन्वेषितं तथान्विष्टं त्राणं त्रातञ्च सम्मतम् ।
गुप्तं गोपायितञ्चैव कुञ्चं कुञ्चितं तथा ॥
पणायितञ्च पणितं पनितञ्च पनायितम् ।
छन्नञ्च छादितञ्चैव पुष्टं पुष्टं स्मृतं बुधैः ॥
[illegible] पर्व्व स्यात् पर्व्वणी तथा ।
कुक्कुभो कुकुभः प्रोक्तः किकिदिदिविः किकीदिविः ॥
कीकसीको भिक्षुकोव [illegible] ।
थली स्थली थलिश्च स्यात् अन्तरीयान्तरीयके ॥
सन्निहितः सन्निहित्वा कीलः कीलापि कीर्त्तिता ।
अर्गलाप्यर्गलं स्यातं (४३) धूपोऽधूपश्च सम्मतः ॥
अपपूर्व्वमर्पणा च भण्यते चावमर्षणम् ।
अपमानाऽवमानश्च (४४) बिम्बोष्ठेऽपि द्विरूपता ॥
शृङ्गाऽपि च शृङ्गी, नीलानीलादिके तथा ।
मज्जा स्यातः स्मृता मज्जा भ्रान्तापि च विचक्षणैः ॥
स्फटा फटा च चण्डारश्चण्डालश्च प्रकीर्त्तितः ।
काव्येषु गीयते हर्पी हरिणोऽपिच कीर्त्त्यते (४५)
मेधिर्मेधी प्ररव्ये च लक्षं लक्ष्यं उदाहृतम् (४६) ॥

---

(४२) 'ख' पुस्तके पूर्णं धूपितं पिष्टं दर्शितं तत्र सपितमितेऽविकपाठा वर्त्तन्ते ।

(४३) अर्गलाप्यर्गलः स्यात इति (ग) ।

(४४) अवमानोऽपमानश्चेति (ख) ।

(४५) हरस्वत इति (ख), मथत इति (ग) ।

संध्या संधा च सन्धा च करम्भोऽपि करम्भकः (४७) ।
[illegible] तथा नसी च नस्तका (४८)
श्रद्धा श्रद्धा मतं तद्वद्रञ्जनं रजनं तथा ॥
[illegible] गतिर्गत्यां भूतिर्भूत्यादिकं तथा ।
स्थाली निश्रेणिनिःश्रेणी कुम्भीकुम्भीलुकौ ॥
क्षपा क्षपाक्षपा तद्वत् सेवनं सीवनं मतम् (४९) ॥
तन्त्री तन्त्रा च कथिता मार्जना मार्जनी तथा (५०) ।
सन्ध्या सन्धा [illegible] भारता भरता नटाः ॥
कूली [illegible] पिटकः पेटकस्तथा ।
प्रतिश्रुता प्रतिश्रुतः स्यादलमर्थालमोऽपि च (५१) ॥
आसनः कामलो वाऽपि [illegible] मध्वपि (५२) ।
[illegible] विकर्णविकर्णौ ॥
[illegible] स्यात् [illegible] ।
[illegible] ॥
[illegible] कीर्तितः ।
[illegible] (५३) ।

---

(४७) संध्या, संधा च सन्धा च करम्भोऽपि करम्भकइति (ख) ।

(४८) तथा [illegible]तीति (ग)

(४९) क्षपा क्षणा तथा तुल्या सेवनं सीवनन्तथेति (ग) ।

(५०) मार्जना पुनरिति (ख), मार्जनं तथेति (ग) ।

(५१) प्रतिश्रुतः प्रतिश्रुतं स्यादलमर्थालमोऽपिचेति (ख) ।

(५२) मधुल इत्यपीति (ख) ।

(५३) [illegible]

अग्नेऽभग्नोऽभिक्रोभीकोऽनुक्रोऽनुप कृत्वभी (५४) ॥
दृष्ठुदृष्टको विशालं विशलं स्मर्य्यते बुधैः ।
गाङ्गुर्वाशोऽनिरामि: स्यादूरीकृतमुरीकृतम् ॥
वह्लाग्नि पठ्यते कैश्चित्तथा वह्लग्नि चैवहि ।
वह्नूपानिस्तथा भट्टि: त्रितयं तेन सिध्यति (५५) ॥
स्फुरणं स्फुरणं ख्याति: क्वचित् साम च नाऽमव्यम ।
स्तम्बघनस्तु स्तम्बघ्नो मसिश्चापि मसी स्मृता ॥
कालनेमि: कालनेमी दैत्यनाम द्विधा मतम् (५६) ।
कुम्भी चापि तथा कुम्भा भण्यते शब्दशासने ॥
ख्याते माङ्गल माङ्गल्ये विधिरोवीधिर: स्मृत: ॥
भृङ्गरिटिर्भृङ्गरीटि: स्यात् स्तवस्तापोऽपि गीयते ।
भ्रुकटं भ्रूकुटं प्राहुर्मन्दारोमन्दरोऽपि स: ॥
फलञ्च फलनं ख्यातं नसा नासा च कीर्त्यते ।
कर्षक: कृषको दृष्ट: खलीनं खालिनं तथा ॥
मणी इव मणीवस्याद्रोदसी रोदसा अपि ।
दम्पती इव शब्देन संहतौ तेषु पक्षक: ॥

---

(५४) भुरीभीशुपकोऽनुग्गी इति (ख) ।

(५५) परिकीर्तितमिति (ख) ।

[illegible] दृष्टः पाणिग्रह परिग्रहौ ॥
[illegible] क्लीबौ घारणं घरणं तथा ।
निखट्टी च निखट्टं स्यात् उदूखलमुदूखलम् ॥
क्षमा भूमिः क्षमा तुल्या तुली तूलामतं सताम् ।
मसुरोऽपि मसुरकस्तु सकः मयोऽपि दृश्यते ।
कापुरुषः कुपुरुषो वाचिका वाचकः क्रिया ॥
[illegible] कायिला तथा ख्याता विडङ्गिका ।
आपः शब्दः सकारान्तो दृश्यते शब्दधामनि ॥
[illegible]भटः खाल्तिटो खल्तिटोऽनलः ।
क्लीबेऽपि तथा दृष्टौ काञ्जिका च काञ्जिकम् ॥
कोटिशब्दं च शब्दौ च दृष्टौ पुंक्लीबयोः पुनः ।
[illegible]कनकौ प्रोक्तौ दृष्टौ भिक्षुकभिक्षकौ ।
[illegible] कर्कटीनाम्ना एकारान्तश्च कीचक ॥
[illegible]लाबुविरालवीरकृष्णमतं सताम् ।
आमलकामलकश्चैव आमियी चाक्षपिपिका ॥
शाङ्गिश्च तथा शालीकस्तु च कलम्बिका ।
नीलिका चैव नीली च कर्कटः पुंसि च स्त्रियाम् ।
पीलिका पीतका ख्याता स्मृतौ वास्तूक वास्तुकौ ।
भृङ्गराजो भृङ्गरजः समौ दाड़िमदालिमौ ॥
मत्सकौ गुच्छकावापि तथा चोत्सुकचातकौ ॥
शाटिः शाटी च विख्याता मटोमयटएव च ।
समौ दात्यूहदात्यौहौ पटवासः पटवसः ।
अवसत्थ आवसत्थ स्तु दृङ्गादृङ्गकौ समौ ॥
शूकपिटः शूकपटः खट्किका खटिकके ।
ख्यातौ पक्षोटपक्षोटौ प्रवाणः प्रवणोऽपि च ।

क्रौञ्चापि च पुनः क्रौञ्चस्तथा च प्रतिपद्यते ।
इत्यन्योऽपीयते कैश्चिदन्योऽप्यत्र गीयते ।
दुर्लभो पण्डितो लोके बीजधान्यप्रशाखल: ॥

इति श्रीपुरुषोत्तमविरचितद्विरूपकोशः समाप्तः ।

त्रिश (ष स) कारभेदः ।

श्री सरस्वत्यै नमः

ग्रन्थारम्भः ॥

तालव्यादि मयोच्यते कियदतस्तालव्यमध्यन्तत
स्तालव्यान्तमिह प्रकाशितपदं यत् सूरिभिर्भूरि तत् ।
मूर्धन्यस्य पदस्य चेद्दृशमतं दन्त्यस्य तादृङ्मतं
ज्ञातव्यं त्रिशकारभेदकथने प्रागादिमध्यान्ततः ॥
तालव्यमूर्धन्यदन्त्याश्चुटुतूनां क्रमादिमाः
संयोगाः शषसा ज्ञेयाः प्रोच्यन्ते तत् कतीतरे ।
श्रीशर्वं शमशर्म शेखर शिखाशैवाल शङ्कुस्रुताः
शङ्काशीकरशङ्करश्रुतिशची शुल्ठी शठो शायकाः ॥
शीधुश्रीपदशब्दशोभनशरच्छ्रायानैःशम्बराः

शाङ्कर्यं शिशिरा शलाटु शिम्बश्च शीघ्र शङ्कश्च ।
शमथु शेष शठ श्मशान शिबिका शल्लूक शोभाञ्जनाः ।
शतावर्य शलाच्छिरीप शल्का श्वेनश्वशेफालिका:
शेक शोषश्वावगोत्र शिथिल श्राद्धास्त्रैव श्यामलाः ॥ २
शिलाशैय शशाङ्कैल शर्करी शश्च शालश्विता:
शुक्रश्वभ्र शनैश्चर श्वसन शं शौटीर्य शुश्रूषकाः ।
शोभा शून्य शरण्य शृङ्ग श्यामाक श्वशुर श्वशुकशिंशपा:
शशाशल्लक्षु: शरीर शनश्चैवाह्व शोणाशकाः ॥ ३
शमाशाशिष्टशषण्डा: शृमर शमल शालूर शूचीशिखण्डाः
शान्ति: श्वः शाल्मशल्कं शम [illegible] शमाः शुक्तिकाशापशिष्याः ।
श्रौषट् शास्ताशरारुः शखशिखरिणी शारिका श्यालशोषाः
शल्यशुक्शुल्कशालु शाणिशनर्यशिता: शस्त्रशाटी शकोटाः ॥४
शणनशकटशोद्धाशीलशस्त्र शङ्काः
शवल शयन शुक्ताः श्लेष्मादूलमानाः ।
शलभशकरशिक्षा: शक्करी शालिशण्डा:
शिशु शशिशशाङ्काः शिग्रु शिम्बी शशाङ्काः ॥ ५
शिवशात्र शुभ शूर्पाः शुल्कशस्त्रशरश्या:
शुकशफाश्रिति शिष्टाः शर्वरी शूरशुष्काः ।
शवल शलभ शुण्डाः शातनश्चिलशवत्वा:
शकुनि शरण शावाः शाल्मलि श्लोकशोकाः ॥ ६
श्वशुरश्चुपिरशाकाः शास्त्रशैल्ल पशाखा:
शर्वाणि शपथशिल्पाः शर्कराशाखशिक्या: ।
शिखि शतशुचि शूद्राः शङ्करश्यावशीता:
श्रवण शनिशिराला: शोधनीशातकुम्भौ ॥ ७
शान्ति शीरशिर: श्मश्रू शास्त्रे च्छूकार शम्बराः ।
शौण्डशीर्षशाकशिक शौल्पोशिश [illegible] ॥ ८

शूकशिम्बी शादशाड्‌ शकुन्ति शलुशाद्वलाः
एते कियन्तः कथितास्तालवशादिमसूचकाः।
इति तालवशशकारादि संग्रहः॥

वेश्मोशीरपिशङ्गकश्यप कशीरुपश्मकिंशारुकाः॥
वश्मश्वत्यनिशीथशैशिरयशः काश्मीर वेश्यांशुकाः।
त्रिंशद्वश्यविशाखविश्वमशकावश्यं शशाङ्काश्मा
वेशन्ताशयकौशिकाशनिपिशाचाश्वाशुशिश्नश्मा॥ १

ऐश्वर्यं श्वरशिंशपाश्वयुगवश्यायाश्विनोकेशवाः।
विंशाश्माशनदन्दशूकनिमिशाः श्वोच्चैः श्रवः किंशुकाः।
स्पृश्याशंःशशकोशनः पिशुन श-श्वन्मिश्रसन्दंशनाः
कैशोरातिशयातिकश्मलविनिश्वास प्रशंसादयः॥ २
श्मशानलशुनौ कशालुपिशितौ विशालकुशलौ जलाशयदश
निशातदशमीकुशेशदशनौ साटश्ववशिनौ पराशर मुनिः॥ ३

पशपाश्वावारिवश्वाश्मरीनोशारशाशुनाः।
केशराशीतिपश्चाशच्छत्वारिंशत् सुपांशुकाः॥
एते कियन्तस्तालवशशमध्याः संप्रकीर्त्तिताः
इति मध्यतालवशशकारसंग्रहः॥
राशिवंश्यवराशिदिश्यष्टयः कोशिश नाश स्पृशः
आशाकाशकुशाङ्कुशाशनिशाः केशोर्व्वशीताटकाः।
क्रोश क्लेशपलाशपांशुपशवः पाशांशवंशाशव:
स्पर्शावेशनिवेशवेशवडिशादेशप्रवेशेष्टशाः॥ १

दाशप्रकाशकुलिशाः शिशुलेशदंशाः
पार्श्वांशु साष्टमश्मशाः मशश्ङ्गिरीशाः।
आदर्शदर्श परशमतिदिग्दशाः स्पृः

[illegible] स्याशानिस्विं प्रविड्विशा: ।
[illegible] कीर्त्तनं समुदाहृतं ॥ ३

इति तालव्यशान्तसंग्रह: ।

षष्ठिषोडशषट्षोढाषण्ढा मूर्द्धन्यषादिमा: ।
कियन्त: कथिता: स्पष्टा: षडेतेष्वक्त्य संगता: ॥

इति मूर्द्धन्यषादिसंग्रह: ॥

पाषाण पुष्कर विशेषण शष्पनिष्का-
मूष्माभिषङ्गभिषग्विषयातिदुष्खा: ।
कुष्माण्ड दुष्करगवेषित भूषितेषत्
पाषण्डपोषण परिष्कृतकिष्कुशुष्का: ॥ १
योषिद्विड्विष्ण हुषदंशक गोष्पदीषा-
भिष्वक्कभीष्म मुषलर्षभ भष भूष्या: ।
निर्ध्वेषसर्षपवहिष्कृत दर्षभाष्या:
पुष्यौषधीपरहृषीकविजादळाष्या: ॥ २
वाष्पोष्पति चुषक देषणिका हृषत्का
मस्तिष्क सूषिक त्विविष्किरदुःसुषेण: ।
विष्कम्भमायणनयीषिनिषेकदूष्या:
प्रेष्यंषिका सुषिर वाडुषिकाभिषेका: ॥ ३
श्लेषानुषङ्गिक कषायनिषक्त शिष्या
श्रीष्मोषतीचषकपूषतुरुष्कतिष्या: ।
पूष्या विषाण धिषणा सुषमा सुषीमा:
कौषेय सुखपरिषद्दिविषत्तुषारा: ॥ ४
अरुष्करापाढ निषेध दूषिका
गवेषणान्वेषणनिष्कतुष्का: ।
चषालचुष्योष्ण सतृष्णत्का
निषद्वरद्वेषतरादिषाढा: ॥ ५

पृषदश्वो वृषलकः सुषवी विषुवावुभौ ।
क्षिपुको वृषदश्वेते मध्यमूर्द्धन्यषाः कति ।

इति मध्यमूर्द्धन्यषकारसंग्रहः ।

वृषमहिष पुरीषामर्षपीयूषपेषाः
कलुषकष विशेषा कर्ष गण्डूषकोषाः ।
कषपुरुषकरीषव्योषदोष प्रदोषा
विषतुष अभिशेषाभ्यूष तोषाम्बरीषाः ॥ १
प्रुषनिकषशिरीषाश्लेषशीर्षर्षिवर्षा
परुष मुषिजिगीषाशेमुषीषा निमेषाः ।
इषुकषदिधिषूषा किल्बिषाभ्रेषहेषाः
प्लुषवुषवरिषेर्ष्या लक्षुषोन्मेषवोषाः ॥ २
हर्षस्नुषारीहिष चाष शोषाः
शैलूषघट् कल्माषमाषमूषाः ।
क्ष्वेषाटरूषामिषयूषशोषाः
प्रत्यूषभाषाविपुषीनिरीषाः ॥ ३
शुश्रूषमेष ऋषयोषतर्षा
वेषावरोषद्विडुषाप्रमोषाः ।
भूषारुषामारिषमञ्जूषेषा
श्लिड्मानुषजीषमषाः कियन्तः ॥
एते मूर्द्धन्यषान्ताश्च कथिताः शब्दसङ्कराः ॥

इति मूर्द्धन्यषान्तसंग्रहः ॥

स्वस्ति स्वरस्मरसरित् सितसारमेयाः
स्वाहास्वधासमसहस्रसरः समूहाः ।
संख्यासमुद्र सहसा सहसक्तु सिन्नाः

कोल: समस्त सलिलस्खिल सक्थिसीमा:
संघात सुन्दर सखी भवसंसमन्तात् ।
संक्रान्ति स्वरुण सान्द्रि समीपसस्य:
सीमन्त मस्तलसभा स्मृति सिन्धुवारा: ॥ २
स्वामि स्पृहासुख समीर सदा सहाया:
स्रक् स्नेह सङ्गम सुधा समिसाधुसौधा: ।
सिन्दूर साम्बनदकानमभासखिस्त:
सौख्यसिन्धुनिस्तास्सदिवस्त्रसार: ॥ ३
संसर्गसान्द्र सकल सुपलिलिस्ताख्या:
स्व: स्वर्ग सस्तु सुरसा: सुर सन्निसन्ध्या: ।
साध: समस्तसस्फातसरलीनास्पृप:
स्कन्नीतसाध्वसममित् स्वणि सूनुसखा: ॥ ४
सूनी सपादिसिन्ध्यासृविसित सार्यं
सन्तानसास्र सस्ट्रा: सुलसानुलासा: ।
सद्य: सन्तानसरलीलवसर्ध सिद्धा:
सितत्कार सर्पण सुरास्ति सर्व्वं संवा: ॥ ५
स्पन्दन स्वेद सालूना: सहस्वर सञ्चरा: ।
सारङ्ग सप्तपदि समिति सर्षसारसा: ॥ ६
सत्यसत्वस्तनस्वैर स्वान्तस्वप्नस्वयम्बरा: ।
संसत् स्वीकार सत्ता: स्यु: सूरसौपिसस्पृष्य: ॥ ७
कियद्दन्त्यसकारादि शब्दा: संकलिता अमी ।

इति दन्त्यसकारादिसंग्रह: ॥

विकसितवासरतत्सरसास्या:
किसलय वासरहास्यवसन्ता: ।
अवसर घस्मरलास्य सहस्र

व्यवसितशासनदस्युतमिस्त्रं
कुसुमविषित्सितमात्सर्थ्यास्यं ।
असकृदसाररसालप्रसूनं
वसति विसारण कृत्स्नवसानं ॥ २

वेसवारीत्सवीत्साहीत्सगीत्सारणवत्सकं ।
आसक्त्य् स्वासनाजस्त्रासुर सास्नासवासकृत् ॥ ३

कासारवसुधासंसन्नस्य प्रासादनासिकाः
प्रसवस्रंसनामावास्यावसाय प्रसादजाः ॥ ४

मध्यदन्त्यससंसृष्टाः कियन्तः परिभाषिताः ।

इति मध्यदन्त्यसकारसंग्रहः ॥

रासोल्लास विलासवासनभसः कैलासतेजोऽरुषो
हिंसाहंस धनुर्वेहिर्दिवसनः सामावुभुत्सोषसः ।
कंसध्वंस पुरः सरोहरिरसु स्रोतश्चिकित्सौकसः
कृत्स्नाभाः सुवसाशिरोऽसंकलासीरस्त्विरः सारसाः ॥ १

वीमांसांसमुवः समास सहसा सायो यजुः साहसाः
हासश्च स्वरसाभिलाषसरसीवीभत्सदासौजसः ।
वयासग्रासतरः पयोरसरसा पाथोयशः कीकसा
श्मश्रुर्ग्रासतपः स्रुसञ्जसवसुश्चासस्वसारः कृति ॥ २

वर्हिः पिपासा सर्पीषिजनुः साध्वसलिस्त्रवः ।
विहायसोपि साम्भोऽस्रंस्तमः स्रेफोऽङ्कसोऽन्त्यसाः ॥ ३

कियदन्त्यसकारान्ताः संगृहीताः पिचुम्बु कैः ॥

इति दन्त्यसकारान्तसंग्रहः ।

मश्रुमशानाशिषु शिश्न कुशेशयानिश्वश्रू शशिश्वशुरशाश्वतशिंपाश्च
शश्वच्छ्याकृशशिशिराण्यपि शूकशिश्वी तालव्यशद्वययुताः कथिताः
इतिभेदः शकाराणां त्रयाणां भाषितः कियान् ।

परिशिष्टम् ।

चिराप्रचलिततया संस्कृतभाषाया अस्याः शब्दगत प्रकृतोच्चारणानि सुचिरादेवाविदितानि लुप्तप्रायाण्येव संवृत्तानि। तथाहि "प्रतिज्ञानुनासिक्याः पाणिनीयाः" इति केषाञ्चिदाधुनिकवैया-करणानां पण्डितानां वचनबलेन का कथाऽन्यत्र वा परन्तु महर्षिपाणि-न्युपस्थानसमयेऽपि शब्दानां सानुनासिकनिरनुनासिकभेदेनोच्चारण पार्थक्यमविज्ञातमभवदिति प्रतीयते।

तत्र "स्वरा उदात्तादयो वेद एव प्रसिद्धाः काव्यमार्गे न तेषां परिगणनमस्ती" त्यपरेषां पण्डितानां वचनतः काव्यस्य सम्यक् सञ्चारसमये शब्दानामुदात्तानुदात्तादिभेदेनोच्चारणपार्थक्यमपि विलोपमधिगतमित्येवाऽवगम्यते एवं क्रमेण देशविशेषेषु मानव प्राकृतावयवसंस्थानादिवैशिष्ट्यादक्षररूपाणामपि स्वराणां व्यञ्जनानाञ्चोच्चारणापभ्रंशाच्छौरसेनी मुख्यावह्वोऽपभ्रंशभाषाः समुत्पन्ना याः खल्विदानीं प्राकृतपदेनाभिधीयन्ते।

परस्परं भिन्नरूपेष्वपि प्राकृत भाषानिचयेषु सर्व्वेष्वेव खलु ज, य, श, ष, सानामैक्य मुपजातं तथाहि ज, य, इत्युभयोर्ज इवोच्चारणं, श, ष, स इत्येतेषां त्रयाणां स इवोच्चारणं जातं, क्वचिच्च त्रयाणा-मेषां तालव्ये परिणमनं दृश्यते न इत्यस्य च मूर्द्धन्ये। सन्त्यन्यान्यपि वैशिष्टानि तानि तत्तद्भाषाव्याकरणतोऽनुसन्धेयानि।

एतस्मादेव कारणात् प्राकृतभाषामूलकवङ्गादिदेशीयभाषासु संस्कृतोच्चारणस्य सुमहद्वैलक्षण्यं परिलक्ष्यते। ततश्चेदानीमेक प्रदेशोत्पन्नमनुष्योच्चारित एकएव संस्कृतः शब्दोऽपरप्रदेशोत्पन्नै मानवैरन्यथैवोच्चार्य्यते। नचाऽवबुध्यन्ते च तैः परस्परमुच्चारितानि

एवमवस्थाविपरिणामे समुत्पन्ने संस्कृत भाषायां छिन्नाक्षर-कोष लिङ्ग (ष, स) कारभेद प्रमुख ग्रन्थानामाविर्भावस्यावश्यकत्वं जातम्। परमेते खलुग्रन्था वङ्गाक्षराभिलिखिता एव लभ्यन्ते, तेषां रचयितारश्च वङ्गदेशीया इति नामतः प्रतीयन्ते एवमादि कारण-कलापैरेतदप्यनुमातुं शक्यते यदन्यदेशापेक्षया वङ्गदेशे संस्कृतोच्चा-रणस्य समधिकं वैलक्षण्यं जातमिति।

वर्गरवान्तःस्थवकारयोर्भेदज्ञानार्थमपि कश्चिच्छ्लोको विद्यते यथा।

उदूठौ यत्र विद्येते *
योवः प्रत्यय सन्धिजः।
अन्तःस्थं तं विजानीया
त्तदन्यो वर्ग्य उच्यते॥

व्याकरणे न कारस्य णत्वविधायकानि सूत्राणि सन्ति ये खलु-शब्दाः स्वभावतो मूर्द्धन्य णवन्तस्तेषां परिज्ञानाय श्लोको यथा।

---

* यत्र उत्, ऊठश्च विद्येते, येषां वकाराणां स्थाने उत् ऊठ् आदेशयोरेकतरः समादिश्यते। यश्च वकार प्रत्ययजातः यश्च वकारः सन्धिजात एते सर्व्वे वकारा अन्तःस्थाः, एभ्योऽन्ये वकाराः वर्ग्याः

बाणी तूणीर वेणी फणि मणि वलयं वीणा
कल्याण वाणाः ।

गोणी घोणी कणाणुष्टुंण निर्वाण पणं स्थाणु
पुण्यं त्रिषाणाम्

माणिक्यं श्रोण शाणौ गुण गण गणिका वेणु
सिंहाण वीणा

निश्रीणो निक्कणोल्कणा किण वणिज: कङ्कणं
माणितूणी

पिण्याकमपि चाणक्य मित्याद्या:स्युः स्वभावत इति

नास्तिक्यनिरासः ।

अतिदुर्लभमतएव ब्रह्मज्ञानं, अतः शतक्रतवे जिज्ञासवे ब्रह्मज्ञानार्हतार्थं द्वात्रिंशद्वत्सराननुष्ठितब्रह्मचर्याय उपपन्नाय ब्रह्मा ब्रह्मज्ञानमुपदेष्टुम् त्रिर्द्वात्रिंशद्वत्सरान् ब्रह्मचर्यकरणमुपादिशत्। पुनरपि पञ्चवत्सरान्, व्यक्तमिदं छान्दोग्योपनिषदि । तथा वरुणोऽपि स्वपुत्राय जिज्ञासवे भृगवे ब्रह्मज्ञानार्हतार्थमनुष्ठित-तपसे [illegible] जिज्ञासस्व। इति चतुरुपदिष्टवानिति व्यक्तमिदं तैत्तिरीयोपनिषदि । एतेन [illegible] मर्त्यानां ज्ञानार्हतानुमानं नितरां [illegible] ।

[illegible] ।
न स्त्रियो वा [illegible] धार्म्मिकाः ॥
यत्रास्य वेदाध्ययनमन्वेति प्रतिपूरुषं ।
पूज्यन्तेऽतियत्नेयत्र गुरुशिष्यपरम्पराः ॥
स्वापेऽपि स्खलते नैव स्त्रीष्वपि ब्रह्मचारिषु ।
नियमोऽध्यात्ममत्येषु [illegible] ॥
तत्तत्कालेषु दानं हि तदर्थिभ्यः प्रदीयते ।
येषु वंशेषु सर्व्वेषां तेषामेव प्रकाशते ।
ब्रह्म ब्रह्मविदां देवि गुरुशिष्योक्तिशिक्षया ॥
न तु उपनिषत्पुस्तक[illegible] ब्रह्मज्ञानं तथाहि ।
अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवं ।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः ॥
इन्द्रियार्थेषु वैराग्य अनहंकार एव च ।
जन्ममृत्यु जराव्याधिदुःखदोषानुदर्शनं ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्ज्जनसंसदि ।
अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनं ।
एतज्ज्ञानमिति प्रोक्तं अज्ञानं यदतोऽन्यथा ॥

इति विंशतिप्रकाराणि ज्ञानसाधनानि भगवता उपदिष्टानि न ह्यन्तरेण साधनानि साध्यं साधयितुं केचन शक्नुवन्ति तेष चैकैकस्य समवधानमतिदुष्करं, किं पुनः सर्व्वेषां ? तथाहि अमानित्वं नाम मानवर्ज्जनं मानस्तु आत्मीयस्य गुणादेरुत्कर्षदर्शनं यथा ज्ञानिमानिनां निजज्ञानोत्कर्षदर्शनं, परेषां मूर्खत्वाक्षेपानुमितं। अदम्भित्वं नाम दम्भवर्ज्जनं दम्भस्तु आत्मन आत्मीयस्य वा धर्म्मादेरुत्कर्षप्रकटीकरणेन परप्रतारणं यथा ज्ञानिमानिनां आत्मनोऽकर्त्तृत्वाद्युत्कर्षस्य आत्मीयस्य च अन्तःकरणादेरागाद्यनाविलत्वाद्युत्कर्षस्य प्रकटनेन स्वल्पबुद्धीनां केषाञ्चित् प्रवञ्चनं। अहिंसा नाम हिंसावर्ज्जनं, हिंसा तु ।

कायक्लेशं मनोदुःखं वधं वा प्राणिनां पुनः ।
यत् प्रवर्त्तयति द्वेषात् सा हिंसेति समासतः ॥

इतिदेवलोक्ता ।

अत्र द्वेषादित्यस्य उपलक्षणत्त्व विधिप्राप्तव्यतिरिक्तहननादिकमेव हिंसा अतएव मनुः ।

यावन्ति पशुरोमाणि तावत् कृत्वोह मारणं ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ।

तथा याज्ञवल्क्यः ।

वसेत् स नरके घोरे दिनानि पशुरोमभिः ।
सम्मितानि दुराचारोऽयोहन्त्यविधिना पशून् ॥

अत्र मांसाशिनामपि हिंसादोषभागित्वं मनुराह यथा ।

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी

संस्कर्त्ता चोपकर्त्ता च खादकाश्चेति घातकाः ॥ उक्तञ्च
भक्षकश्चेदिह नास्ति वधककोपि न विद्यते॥

न ह्यभक्ष्यमांसान् मार्ज्जारादीन् केचन घातयन्ति तस्माद्युक्तिलब्ध एव मांसाशिनां हिंसादोषः यद्यपि हिंसावर्ज्जनस्य मा हिंस्यात् सर्व्वाभूतानि इतिश्रुतिनिषिद्धाकरणरूपत्वेन सुरापानादिवद्वर्ज्जनस्य श्रेयःसाधनत्वं न सम्भवति तथापि इह अहिंसापदेन मुमुक्षुभि र्विधिप्राप्तापि हिंसा वर्ज्जनीया इति प्रत्याय्यते इति न कश्चित् विरोधः। क्षान्तिर्नाम शीतोष्णातपमाननिन्दादुःखादिसहनं, तेषु सत्स्वपि आत्मनोऽविक्रियत्वं, आर्ज्जवं नाम अकौटिल्येन बन्धुप्रभृतिभिः सह व्यवहारः। आचार्य्योपासनं आचार्य्यस्य ज्ञानमुपदिशतः श्रोत्रियस्य ब्रह्मनिष्ठस्य कायिकादिव्यापारैः प्रीत्युत्पादनं, शौचञ्च द्विविधं वाह्यमाभ्यन्तरञ्च तत्र वाह्यं एका लिङ्गे गुदे तिस्र इत्यादि शास्त्रविहितं, आभ्यन्तरन्तु विष्णुचिन्तनादिना अन्तरिन्द्रियस्य शुचित्वसम्पादनं। स्थैर्य्यं नाम स्तुतिसम्मानसुखादावात्मनोऽविक्रियत्वं। आत्मविनिग्रहस्तु आत्मनोऽन्तरात्मनः प्राधान्येन पृथगुपदिष्टेभ्योमानदम्भाहङ्कारेभ्योऽन्यैः कामक्रोधलोभद्वेषेर्ष्यासूयादिभिर्दोषैः शून्यभावसम्पादनं। इन्द्रियार्थेषु वैराग्यं इन्द्रियविषयेषु ऐहिकस्रक्चन्दनवनितादिषु आमुष्मिकेषु च विमानाप्सरोगीतप्रभृतिषु योरागः यानशय्यासनशकटोद्यानाट्टलिकादिषु अनुरागस्तत्शून्यत्वं। अनहङ्कारोऽहङ्कारवर्ज्जनं, अहङ्कारस्तु आत्मन उत्कर्षदर्शनं, यथाज्ञानिमानिनां मर्त्यानां विशेषतः कलिकलुषितचेतसां विष्ण्वादिभिः साम्यदर्शनं। जन्ममृत्युजराव्याधि दुःखदोषानुदर्शनं जन्मनि, मृत्यौ, जरायां, व्याधौ आध्यात्मिकादितापत्रयात्मदुःखेषु च दोषस्य अनुदर्शनं पुनः पुनरालोचनं। तत्र जन्मनि जन्मनि गर्भनिवासयोनिद्वारनिःसरणं दोषः, तथा

जरायां प्रज्ञाशक्तितेजोनिरोधोदोषः, परिभूतता च तथा शिरोरोगा-दिषु व्याधिषु क्लेशोदोषः ।

व्याधीनां तापविशेषत्वेऽपि प्राधान्यविवक्षया पृथगुपन्यासः, तथाध्यात्मिकादितापेषु भयक्लेशादिकोदोषः । असक्तिः कर्म्मादिषु सङ्गवर्ज्जनं, सङ्गस्तु एतान्यपि कर्म्माणि मया कृतानि इमानि मे अनुष्ठितानि अविपर्यन्ति इत्येवं भावनालक्षणोऽभिनिवेशः, एवमर्थ-कामयोरपि । अनभिष्वङ्गः पुत्रदारगृहादिषु तेषु अतिशयित-ममत्वस्य वर्ज्जनं । नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु । इष्टस्य पुत्रजन्मादेः अनिष्टस्यार्थविपत्त्यादेश्चोपपत्तिषु अन्तःकरणस्य यथा पूर्ब्बमवस्थापनं । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । मयि-ईश्वरे अनन्ययोगेन अर्थकामाद्यभिसन्धिरहितयोगेन विना अव्यभि-चारिणी सार्व्वकालिकी भक्तिः । एवञ्च विष्णुभक्तिरपि ज्ञानसाध-नत्वात् विष्णुभक्तानां ज्ञानिभिरनुपेक्षणीया एव समारम्भः । अत्र श्लोकः योऽवज्ञाय हरिं मोहात् संसारादुत्तितीर्षति । कण्ठे बद्ध्वा शिलां गुर्व्वीं दोर्भ्यां सोऽब्धिं तितीर्षति । विविक्त-देशसेवित्वं तीर्थादिपूतदेशसेवित्वं । अरतिर्ज्जनसंसदि प्राकृत-जनसभायामप्रीतिः । तेन ज्ञानमानिनामिव बहुजनसमाजे ब्रह्म-विवेचनं न भवतीति वाञ्छितं अध्यात्मज्ञाननित्यत्वं सर्व्वदा उप-निषदाद्यध्यात्मशास्त्राणामालोचनं । तत्त्वज्ञानार्थदर्शनं तत्त्वज्ञा-नस्य योऽर्थः प्रयोजनं ब्रह्मभावः तस्य दर्शनमालोचनं तथा । नावि-रतो दुश्चरितान्नाशान्तोनासमाहितः नाशान्तमानसोवापि प्रज्ञा-नेनैनमाप्नुयात् । इति काठकश्रुतिः शास्त्रजज्ञानमात्रेण आत्म-लब्धिं व्यावर्त्तयति श्रुत्यर्थस्तु दुश्चरितान्निषिद्धकर्म्मणोऽविरतोऽ-निवृत्तः केवलेन प्रज्ञानेन शास्त्राचार्य्योपदेशजज्ञानेन एनमा-त्मानं न आप्नुयात् न प्राप्तुं शक्नोति अर्हति वा । एवमशान्तोऽ-

एवमशान्तमानसोऽनिवृत्तरागद्वेषादिर्नाप्नुयात्, एवमसमाहितोऽजितेन्द्रियोनाप्नुयात् तल्लक्षणमुक्तं मनुना श्रुत्वा दृष्ट्वा च स्पृष्ट्वा च भुक्त्वा घ्रात्वा तथैव च न हृष्यति ग्लायति वा सविज्ञेयोऽजितेन्द्रियः इत्यनेन। उपनिषदर्थबोधोपि दुर्लभतरः कोहि वेद धीरोवेदार्थमितिश्रुतिः। तथा वैवस्वतवचमनुवदन्ती काठकश्रुतिरपि श्रवणमात्राज्ज्ञानं व्यावर्त्तयति, यथा श्रवणायोपि वहुभिर्योऽलभ्यः शृण्वन्तोऽपि वहवोयं न विद्यु रिति तथा भगवद्वाक्यं श्रुत्वाप्येनं वेद न चैव कश्चिदिति अत्र किञ्चिच्चिन्त्यमिदानीमनुभूयते। यमात्मानं श्रोतुं वहवोन लभन्ते इति श्रुतिः स्वयं प्राह स इदानीं यस्मिन् कस्मिंश्चि देशे यतः कुतश्चित् पुरुषात् येन केनचिज्जनेन यया कयाचित् श्रोतुं लभ्यते, बलादिव वहव स्तं श्रावयन्ते इति तर्हि किमात्मश्रवनादिचोदना विफलेति चेन्नैवं अमानित्वादिसाधनसमवधानपरेण वर्णाश्रमाचारवता मुमुक्षुणा यतितव्यमेव तत्र सिद्धिश्च वहुभिर्जन्मभिर्भवति, यथोक्तं भगवता।

अनेक जन्मसंसिद्धस्ततोयाति परां गतिम् इति

न तु वर्णाश्रमाचारं त्यजतः कुत्रचित् सिद्धिरस्तीति तथा मनुः।

आचारो परमोधर्मः श्रुत्युक्तः स्मार्त्त एव च।

तस्मादस्मिन् सदाचारोनित्यं स्यादात्मवान् द्विजः।

आचाराद्विच्युतोविप्रो न वेदफलमश्नुते।

आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्।

एवमाचारतोदृष्ट्वा धर्मस्य मुनयोगतिम्।

सर्व्वस्य तपसोमूलमाचारं जगृहुः परं।

तथा विष्णुपुराणे।

समुल्लङ्घ्य सदाचारं कश्चिन्नाप्नोति शोभनं।

यानि तु—एतानिके महायज्ञान् यज्ञशास्त्रविदोजनाः।

वाच्येके जुह्वति प्राणं प्राणे वाचञ्च सर्व्वदा ।
वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयां
ज्ञानेनैवापरे विप्रा यजन्त्येतैर्मखैः सदा ।
ज्ञानमूलां क्रियामेतां पश्यन्तो ज्ञानचक्षुषेति ।

मनुवचनानि तु ब्रह्मनिष्ठानां वेदसन्न्यासिकानां गृहस्थानामेवमी विषय इति कुल्लूकभट्टोपदर्शितविषयकानि । वेदसन्न्यासिनस्तु कुटीचकाख्यसन्न्यासविशेषशालिन एव मनुषष्ठाध्याये सुक्तावल्यां तेनैव विचार्य्य निर्णीता अतएव आगस्त्ये । न गृही ज्ञानसाले च पवित्रेन च सङ्गतः। प्राप्नोति चन्द्रवदने दानहोमादिभिर्विना इत्युक्तं ।

तथा न्यायार्ज्जितधनो ज्ञाननिष्ठोऽतिथिप्रियः श्राद्धकृत् सत्यवादी च गृहस्थोऽपि विमुच्यते । इति ब्रुवतो वेदान्तोक्तीत महिम्नो याज्ञवल्क्यस्य ऋषेर्न्यज्ञप्रदर्शितपञ्चयज्ञादिनित्यकर्म्मणां श्राद्धप्रदर्शितनैमित्तिककर्म्मणाञ्च अत्यज्यता इत्यभिप्रायः प्रतीयते । न हि नृयज्ञ एवकार्य्यो नान्ये महायज्ञाः श्राद्धमेवकार्य्यं नान्यत् सर्व्वं एकादश्युपवासादिनित्यनैमित्तिकमिति तदाशयः । अनर्हः कर्म्मणां विप्रः सन्ध्याहीनोयतः स्मृतः इति । छन्दोगपरिशिष्टवचनेन सन्ध्यां विना श्राद्धाधिकारानुपपत्तिः। अतएवबहुभिर्महाश्रोत्रियै र्ब्रह्मजिज्ञासुभिः प्राप्तस्य ब्रह्मनिष्ठस्य अश्वपतिनाम्नोराज्ञोयजनं श्रूयते यथा । छन्दोग्योपनिषदि यक्ष्यमाणोह वै भगवन्तोऽहमस्मीत्यादि तथा ब्रह्मज्ञाननिष्ठस्य जनकस्य अग्निहोत्रं श्रूयते । यथा बृहदारण्यके जनकं ह वैदेहं याज्ञवल्क्योजगाम समेनेन वेदिष्य इति अथह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते इत्यादि तथा खाण्डिक्यजनकाय ज्ञानस्योपदेष्टुः केशिध्वजाख्यजनकस्य यजनं प्रायश्चित्तानुष्ठानञ्च विष्णुपुराणे षष्ठांशे श्रूयते भगवानप्याह कर्म्मणैव हि संसिद्धिमास्थिताजनकादयः इति । किञ्च ब्रह्मनिष्ठा-

पित्रादेः प्रेतत्वपरिहारकक्रियाश्च अवश्यकार्य्याः कथन्ताः सम्यग्-रहितैस्तैः सम्पादनीयाः अनर्हकर्म्मणामित्यादिवचनेनैन वैधकर्म्मणि अधिकारासम्पत्तेः। किमपरं परिनिष्ठितब्रह्मज्ञानस्य आप्तकामस्य परिशेषितकर्त्तव्यस्यापि कर्म्मपरित्यागमसहिष्णुः श्रीकृष्णोऽर्ज्जुनमुवाच।

लोकसंग्रहमेवापि सम्पश्यन् कर्त्तुमर्हसीति।

मास्य विषयान्तरमाशङ्किष्ठाः अत्र ह्यात्मैव आप्तकामः कर्त्तव्यरहितो दृष्टान्तीकृतः। न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि इत्यनेन यत्तु यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने समे च स्यात् वेदाभ्यासे च यत्नवान् इति मनुवचनं तदपि काम्यकर्म्मणां नित्यनैमित्तक कर्म्मणोवाहुल्यस्य च करणव्यावर्त्तकं नत्वातन्तिक सन्ध्यापञ्चयज्ञाष्टका श्राद्धादिनित्यनैमित्तिककर्म्मव्यावर्त्तनपरं। यत उक्तं भगवता नियतस्य च सन्न्यासः कर्म्मणोनोपपद्यते। मोहात्तस्य परित्याग-स्तामसः परिकीर्त्तितः इति तथा विष्णुपुराणम्।

यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते।

परिव्राज्यापि मैत्रेय स नग्नः पातकी स्मृतः॥

इति न हि भार्य्यारमणमेव गार्हस्थ्यं, किन्तर्हि गृहस्थविहित सन्ध्या पञ्चयज्ञाष्टकाश्राद्धादिनित्यनैमित्तिककर्म्माणि अतएव मनुवचनव्याख्यायां एतच्चैषां मोक्षोपायान्तराङ्गोपायत्वप्रदर्शनार्थं नतुग्निहोत्रादि परित्यागपरतयेतुरक्तं इति कुल्लूकभट्टः। नियतस्य च सन्न्यासकर्म्मणोनोपपद्यते इति नियतस्य नित्यनैमित्तिकस्य इत्यर्थः नोपपद्यते इति अयमभिप्रायः। आहिताग्नीनामग्नीनां मरणे सत्यन्त्येष्टौ विनियोगः सन्न्यासकाले वा भक्षपानादिना आत्मानि समर्पणं-एत द्वयं विना अग्नीनां त्यागे वीरहत्या एषवोयोदेवानामग्नि सुद्वास-

स्तनाशः स्वाध्यायस्नेः सुतस्य चेति मनुवचनादुपपातकिनश्च स्युः।
एवमनाहिताग्न्योऽपि सन्ध्यापञ्चयज्ञश्राद्धादित्यागे ।

एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितं।
नास्ति यस्यादर स्तत्र न स ब्राह्मण उच्यते ॥
इतिछन्दोगपरिशिष्ट निन्दया—
अकुर्व्वन् विहितं कर्म्म शक्तः पतति तद्दिने।
प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि ।
पक्षं नित्यक्रियाहानेः कर्त्ता भवेय मानवः ॥
सम्वत्सरक्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्य्योनिरीक्ष्यः साधुभिः सदा ॥
स्पृष्टौ स्नानं सचेलस्य शुद्धिहेतुर्महात्मने ।
हंसोभवति तस्योक्ता न शुद्धिः पापकर्म्मणः ॥
देवर्षिपितृभूतानि यस्य निश्वस्य वेश्मनि ।
प्रयान्त्यनर्च्चितान्यत्र लोके तस्मान्न पापकृत् ॥
देवादिनिश्वासहतं शरीरं यस्य वेश्म च ।

नतेन सङ्करं कुर्य्यात् गृहासनपरिच्छदैः ॥
इत्यादि विष्णुपूराणादिनिन्दया च अवश्यं निन्दिताः स्युः ।
तथा मरणात् परमवश्यं प्रेतभेदाः स्युः ॥
वान्ताश्युल्कामुखप्रेतोविप्रधर्म्मात् स्वकाच्च्युतः ।
इति मन्वादिवाक्यात् अन्यच्च ॥
यज्ञदानतपः कर्म्म न त्याज्यं कार्य्यमेव तत् ।
यज्ञोदानं तपश्चैव पावनानि मनीषिणां ॥
एतान्यपि तु कर्म्माणि त्यक्ता साङ्गफलानि च ।
कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ॥

इति वचनेन नित्यनैमित्तिकादितरेषामपि यज्ञादीनां सङ्ग-फलत्यागेन कर्त्तव्यत्वमुपदिशति भगवान् सङ्गस्तु व्याख्यातः पूर्व्वमेव तथा श्रुतिरपि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन

नास्तिक्यनिरासः ।

अज्ञानवतां निराकुलः कर्मयोगः। एवञ्च सुधैव ज्ञानिमानिनां अविरतमेव कर्तृत्वभोक्तृत्वादिरागधर्मत्वमनुभवतां नाहं कर्त्ता नाहं भोक्ता इत्यादि वाङ्मात्रेण परान् प्रतारयतां रागादिनिरुपहतचेतसां कर्मत्यागस्य शास्त्रीयत्वं सुदूरपराहतमेव तादृशानां मनुः ।

योऽन्यथासन्तमात्मानमन्यथावस्तु भाषते ।
स पापकृत्तमो लोके स्तेन आत्मापहारकः कुर्वाणीस्य ।
सांसारिकदुःखासक्तं ब्रह्मज्ञोऽस्मीति वादिनम् ।
कर्मब्रह्मोभयभ्रष्टं संत्यजेदन्त्यजं यथा ।

यदि तु संत्यज्य निजकर्माधिकारं ब्रह्म जिज्ञासन्ते तदा तेषां महतीमुपहसनीयतां नहि डुण्डुभा धारणे अशक्ता अजगरं धारयितुं प्रभवन्ति। अथ न ते जिज्ञासवः साधकाः किन्तु ज्ञात्वापि परं धर्ममिति मनुवचनेन "प्राप्य ज्ञानं ब्राह्मणात् क्षत्रियाद्वा वैश्यात् शूद्रादपि नीचादभीक्ष्णं । श्रद्धातव्यं श्रद्धानेन नित्यं न श्रद्धिनं जन्ममृत्यू विशेतां" इति मोक्षधर्मवाक्येन च सूचिताः । प्राग्जन्मार्जिततपोयोगब्रह्मचर्यप्रभृतिभिः सम्पादितात्मानिर्वाणसाधनाः अवश्यम्भाविजन्मान्तरफलककर्मविशेषान्तरायप्रतिबद्धसिद्धयः भरतधर्मव्याधादय इव प्रतिबन्धकापसरणादुदितसिद्धिकाः लोकसंग्रहमात्रप्रयोजनमनपेक्षमाणाः सिद्धा एव, इति चेत् किं लोकविगाहनदेवार्चनादिधर्मानुच्छेदार्थकमहाप्रयत्नेन लिङ्गेन तेषां तत्त्वज्ञानमनुमिनोषि ? लोकसंग्रहमनपेक्षमाणास्तु सिद्धा जडोन्मत्तादिवदाचरन्ति तथा च विष्णुपुराणे ।

तथा चरेत वै योगी सतां धर्ममदूषयन् ।

हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः।
आत्मानं दर्शयामास जड़ोन्मत्ताकृतिं जने ।

इति भरतोपाख्याने, किञ्च किंवक्तव्यं ज्ञानिमानिनां दुर्ज्ञानस्य महत्वं यतः योयोज्ञानिमानी स सश्रुतिस्मृतीतिहासाखिलाख्यानादिप्रसिद्धमहिमानं जगदुपासनीयं स्तुत्यस्तुत्य मुक्तिप्रदं हतहिरण्यकशिपुप्रभृत्यसुराहङ्कारमित्यादिविशेषणोपपन्नं विष्णुमपि मर्त्येन तुच्छेन सम्भावितनरकयातनातिर्य्यक्त्वपङ्गुत्वाद्यनर्थजातेन अजितक्षुत्पिपासारागहर्षविषादकामक्रोधलोभभ्रमप्रमाद मोहमदद्वेषेर्ष्यासूयामानाहङ्कारादि दोषेण प्रतिक्षणं पराजितेन आत्मना समं पश्यति तं आत्मनोहीनं वा ब्रह्मदासाः ब्रह्मकितवा इत्यादि दासकितवादिब्रह्माम्नायपर्य्यालोचनया तस्य कैवर्त्तकितवादिसाम्यदर्शनेन पश्यति हीनतरं वा सर्व्वं खल्विदं ब्रह्म इत्यादि सर्व्वब्रह्मश्रुतिविमर्षणात् तस्य कीटकिञ्जलुकादिसाम्यदर्शनेन पश्यति अहोचित्रं होहो। यदा देवानामपि इन्द्राग्निवायवादित्यमप्रभृतीनां प्रत्येकं कोटितमांशेन न समः कश्चिन्मर्त्यः तदा देवानामपि दैवतस्य विष्णोः का वार्त्ता एवं शिवादिषून्नेयं। ननु कोन्योविष्णुर्नाम केवलं जीवापेक्षया काचादिवत्विमलेन उपाधिना परिच्छिन्नं प्रदीपवत् चैतन्यं जीवस्तु समलेन उपाधिना परिच्छिन्नं तत् इति ज्ञानिमानिनः कथयन्तोति चेत् अनेन विष्णुनिर्व्वचनेन ब्रह्मापेक्षयापि निजज्ञानोत्कर्षः प्रकटितो भवति ज्ञानिमानिभिः यतः योऽहं देव यतश्चाहं तद्भवान् वक्तुमर्हतीति प्रश्नानन्तरं दर्शितेन न विद्मः को भवानिति इति लङ्काकाण्डीयब्रह्मोत्तरवाक्येन ब्रह्मणाऽपि निर्व्वक्तुमशक्यः स इति प्रतीयते उत्तरवाक्यस्य स्तुतिरूपत्वासम्भवएव अनेन ज्ञानिमानिनामवाच्यमहिमानं वुध्यस्व प्रष्ट-

ब्रह्मज्ञानं केचि द्ब्रह्म निष्ठाः सन्तः साधयन्ति, केचित् मायामृत्योर्दु-र्जयत्वं मन्यमानाः विष्णाद्यधीनां मुक्तिमन्विच्छन्तो विष्णाद्युपासनां कुर्व्वंते ते यत उक्तं भगवता ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ इति
तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात् ।
भवामि न चिरात् पार्थ मय्यावेशितचेतसां ॥ इति
माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितोहि सः ॥
क्षिप्रं भवति धर्म्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥

इत्यादि तथा मार्कण्डेयपुराणं । सैषा प्रसन्ना वरदा नृणां भवति मुक्तये इति तथा आराधिता सैव नृणां भोगस्वर्गापवर्गदा इत्यादि ननु ऋते ज्ञानान्न मोक्षोभवति इति चेत् न एवमाह भवतीति तेषां सततयुक्तानां भजतां प्रीतिपूर्व्वकं । ददामि बुद्धियोगं तं येन मा मुपयान्ति ते ।

तेषामेवानुकम्पार्थं महमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥

इति भगवद्वाक्येन तेषां ज्ञानस्यापि तदधीनत्वावगमात् वृष्टिकामस्य कारीरोष्ट्या यजमानस्य धनाधन इव मोक्षकामस्य न ज्ञाने पृथगुद्देशः । न च ते उपासका ब्रह्मनिष्ठेभ्योहीना मन्तव्याः यतः

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥
ये त्वक्षरमनिर्द्देश्यमव्यक्तं पर्य्युपासते ।
सर्व्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवं ॥
संनियम्येन्द्रियग्रामं सर्व्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्व्वभूतहिते रताः ॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥

इति भगवदुत्तरवाक्ये स्तेषां युक्ततमत्वञ्च प्रतीयते। प्रश्नोत्तर वाक्यानाञ्च निर्णयपरत्वेन नार्थवादरूपत्वञ्च सम्भवतीति न नु—

चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्य्यार्थं ब्रह्मणोरूपकल्पना ॥

इति यमदग्निवचनेन साकारोपासकानामपि: कल्पितब्रह्मोपासनारूपत्वेन तद्वन्तः सुतरामकल्पितब्रह्मोपासकेभ्योहीना एवं सनत्वादस्तु यथाकथञ्चित् समाधेयमिति चेत्? किं ब्रवीषि, ब्रह्म णोरूपकल्पना इत्यनेन कोऽर्थः प्रतीतः काऽत्र कल्पना, कः कल्पकः ? ननु कल्पनाघटनं कल्पकस्तु यजमान एव तेन रूपकल्पना प्रतिमा घटनमित्यर्थः इति चेत्। ब्रूहि किमशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदित्यादिशास्त्रेण ब्रह्मणोरूपमवगम्य प्रतिमा तस्य घटनीया नच गुणवतो ब्रह्मणोरूपकल्पना इति वाच्यं तदपि किं यतोवा इमानि भूतानि जायन्ते इत्यादि शास्त्रेण रूपं ज्ञात्वा घटयिष्यसि नापि ब्रह्मशब्देन शरीरवान् विष्ण्वादिर्वक्तुं शक्यः पूर्व्वापरासंगतेः न च रूपे प्रतिमादौ ब्रह्मणः कल्पना आहार्य्य

कल्पना आहार्य्यज्ञानं तन्नत्याधार: कल्पकास्तु उपासकएव इतिचेत् कल्पनाकल्पकभेदात् अनन्ता एव विष्णव: स्यु:। नह्येवं वैष्णवा: सम्प्रतिपद्यन्ते अमुकस्य विष्णोरन्यो मम विष्णुरिति किन्तु धातुरपि विधाता एक एव विष्णु: सर्व्वैरेव ध्यायते अर्च्च्यते इत्यादि एवमन्येषु शिवादिषूह्येयं। अथ मनोब्रह्म उपासीत इत्यादिवत् विष्ण्वादौ ब्रह्मण: कल्पना आहार्य्यतादात्म्यज्ञानं इत्येवार्थ इति चेत् ब्रह्मणोरूपकल्पना इत्यसङ्गतं नच रूपशब्देन लक्षणया रूपवानुच्यते रूपे कल्पना इति सप्तमीसमास: तेन रूपवति विष्ण्वादौ ब्रह्मण: कल्पनेति सवदभिमतोऽर्थ: अपि च यन्मनसा न मनुते येनाहुर्मनो-मतं तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते इत्यादिकाभिराह्या ध्येज्ञानविषयस्य ब्रह्मत्वञ्च निरस्यन्तीभि: तत्त्वमुपदिशन्तीभि र्जनितेन तत्त्वज्ञानेन मन: प्रभृतेरिव विष्णोरपि ब्रह्मत्वस्य वाध्यत्वे तस्य परेषां ब्रह्मभावप्रदत्त्वबोधकानि माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते। सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते इत्यादीनि असंशयित प्रमाणान्यपि शास्त्राणि उपहसनीयानि स्यु:, स्वयमसिद्ध: कथं परान् साधयतीति तर्हि कोऽर्थो वचनस्य इति चेत् शृणु चिन्मयत्वादि विशेषणयुक्तस्यापि ब्रह्मण: उपासकानां कार्य्यार्थं रूपस्य कल्पनं करणमित्यर्थ: ब्रह्मण इति कर्त्तरि षष्ठी एतत् व्यक्तमुक्तं भगवता।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥
व्यक्ततरमुक्तमगस्त्येन सर्व्वेश्वर: सर्व्वमय: सर्व्वभूतहिते रत:।
सर्व्वेषामुपकाराय साकारोऽभन्निराकृति:॥
अजोऽप्यजायतानन्त: सन्तोभूद्भूतभावन:।

नच कल्पयते: करोत्यर्थाप्रसिद्धि: सूर्य्याचन्द्रमसौ धाता यथापूर्व्वं

पालनादिकमपि प्रयोजनमुन्नेयं, ननु निराकारस्य सर्व्वव्यापकस्य सृष्ट्यादिकर्त्तृत्वं साक्षात् श्रुतिप्रतिपादितं रूपधारणन्तु ज्ञानि मानिनो नाभ्युपगच्छन्ति इति चेत् अलमभ्युपगमेन ब्रह्मह देवेभ्यो विजिग्ये तस्यह ब्रह्मणो विजये देवा असहीयन्तत ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति। तद्धैषां विजज्ञौ तेभ्योह प्रादुर्ब्बभूव तन्न व्यजानत किमिदं यक्षमितितेऽग्निमब्रुवन् जातवेद एतद्विजानीहि किमेतत् यक्षमिति तथेति तदभ्यद्रवत् तमभ्यवदत् कोऽसो अग्निर्व्वाहमस्मीत्यब्रवीत् जातवेदा वाहमस्मीति। तस्मिं स्त्वयि किं वीर्य्यमित्यपीदं सर्व्वं दहेयं यदिदं पृथिव्यामिति। तस्मै तृणं निदधावेतद्दहेति तदुपप्रेयाय सर्व्वजवेन तन्न शशाक दग्धुं स तत एव निवहृते नैतदशकं विज्ञातुं यदेतत् यक्षमिति वायुमब्रुवन् वायवेतद्विजानीहि किमेतत् यक्षमिति तथेति तदभ्यद्रवत् तमभ्यवदत् कोऽसीति वायुर्व्वाहमस्मीत्यब्रीन्मातरिश्वा वा अहमस्मीति तस्मिं स्त्वयि किं वीर्य्यमित्यपीदं सर्व्वमाददीय यदिदं पृथिव्यामिति। तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्व्वजवेन तन्न शशाकादातुं स तत एव निवहृते नैतदशकं विज्ञातुं यदेतत् यक्षमिति। तथेन्द्रमब्रुवन् मघवन्नेतन्तद्विजानीहि किमेतत् यक्षमिति तथेति तदभ्यद्रवत् तस्मात्तिरोदधे इति केनोपनिषद्ब्राह्मणस्य अप्रामाण्यमभ्युपगच्छन्तु प्रागलिखित भगवद्गस्तग्रवाक्ययोश्चेति। साक्षोपासनाध्यानधारणार्च्चननामकीर्त्तनमन्त्रजपहोमवन्दनादिरूपा तथा च भगवद्वाक्यानि मां ध्यायन्त उपासते इति।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।

तदहं भक्त्युपहृतमश्नामि प्रयतात्मवान्॥

तथा विष्णुपुराणं।

भवतीयत् परं रूपं तन्न जानन्ति केचन।
अवतारेषु यद्रूपं तदर्च्चयन्ति दिवौकसः।

तथा शिवादुग्रपासनारतानि वाक्यानि अनुसन्धेयानि तत्र ध्यानधारणयोरसमर्थां अर्च्चनादिकं कुर्व्वन्ति। यथा भगवद्वाक्यं।

मय्येव मनः आधत्स्व मयि वुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्द्ध्वं न संशयः।
अथ चित्तं समाधातु न शक्नोषि मयि स्थिरं।
अभ्यासयोगेन ततोमामिच्छाप्तुं धनञ्जय।
अभ्यासेऽप्यसमर्थोसि मत्कर्म्मपरमोभव॥

इति तच्चार्च्चनं नाना तापनीयादिश्रुतिस्मृतिपुराणेतिहासतन्त्र पञ्चरात्रादिविहितं भूतादिशुद्धिन्यासजालदिग्बन्धनमुद्राविरा चनाद्यङ्गोपेतं शालग्रामयन्त्रप्रतिमादिषु यथाविधि कुर्व्वाणाः शास्त्रार्थे दृढ़प्रत्ययरूपया श्रद्धयोपेताः साधूनां न गर्हणामर्हन्ति प्रत्युत श्रद्धावत्त्वेन प्रशंसामिति। यतः शास्त्रेषु हेतुवादं निवार यति। भगवान् मनुः। श्रुतिस्तु वेदोविज्ञेयोधर्म्मशास्त्रन्तु वे स्मृतिः। ते सर्व्वार्थेष्वमीमांस्ये ताभ्यां धर्म्मो हि निर्व्वभावितयनेन। महाभारतञ्च।

पुराणं मानवोधर्म्मः साङ्गोवेदश्चिकित्सितं।

आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिरिति निन्दति हैतुकान् भगवान् मनुः योवोऽमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः।

स साधुभिर्व्वहिष्कार्य्योनास्तिकोविदनिन्दकः।

तथा हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेदिति।

विरच्य निरर्थकमिव जनान् प्रतारयाञ्चक्रुः एतावत्तु न कं गर्हयन्ति इति न तेन किमपि छिद्यते। ननु यथा स्मृतिशास्त्रादिषु देवार्चनविधिः श्रूयते तथा निषेधोऽपि श्रूयते यथा शिल्प [illegible] नृणाम- र्चायां देवबुद्धिः। दर्शनस्पर्शनजपपूजनध्यानार्चनादिकं इति। यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः। यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः इति। यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरं। हित्वार्च्चां भजते मौढ्यात् भस्मनीव जुहोति सः। इति भागवते दृष्ट्वा शिलाधातुद्रव्यादिमूर्त्तावीश्वरबुद्धयः। क्लिश्यन्ति तपसा मूढाः परां शान्तिं न यान्ति ते। इति तत् कथं समाधेयमिति चेत् न बुध्यथाः किमेतानि वाक्यानि निषेधविधिरूपाणि उतार्थवादाः, नन्वर्थवादा एव एते अन्यथा- नुपपद्यमानानि निषेधविधिमुन्नाययन्ति कुष्माण्डे चार्थहानिः स्यादि- त्यादिवत् इतिचेन्न काप्यनुपपत्तिः ज्ञानवज्जनोपसर्पणे तदीयपूज्य- त्वबोधात्मोपासनीयविधीनां स्तावकत्वेन अर्थवादानामुपपत्ति- सम्भवात् यथा तीर्थमात्रे तु कर्त्तव्यं सतिलेनैव तर्पणम्। योऽन्यथा- तर्पयेन्मूढः स विष्ठायां क्रिमिर्भवेत् इति निन्दा तीर्थे दैवात्तिलाभा- वे तर्पणं न निषेधयति किन्तु तिलतर्पणस्य स्तावकतया निषिद्धति- थ्यादिष्वपि तिलतर्पणं तीर्थे विदधाति एवमेव मीमांसितं स्मार्त्त भट्टाचार्य्येण। तदुक्तं न निन्दा निन्दितुं प्रवर्त्तते। किन्तु विधि- मेव स्तौति इति अन्यथा यथाश्रुतार्थपरत्वे गङ्गादिषु तीर्थ बुद्धीनां महर्षिमुख्यानामपि गोखरत्वव्याक्षेपः स्यात् श्रूयते हि भार- तपुराणादौ शतशः सप्तर्षि प्रभृतीनां तीर्थयात्रा, तथा प्रह्लादस्यापि तीर्थयात्राविस्तारेण वामनपुराणे वर्णितास्तेन च अज्ञातज्ञापकै- रविगीतशास्त्रैः प्रमापितमर्थं प्रतिपाद्यमाना व्याक्षेपनीयतामर्हन्ति किन्त्वश्रद्धाना एव व्याक्षिप्यन्ते इति। [illegible]

देवत्वबुद्धिः प्रसिद्धत्वात्। अपि च यदाशङ्कसे मूर्खत्वव्याक्षेपेण
मरणान्ताशौचं तत् कथं प्रतिमाधारकाचनविधेः सत्तालब्धि
समर्थयिष्यसि कर्म्ममात्रे तु कर्त्तुः शुचित्वापेक्षणात् वस्तुतः मूर्खप
देनानाद्यविद्यायुक्ता उच्यन्ते अतिप्रसङ्गात् किन्तु अज्ञातज्ञातव्या
विपरीतज्ञानयुक्ताश्च उच्यन्ते। तत्र प्रथमभावमभिप्रेत्य स्मार्त
भट्टाचार्य्यैरुक्तं मूर्खस्य गायत्रीरहितस्य सार्थगायत्रीरहितस्य
इति रुद्रधरः इति पूर्व्वोपदर्शितमूर्खभावद्वयं ज्ञानिमानिभिरेव
सुलभं यतः कार्य्याकार्य्यबोधरहिता विष्णु्वादिभिरात्मसाम्यं विप-
रीतं ते बुध्यन्ते ततश्च क्रियालोपयथेष्टाचरणमूर्खत्वानां सन्निपा-
तात् तानेव यावज्जीवमत्यन्ताशौचभाजः सम्प्रति सम्मतीमः।
इतिनास्तिक्यनिरासः समाप्तः।

नारदस्मृतिः।

(टीकासहिता)

अवतरणिका।

इह हि भगवान् मनुः प्रथमं सर्व्वभूतानुग्रहार्थमाचारस्थितिहेतुभूतं शास्त्रञ्चकार। यत्र लोकसृष्टिर्भूतप्रविभागः सद्देशप्रमाणं पर्षल्लक्षणं वेदवेदाङ्गयज्ञविधानमाचारो व्यवहारः कण्टकशोधनं राजवृत्तं वर्णाश्रमविभागो विवाहन्यायः स्त्रीपुंसविकल्पो दायानुक्रमः श्राद्धविधानं शौचाचारविकल्पो भक्ष्याभक्ष्यलक्षणं विक्रेयाविक्रेयमीमांसा पातकभेदाः स्वर्गनरकानुदर्शनं प्रायश्चित्तानुपनिषदो रहस्यस्थानानि एवं चतुर्विंशति प्रकरणानि।१। तदेतदत्र श्लोकशतसहस्रेण साशीतिनाध्यायसहस्रेण च भगवान् मनुरुपनिबध्य देवर्षये नारदाय प्रायच्छत्। स च तस्मादधीत्य मत्वा चायं ग्रन्थो न सुकरो मनुष्यैरेव धारयितुमिति द्वादशभिः सहस्रैः सञ्चिक्षेप, तच्च महर्षये मार्कण्डेयाय प्रायच्छत्।२। स च तस्मादधीत्य तथैवायुः शक्तिमपेक्ष्य मनुष्याणामष्टभिः सहस्रैः संचिक्षेप, तच्च सुमतये भार्गवाय प्रायच्छत्॥ ३। सुमतिरपि भार्गवस्तस्मादधीत्य तथैवायुर्ह्रासादल्पीयसीं शक्तिमनुष्याणामिति चतुर्भिः सहस्रैः संचिक्षेप। ४। तदेतत् पितृमनुष्याह्यधीयन्ते, विस्तरेण शतसहस्रं देवगन्धर्व्वादयः। तत्रायमाद्यः श्लोकः—"आसीदिदं तमोभूतं न प्राज्ञायत किञ्चन। ततः स्वयं भूर्भगवान् प्रादुरासीच्चतुर्मुखः"।५। इत्येवमधिकृत्य क्रमात् प्रकरणात् प्रकरणमनुक्रान्तम्। तत्र नवमं प्रकरणं व्यवहारो नाम यत्रेमामादौ देवर्षिर्नारदः सूत्रीयां मातृकां चकार॥ आसत्रायमाद्यः श्लोकः। ६।

(१—६) नत्वा श्रीगुरुचरणं नारदभाष्यं कुलेखकैर्भ्रष्टं। केनचित्त्व

धर्म्मैकतानाः पुरुषाः यदासन् सत्यवादिनः ।
तदा न व्यवहारोभून्नद्वेषोनाऽपि मत्सरः ।१।
नष्टे धर्म्मे मनुष्याणां व्यवहारः प्रवर्त्तते ।
द्रष्टा च व्यवहाराणां राजा दण्डधरः स्मृतः ।२।

आदौ सर्व्वेषां प्राणिनां अनुग्रहार्थं आचारोनाम शिष्टपरम्पराचरितः सदाचारस्तस्य स्थितिश्चिरस्थायिता, तस्या स्तत्र वा हेतुभूतं कारणस्वरूपं शास्त्रं मनुसंहितेति प्रसिद्धं धर्म्मशास्त्रं चकार कृतवान्, यत्र शास्त्रे लोकसृष्टि प्रभृतीनि चतुर्विंशति प्रकरणानि सन्तीति शेषः। मनुसंहिताध्ययनेनैव तान्यशेषतोज्ञातव्यानीत्यर्थः। आसीदिति इदं जगत् सृष्टेः प्रागिति शेषः, तमोभूतं घोरेण तमसा अभिभूतं अन्धकारमयमिति यावत् आसीत् स्थितम्। अमुमेवार्थं स्फुटं चिकीर्षुराह-न प्राज्ञायतेति किञ्चन किमपि जगदन्तर्गतं द्रव्यं दिशोविदिशश्च न प्राज्ञायत न ज्ञानविषयीभूतमभवत्, सर्व्वाणि वस्तूनि स्वस्वप्रकृतौ लीनान्यासन्, ततश्च न कस्यापि ज्ञानमभवदित्यर्थः। ततः तस्मात्तमसः स्वयंभूः स्वयंभूतः, यस्योत्पत्तेः कर्त्ता कश्चिदन्योन वर्त्ततेस्येतिभावः, भगवान् षड़ैश्वर्य्यशाली चतुर्मुखः आदि प्रजापतिर्ब्रह्मा प्रादुरासीत् प्रकाश आसीत् प्रादुर्बभूवेति यावत्। स चास्मादज्ञाततमसान्धाज्जगतोयथाक्रमं लोकसृष्टिमकरोदित्येवमधिकृत्य प्रकरणान्यनुक्रान्तानि। तत्र मनूक्तेषु प्रकरणेषु नवमं प्रकरणं व्यवहारोनाम यश्च सर्व्वोपकारित्वात् प्रथमं देवर्षिणा नारदेन सविस्तरमभिहित इत्यर्थः। अस्य (नारदोक्तस्य) ग्रन्थस्य अयं वक्ष्यमाण आद्यश्लोकः प्रारम्भवचनम्।

(१) धर्म्मोनाम श्रुतिस्मृतिपुराणादिमहर्षिवचनैस्तथात्वेनानुशिष्टः शिष्टाचारमूलश्च सः (धर्म्मः) एकतानः एकवलः अद्वितीय

भूताः पुरुषा यदा यस्मिन् काले आसन् अभवन्, तदा तस्मिन् समये व्यवहारः, द्वेष ; मत्सरश्च न अभूत् न बभूव। तस्मिन् धर्म्म प्रधानसमये कश्चित् प्रति न कोऽपि द्वेषं (वैरभावं विरोधमिति यावत्) नापि मत्सरं (तत्सम्पदसहनं क्रोधं वा) अकरोत्, ततश्च परस्परस्य हिंसन विरहात् न कोऽपि राजद्वारे अभियोगं चकार कुतो व्यवहारस्यावकाशः, धर्म्मस्य व्यवहारद्वेषमत्सरैः सह छाया-तपवद्विरोधभावः, यथा यत्रातपस्तत्र न छाया, यत्र छाया तत्रनातपश्च, तथा यदा धर्म्मस्तदा न व्यवहारद्वेषमत्सराः यदापुनरिमे तदा धर्म्म इत्येतदर्थं एवाभिहितो भगवता नारदेन। अथ कोऽयं व्यवहारो नामेति चेदाह मिताक्षरा-अन्यविरोधेन स्वात्म-सम्बन्धितया कथनं व्यवहारः, यथा कश्चिदिदं क्षेत्रादि मदीय-मिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति ; स च व्यवहारः प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको भवति। प्रतिज्ञादीनां लक्षणं चाग्रे स्फुटी भविष्यति। व्यवहार विषय-श्चाह याज्ञ वल्क्यः-"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः। आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्" अस्यार्थः धर्म्मशास्त्र समाचारविरुद्धेन मार्गेण परैः आधर्षितः अभिभूतोयद्राज्ञे प्राड्-विवाकाय वा आवेदयति विज्ञापयति चेत्, तदाविद्यमानं व्यव-हारस्य विषयः। तच्च पुनरष्टादशधा भिद्यते यथाह-मनुः-"तेषा-माद्य मृणादानं, निःक्षेपोऽस्वामिविक्रयः, सम्भूय च समुत्थानं, दत्तस्यानपकर्म्म च, वेतनस्यैव चादानं, संविदश्च व्यतिक्रमः, क्रय-विक्रयानुशयो, विवादः स्वामिपालयोः, सीमाविवादो धर्म्मश्च, पारुष्ये दण्डवाचिके, स्तेयञ्च साहसञ्चैव, स्त्रियः संग्रहमेवच, स्त्रीपुं धर्म्मौ, विभागश्च द्युतमाह्वयमेव च पदान्यष्टादशैतानि व्यवहार-स्थिताविह" इति।

(उक्तस्वरूपः) प्रवर्त्तते, प्रवृत्तोऽभूदित्यर्थः। अथकालप्रभावेण मनुष्याणां तथाविधायां धर्म्मैकतानतायां विनष्टायां द्वेषादीनाञ्च प्रवृत्तौ व्यवहारस्यावश्यकता जातेत्यर्थः। ततः कोव्यवहारं करिष्यतीत्याशङ्क्याह द्रष्टाचेति—राजा भूस्वामी व्यवहाराणां द्रष्टा निर्व्वाहकः, हि यस्मात् स दण्डधरः दुष्टानां निग्राहकः स्मृतः मन्वादिभिर्निर्द्दिष्ट इत्यर्थः। तथा च याज्ञवल्क्यः—"व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह। धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्ज्जितः" इति नृप इति क्षत्रियमात्रस्यैवाऽयं धर्म्मः नृपः (राजा) विद्वद्भिर्वेदव्याकरण धर्म्मशास्त्राभिज्ञै ब्राह्मणैः (न क्षत्रियादिभिः, ब्राह्मणैरिति सहयोगे तृतीया ततश्च व्यवहारतद्दर्शने तेषामप्यप्राधान्यं सूचितं) धर्म्मशास्त्रानुसारेणार्थशास्त्रानुसारेण (देशादिसमयधर्म्माणामपि धर्म्मशास्त्रान्तर्गतत्वेन न पृथगुपादानं) क्रोधलोभविवर्ज्जितः सन् व्यवहारान् पश्येत् अवलोकयेत्। अतोव्यवहारादर्शनेऽन्यथा दर्शनेन च राज्ञोदोषएव। यथाहमनुः—"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशोमहदाप्नोति नरकञ्चैव गच्छतीति"। अथ चेत् कार्य्यवशाद्राजा व्यवहारं द्रष्टुं न शक्नुयात्तदा किंकर्त्तव्यमितयत आह याज्ञवल्क्यः "अपश्यता कार्य्यवशाद्व्यवहारान्नृपेण तु। सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्व्वधर्म्मवित्।" इति कार्य्यान्तरव्याकुलतया व्यवहारान् अपश्यता नृपेण सभ्यैः सह सर्व्वधर्म्मवित् (सर्व्वान् शास्त्रोक्तान् सामयिकांश्च धर्म्मान् वेत्तीति तादृशः। ब्राह्मणः (न क्षत्रियादिः) नियोक्तव्यः व्यवहारदर्शने इतिशेषः, तस्य (ब्राह्मणस्य) स्वरूपञ्च कात्यायनेनोक्तं तथाहि "दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरं। परत्रभीरुं धर्म्मिष्ठ मुद्युक्तं क्रोधवर्ज्जितम्" इति एवम्बिधब्राह्मणासम्भवे क्षत्रियं वैश्यंवा नियुञ्जीत न शूद्रमिति मिताक्षरा। सभ्यानां लक्षणञ्चोक्तं

लिखितं साक्षिणश्चैव द्वौ विधी परिकीर्त्तितौ ।
सन्दिग्धार्थविशुद्ध्यर्थं द्वयोर्विवदमानयोः ॥ ३ ॥
सोत्तरोनुत्तरश्चैव स विज्ञेयोद्विलक्षणः ।
सोत्तरोऽभ्यधिको यत्र विलेखापूर्व्वकः पणः ॥ ४

सभासदः कार्य्या रिपौ मित्रे च ये समा" इति । ते च त्रयः कर्त्तव्याः नन्यूनाः, "यस्मिन् देशे निषीदन्ति विप्रा वेद विदस्त्रयः" इति मनुस्मरणात्, बृहस्पतिस्तु, "सप्त पञ्च त्रयोवा सभासदो भवन्ती-त्याह ।

(३) सर्व्वत्रैव व्यवहारे वादिप्रतिवादिनौ वर्त्तेते । तत्राभि[illegible] वादी, यं प्रत्यभियोगो भवति स प्रतिवादी परस्परं विव-[illegible]र्वादिप्रतिवादिनोरेकतरस्यापि दोषेण (दुष्टलक्षणमाह [illegible] देशाद्देशान्तरं याति सृक्कणी परिलेढि च ललाटं स्विद्यते [illegible] मुखं वैवर्ण्यमेति च । परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु-भाषते वाक्चक्षुः पूजयति न तथोष्ठौ निर्भुजत्यपि स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः अभियोगेऽथ साक्ष्ये वा स दुष्टः परिकी-र्त्तितः । इत्युक्तलक्षणविकृतिमापन्नस्य जनस्य तत्तच्चेष्टाविशेषेण)-[illegible] सन्दिग्धीभूतः तस्य सन्दिग्धार्थस्य विशुद्ध्यर्थं स्फुटीकरणार्थं [illegible]खितं (दलिल् इति भाषा) साक्षिणश्चेति द्वौ विधी (उपायौ) परि-[illegible]र्त्तितौ । याज्ञवल्क्यस्तु त्रिविधमेव प्रमाणमाह "प्रमाणं [illegible]खितं भुक्तिः, साक्षिणश्चेति कीर्त्तितम्" । तत्र लिखितं द्विविधं [illegible]सनं चीरकञ्चेति, शासनं ताम्रपत्रादि, चीरकञ्च तदन्यत् ।

"यादृशा धनिभिः कार्य्या व्यवहारेषु साक्षिणः।
तादृशान् संप्रवक्ष्यामि यथा वाच्यमृतञ्च तैः॥
गृहिणोऽपुत्रिणोमौलाः क्षत्रविट्शूद्रयोनयः।
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि॥
आप्ताः सर्व्वेषु वर्णेषु कार्य्याकार्य्येषु साक्षिणः।
सर्व्वधर्म्मविदोऽलुब्धान् विपरीतांश्च वर्ज्जयेत्॥

अथ कीदृशः साक्षिणोः वर्ज्जनीय इत्यत आह—

नार्थसम्बन्धिनोनाप्ता न सहाया न वैरिणः।
न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः॥
न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ।
न श्रोत्रियो न लिङ्गस्थोन सङ्गेभ्योविनिर्गतः॥
नाध्यधीनो न वक्तव्यो न दस्युर्नविकर्म्मकृत्।
न वृद्धो न शिशुर्नैकोनान्त्यो न विकलेन्द्रियः।
नार्त्तो न मत्तोनोन्मत्तो न क्षुत्तृष्णोपपीड़ितः॥
नश्रमार्त्तो न कामार्त्तो न क्रुद्धोनापि तस्करः।

साक्ष्यलक्षणमाह मनुः—

"समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिध्यति।
तत्र सत्यं ब्रुवन् साक्षी धर्म्मार्थाभ्यां न हीयते॥
साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्य्यसंसदि।
अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते॥
यत्रानिबद्धोऽपीक्षेत शृणुयाद्वापि किञ्चन।
पृष्टस्तत्रापि तद्ब्रूयाद्यथादृष्टं यथाश्रुतम्॥
एकोऽलुब्धस्तु साक्षीस्याद्बह्वः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्यैश्च या वृताः॥

(४) स व्यवहारः द्विलक्षणः, द्वे लक्षणे यस्य स द्विलक्

विवादे सोत्तरपणे द्वयोर्यस्तत्र हीयते ।
स एव हि पणं दाप्योविनयञ्च पराजये ॥ ५ ॥

रस्य लक्षणमस्यैव श्लोकस्यापरार्द्धेन निर्द्दिशति, यत्र पणः विलेखापूर्व्वको भवति, स सोत्तरः, लेखा लेखनं विशेषेण लेखा विलेखा तत्पूर्व्वकः पणो यत्र वादिसमीपतः प्रतिवादिनाएतत् द्रव्यं केनापि पणेन गृहीतमिति लिखितं भवेत्, तत्रैव व्यवहारस्य सोत्तरत्वं वर्त्तते, तत्रैव व्यवहारे प्रतिवादिन उत्तरं ग्राह्यं अन्यथा तु व्यवहारस्यानुत्तरत्वमेव । यदि पुनर्वाङ्मात्र एवानिवद्धाक्षरोवचनै र्जल्पित एव नाक्षरैर्निवद्धस्तदा स पणः कृतोऽपि अकृतवद्द्रष्टव्यः । इत्यर्थः अयञ्च व्यवहारः सपण इति कथ्यते ।

(५) सोत्तरपणे विवादे द्वयोः वादिप्रतिवादिनोर्मध्ये योहीयते, हीनोभवति यस्य पक्षो दुर्व्वलो भवति स एवहि पराजये पणं विनयञ्च दण्डञ्च, दाप्यः । व्यवहारे कृतं पणं अर्थिने, मिथ्याव्यवहारजनदण्डञ्च राज्ञे दाप्यः । यत्र पुनरेकः कोपावेशाद्यदा पणं कृत्वा न दद्यात् तत्र तस्मिन् सपणव्यवहारे हीनं पराजितं दण्डं राज्ञे अर्थिने च स्वीकृतं पणं दापयेद्राजेति शेषः ।

अवसरेऽस्मिन् व्यवहारगतं किमपि वक्तव्यमवशेषयामः । अर्थयत इतिः अर्थः साध्यं सोऽस्यास्तीति अर्थी, तस्य प्रतिपक्षः प्रत्यर्थी, अथ प्रत्यर्थिना आधर्षितोऽर्थी प्रथमं राज्ञः पुरतः प्रत्यर्थिकृतात्मधर्षणं निवेदयेत् । अथ राज्ञा सभायां समानीते प्रत्यर्थिनि तस्य पुरतः यथाप्रथममावेदितं तथैव लेखयेत । न पुनरन्यथा, तथात्वे अन्यथा-

तथाहि—"अन्यवादी क्रियाद्वेषी, नोपस्थाता निरुत्तरः।

प्रपलायी च हीनः पञ्चविधः स्मृतः इति वचनात् यः अन्यवादी आवेदनसमये किमपि ब्रवीति परतोलेखनादिसमये चान्यत्, यः क्रियाद्वेषी नियमप्रतिपालनपराङ्मुखः यः न उपस्थाता आवश्यकसमये राजसभायां नोपतिष्ठते, यः निरुत्तरः उपस्थितोऽपि राज्ञा पृष्टो न किमपि प्रतिवदति अथवा न प्रतिवक्तुं समर्थो भवति प्रपलायी च यश्च कार्य्यकाले दूरतरं प्रपलाय्य तिष्ठति एते पञ्चविधो[illegible]ना व्यवहारे पराजितोभवति। अत आवेदनसमये यथा आवेदन परतस्य तथैव ब्रूयात् लेखयेद्वा। तत्रावेद्यमानकार्य्यादन्य[illegible]णि वत्सरादीनि लेख्यानि तथाहि याज्ञवल्क्यः "समामास[illegible]दर्द्धाहर्नामजात्यादिचिह्नितम्, सम्वत्सरपक्षतिथिवारदिनार्थि[illegible]त्यर्थिनामब्राह्मणादिजात्यादिचिह्नितं आदिशब्देन द्रव्य[illegible] संख्यास्थानवेलाक्षणलिङ्गादीनि गृह्यन्ते एतानि सर्व्वाणि पूर्व्वकथितान्यकथितानि वा तत्र लेख्यानीत्यर्थः। स्थावरविवादेतु—

देशश्चैव तथा स्थानं सन्निवेशस्तथैव च।
जाति संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च॥
पितृपैतामहं चैव पूर्व्वराजानुकीर्त्तनम्।
स्थावरेषु विवादेषु दशैतानि निवेशयेत्॥

[illegible] सुविस्तृतभूविभाग आर्य्यावर्त्तं, मध्य वङ्ग पञ्चनद[illegible] स्थानं ग्रामनाम वाराणसी प्रभृति, सन्निवेशः विवाद[illegible]तस्थानस्य पूर्व्वादिदिग्भागावच्छिन्नगृहदेवादिः। जातिः [illegible]दिः संज्ञा देवदत्तादिः अधिवासः समीपदेशवासी जनः [illegible]) क्षेत्रनाम शालिक्षेत्र कुसुमक्षेत्र-

मेघदूतम् ।



अवतरणिका ।

मेघदूतं हि दृश्यश्रव्यभेदेन द्वैविध्यमापन्नेषु संस्कृतकाव्येषु श्रव्यकाव्यान्तर्गतम् । श्रव्यकाव्यानामपि पद्यं गद्यञ्च मिश्रञ्चेति त्रैविध्यमस्ति । तत्र पद्यं चतुष्पदीति वचनात् पद्यकाव्यमेवैतत् । ततश्च काव्य महाकाव्य, खण्डकाव्यतया त्रैविध्यमापन्नेषु पद्यकाव्येषु खण्डकाव्यमिदं, तल्लक्षणं यथा साहित्यदर्पणे—"खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च" काव्यस्य एकदेशानुसारि यत्किञ्चिल्लक्षणहीनं यत् काव्यं, तत् खण्डकाव्यम् इति तदर्थः । मल्लिनाथस्तु "अत्र नगनगरार्णववर्णना, सद्भावान्महाकाव्यत्व" मित्याह, तच्चिन्त्यमेव, महाकाव्यलक्षणघटकीभूत सर्गबन्धादिहीनत्वात् अथ किन्नाम काव्यमिति चेत् काव्यलक्षणमाह पुनस्तत्रैव ।

भाषा-विभाषा-नियमात् काव्यं सर्ग-समुज्झितम् ।
एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्ज्जितम् ॥

भाषा संस्कृतादिः, विभाषा अपभ्रंशादिः, तासां नियमात् नियमेनोपन्यासात् सन्धिरहितं सर्गसमुज्झितञ्च यत् तत् काव्यं भवति, तस्यैकदेशानुसारि यत् तत् खण्डकाव्यमिति निर्णयः । ततश्च खण्डकाव्ये भाषाविभाषानियमोनास्ति नापि सर्गबन्धः ।

मेघदूतं हि मन्दाक्रान्ताछन्दसारचितम् तल्लक्षणञ्चास्मत्प्रकाशिते श्रुतबोधे द्रष्टव्यं । अत्र नायको यक्षः स तु दिव्य एव ।

विषयः ।

कश्चित् कुबेरस्यानुचरो यक्षः* स्वाधिकारप्रमादात् भर्त्तुः कुबेरेण "वर्षमेकं यावदस्तं गतमहिमा स्वप्रणयिनीजनवियोगं भोक्ष्यसे" इति शप्तोदाक्षिणात्ये रामगिरिमाश्रित्योवास। स च शापो हरिशयनादुत्तरमेवाभवत्। ततश्चाष्टौ मासान् कथञ्चिदतिगमय्याषाढ़स्य प्रथमदिवसे तस्याचलस्य परितोमेघागममवलोक्य तस्य विरहाग्निः प्रदीप्तोबभूव। तेन च व्याकुलहृदयः स्वहृदयवल्लभाया अपि तादृशे समये तथाविधविरहबाधाः समुद्भावयन् तां सान्त्वयितुं कमपि दूतं प्रजिहीर्षुस्तस्मिन् महारण्यप्रदेशे कमपि स्वकार्य्यक्षमं चेतनपुरुषमपश्यन् तमेव दक्षिणपवनकृतोदकसञ्चारं व्याप्तदिगम्बरतलं महामेघराशिं दूतत्वेन परिकल्पयन् यथान्यायं समाहूय बहुविनयाञ्जलिरस्मै गमनमार्गनिर्द्देशपूर्व्वकं प्रियासमीपवक्तव्यं यावत्सन्देशजातमचीकथत्। अन्ते च शीघ्रमावयोः समागमो भविष्यतीति सान्त्वनवचनैः प्रियामाश्वासयितुमादिक्षत्।

मेघदूतस्य द्वौ भागौ वर्त्तेते। एकः पूर्व्वो द्वितीयश्चोत्तरः। तत्र पूर्व्वभागश्चतुःषष्टिश्लोकैः सम्पूर्ण उत्तरश्च षट्पञ्चाशच्छ्लोकैः। पूर्व्वभागे हि यक्षस्याश्रयीभूतरामगिरित आरभ्य कैलासपर्य्यन्तं व्योमस्य पथस्तत्रस्थितानां प्रसिद्धस्थानानाञ्च वर्णना कृता। वर्णनञ्च तथा

---

*विद्याधरोप्सरो यक्ष रक्षोगन्धर्व्वकिन्नराः पिशाचोगुह्यकः सिद्धो भूतोऽमीदेवयोनय इत्यमरकोषाद् यक्षोनाम कश्चिद्देवयोनिविशेषः। कुबेरश्च तेषां यक्षाणामधिपः। कुत्सितं वेरं शरीरमस्य स कुबेरः स च धनाधिष्ठातृदेव उत्तरदिगधिपश्च, तस्य कैलासपर्व्वते अलकानामप्रसिद्धा नगरी वर्त्तते, तत्र चैत्ररथं नाम परमरमणीयमुद्यानमस्ति। तस्य रथश्च पुष्पकनाम्ना प्रसिद्धः। स च विश्रव-

परिपाट्या कृतं यथा पाठसमये वर्णितस्थानानां शोभा प्रसभं हृदयमधिकरोतीव। उत्तरभागे तु यक्षस्य निजगृहं प्रियासौन्दर्य्यं-तस्मै वक्तव्यानि सन्देशवचनानि चोपवर्णितानि। अत्रापि कवि-त्वस्य चरमः समुत्कर्षो दर्शितः।

ग्रन्थकारः।

मेघदूतं महाकविकालिदासस्य कृतित्वेन प्रसिद्धम्। कालि-दासश्च उज्जयिनीनगराधीशमहाराजविक्रमादित्यसभाभूषणानां रत्नानामन्यतम आसीदिति प्रसिद्धिः। विक्रमादित्यस्य शासन काले च सम्वन्नाम्ना प्रसिद्धेऽपि कालिदासाश्रयीभूतस्य महाराजस्य विक्रमस्य शासनकाले पाश्चात्यपण्डितानां महान् विवादो दृश्यते। विल्सन्माक्ष्वमते स हि विक्रमादित्यो राजा प्राक् खृष्टजन्मनः चतुःपञ्चाशद्वर्षेभ्य ऊर्द्ध्वं विक्रमादित्यस्य शासनकाल आसीत्, लैसन्नामधेयः पण्डितः खृष्टीयतृतीयशताब्द्यां कालि-दासोबभूवेत्यकथयत्। वेवरनामधेयस्तु स्वप्रकाशितमालविका-ग्निमित्रे खृष्टीयद्वितीयचतुर्थशताब्द्योरन्तरे कालिदासः स्थित इत्यब्रवीत्, भाऊदाजीनामा पुनः खृष्टीयषष्ठशताब्द्यां कालिदा-सावस्थितिं निर्णिनाय। कालिदासो यदा भवतु मेघदूतन्तु तत्कृति-रेवेत्यत्र न कोऽपि सन्देहः, कालिदासकृतित्वेन प्रसिद्धेभ्योऽभिज्ञान-शकुन्तलप्रमुखग्रन्थेभ्यो मेघदूतस्य भाषाया ओजस्विताधिक्येऽपि तैः सहास्यैकग्रन्थकर्तृकत्वसूचकस्समानभावस्य समानाभिव्यञ्जकशब्द-साम्यमस्ति। विशेषतो विक्रमोर्वशीत्रोटके उर्वश्यन्तर्धानावसरे पुरूरवःपठितश्लोकाः मेघदूतमनुस्मारयन्ति। कालिदासस्यापरे ग्रन्थाः ऋतुसंहारं, रघुवंशम्, मालविकाग्निमित्रं, कुमारसम्भवं, अभिज्ञानशकुन्तलम्, विक्रमोर्व्वशि, शृङ्गारतिलकं, नलोदयं, प्रश्नो-त्तरमाला, हास्यार्णवं, श्रुतबोधः, इत्यादयः, अन्येऽपि ग्रन्थाः कालि-

মেঘদূতম্ ।

(পূর্ব্বমেঘঃ)

কশ্চিৎ কান্তাবিরহগুরুণা স্বাধিকারপ্রমত্তঃ ।
শাপেনাস্তংগমিতমহিমা বর্ষভোগ্যেণ ভর্ত্তুঃ ।
যক্ষশ্চক্রে জনকতনয়াস্নানপুণ্যোদকেষু
স্নিগ্ধচ্ছায়াতরুষু বসতিং রামগির্য্যাশ্রমেষু ॥ ১ ।

পূর্ব্বকালে কোন যক্ষ,
স্বকার্যে না রাখে লক্ষ্য,
ক্রোধে প্রভু শাপ দিল তায়,
"একবর্ষ সুদুঃসহ,
বিরহ যন্ত্রণা সহ,
ছাড়ি রহ আপন জায়ায় ।"
শুনি গৃহ তেয়াগিয়া,
যক্ষ রামগিরি গিয়া,
রহে তথা নির্ম্মিয়া ভবন
জনক নন্দিনী স্নানে,
পুণ্যজল যেই স্থানে,
চারি ধারে দেবদারুবন ॥

(১) আশীর্নমস্ক্রিয়া বস্তুনির্দ্দেশো বাপি তন্মুখমিতি শাস্ত্রাৎ কাব্যাদৌ বস্তুনির্দ্দেশাৎ কথাং প্রস্তৌতি ।

কশ্চিদিতি-স্বাধিকারপ্রমত্তঃ (স্বাধিকারাৎ স্বনিযোগাৎ, জুগুপ্সাবিরামপ্রমাদার্থানামুপসংখ্যানমিত্যপাদানে পঞ্চমী, প্রমত্তঃ

दैवापराधाद्धेतोः कान्ताविरहगुरुणा कान्ताविरहेण गुरुणा दुर्भ-
रेण दुःसहेनेति यावत्, वर्षभोग्येण (वर्षं संवत्सरं व्याप्य, कालाध्व-
नोरत्यन्तसंयोग इति द्वितीया. भोग्येन द्वितीयातत्, कुमति चोत्तर-
पदे इति णत्वं) भर्तुः (स्वामिनः) शापेन अस्तं गमितः (नाशं
प्रापितः) महिमा (सामर्थ्यं) यस्य सः एवंभूतः कश्चिद्यक्षः (देवयो-
निविशेषः) जनकतनयास्नानपुण्योदकेषु (जनकतनयायाः सीतायाः
स्नानैरवगाहनैः पुण्यानि पवित्राणि उदकानि येषु तेषु पावनेष्वि-
त्यर्थः) तथा-स्निग्धछाया (तरुषु छायाप्रधानास्तरवः शाकपार्थिवा-
दित्वात् समासः, स्निग्धाः (सान्द्राः) छायतरवः नमेरुवृक्षाः) येषु, तेषु
वसतियोग्येष्वित्यर्थः रामगिर्याश्रमेषु (रामगिरेश्चित्रकूटस्य आश्र-
मेषु) वसतियोग्येषु स्थानेष्वितरार्थः वसतिं (निवासं) चक्रे कृतवान्,
केनचित् प्रमत्तेन महिम्ना यक्षेण वसतिश्चक्रे इति वाच्यान्तरम्।
अस्तमिति मकारान्तमव्ययं तस्य द्वितीयेति योगविभागात्
समासः।

प्रमादोऽनवधानतेत्यमरः।

गुरुस्तु गीष्पतौ श्रेष्ठे, गुरौ, पितरि, निर्भरे इति विश्वः।

स्निग्धन्तु मसृणे, सान्द्रे इति शब्दार्णवः।

छायावृक्षो नमेरुः स्यादिति शब्दार्णवः।

आश्रमेष्विति बहुवचनेन नायकस्य नैकत्रावस्थितिस्तस्यो-
न्मादः सूचितः।

रामगिरिः। रामगिरि इत्यस्य रामपर्वत इत्यक्षरार्थः, स एव
पर्वतो यत्र वनवाससमये रामः प्रोवास। मल्लिनाथस्तु रामगि-
रीत्यस्य चित्रकूटेत्यर्थमकरोत्। रामोहि पितुराज्ञया वनं प्रस्थितः
प्रयागसमीपे गङ्गायमुनयोः सन्धौ महर्षेर्भरद्वाजस्याश्रमं जगाम।

"भगवन्नित आसन्नः पौरजानपदोजनः ।
सुदर्शमिह मां प्रेक्ष्य मन्येऽहमिममाश्रम् ॥
आगमिष्यन्ति वैदेहीं माञ्चापि प्रेक्षका जनाः ।
अनेन कारणेनाहमिह वासं न रोचये ॥
एकान्ते पश्य भगवन्नाश्रमस्थानमुत्तमम् ।
रमते यत्र वैदेही सुखार्हा जनकात्मजा ॥"

एतच्छ्रुत्वा भरद्वाजस्तमुवाच ।

दशक्रोश इतस्तातगिरिर्यस्मिन् निवत्स्यसि ।
महर्षिसेवितः पुण्यः पर्व्वतः शुभदर्शनः ॥
गोलाङ्गूलानुचरितो वानरर्क्षनिषेवितः ।
चित्रकूट इति ख्यातो गन्धमादनसन्निभः ॥
यावता चित्रकूटस्य नरः शृङ्गाण्यवेक्षते ।
कल्याणानि समाधत्ते न मोहे कुरुते मनः ।
ऋषयस्तत्र वहवोविहृत्य शरदां शतम् ।
तपसा दिवमारूढ़ाः कपालशिरसा सह ॥
प्रविविक्तमहं मन्ये तं वासं भवतः सुखम् ।
इह वा वनवासाय वस राम मया सह ॥

इति भरद्वाजवचः श्रुत्वा रामश्चित्रकूटमेवावासायाऽरोचयत् ।
चित्रकूटश्च तस्यातीव प्रियोवभूवेति वक्ष्यमाणश्लोकैः प्रतीयते—

दीर्घकालोषितस्तस्मिन् गिरौ गिरिवरप्रियः ।
वैदेह्याः प्रियमाकाङ्क्षन् स्वं च चित्तं विलोभयन् ॥
अथ दाशरथिश्चित्रं चित्रकूटमदर्शयत् ।
भार्य्याममरसङ्काशः शचीमिव पुरन्दरः ॥
नराज्यभ्रंशनं भद्रे न सुहृद्भिर्विनाभवः ।

यदीह शरदोऽनेकास्त्वया सार्द्धमनिन्दिते ।
लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधर्षति ॥
बहुपुष्पफले रम्ये नानाद्विजगणायुते ।
विचित्रशिखरेह्यस्मिन् रतवानस्मि भामिनि ॥
वैदेहि रमसे कच्चिच्चित्रकूटे मया सह ।
पश्यन्ती विविधान् भावान् मनोवाक्कायसम्मतान् ॥"

चित्रकूटसमीपे मन्दाकिनी नाम्नी काचिन्नदीचासीत् तथाहि रामायणम् ।

अथ शैलाद्विनिष्क्रम्य मैथिलीं कोसलेश्वरः ।
अदर्शयच्छुभजलां रम्यां मन्दाकिनीं नदीम् ॥
अब्रवीच्चवरारोहां चन्द्रचारुनिभाननाम् ।
विदेहराजस्य सुतां रामोराजीवलोचनः ॥
विचित्रपुलिनां रम्यां हंससारससेविताम् ।
कुसुमैरूपसम्पन्नां पश्य मन्दाकिनीं नदीम् ॥
दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ।
अधिकं पुरवासाच्च मन्ये तव च दर्शनात् ॥
नायोध्यायै न राज्याय स्पृहये च त्वया सह ॥

एवं स्थितेऽपि रामगिरिपदेनाऽत्रान्य एव पर्व्वतः कवेरभिप्रेत इत्यस्माकं प्रत्ययः। चित्रकुटे रामस्यवासोहि भरतागमन पर्य्यन्तमभत्। स च स्वल्प एव कालः। तादृशाल्पकालेनास्य रामनाम्ना प्रसिद्धो कथञ्चित् सम्भाव्यमानेऽपि ततः परिकल्पितमेघगमन पन्थास्तु न सम्यक् घटते। मेघस्य पथि विन्ध्याचल दर्शनं सम्भावितं, चित्रकूटोहि विन्ध्याचलस्यांश एव ततश्चतदसङ्गतं स्यात्। एवमन्यान्यपि स्थानानि सन्ति यानि चित्रकूटाद्दक्षिणानि विभाव्यन्ते।

जनकतनयास्नानपुण्योदका, एवमादिकारणकलापैरामगिरिश्चित्रकूटादन्य एव कश्चिदिति सम्भाव्यते।

रामोहि पञ्चवटोमिव चिरमध्युवास। तत्रापि रामाश्रम--समीपे गोदावरो नदी, बहवः पर्व्वताश्चासन्, तथाहि रामायणे --

"अयं देशः समः श्रीमान् पुष्पितैस्तरुभिर्वृतः।
इहाश्रमपदं रम्यं यथावत् कर्त्तुमर्हसि॥
इयमादित्यसङ्काशैः पद्मैः सुरभिगन्धिभिः।
अदूरे दृश्यते रम्या पद्मिनीपद्मशोभिता।
यथाख्यातमगस्त्येन मुनिना भावितात्मना।
इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता॥
हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता।
न चादूरं न चासन्ने मृगयूथनिपीड़िता॥
मयूरनादिता रम्याः प्रांशवोबहुकन्दराः।
दृश्यन्ते गिरयः सौम्याः फुल्लैस्तरुभिरावृताः॥"

रामाश्रमसन्निहितत्वात् प्रसिद्धप्राचीनाभिधेयाभावाच्चैतेषामपि पर्व्वतानां रामगिरिनाम्ना प्रसिद्धिः सम्भाव्यत एव।

विलसन् साहेबस्तु रामगिरिविषये यदवोचत तदयं लिख्यते-"रामस्य वनवाससमये प्रथमनिवासोहि बुण्डलखण्डस्थिते चित्रकूटपर्व्वते समभवत्। तद्धि स्थानमधुना कम्पत हेति प्रसिद्धमद्याप्येतत् पवित्रं तीर्थमिति कथ्यते। किमूरपर्व्वतश्रेण्यन्तर्गतः कोऽपि पर्व्वतस्तु दाक्षिणात्याभिमुखं प्रस्थिताय ससीतलक्ष्मणाय रामायाश्रयं ददाविति तत्रत्यानां प्रवादस्तेनाद्यापि तं प्रति सन्निहितग्रामवासिनां महानादरोवर्त्तते (See Capt. Blunt's journey from chunarghur to Yertanagoodum, Asiatic reseaches vii 60.) १८०६ खृष्टाब्दीय आसियाटिक आनुयाल रेजिष्टारनामपुस्तके मिरजापुरनाम

प्रियादिजनसङ्गतस्यापि चेतः चित्तम् अन्यथा भूता वृत्तिर्व्यापारो यस्य, तदन्यथावृत्ति भवति जड़तामापद्यते निर्व्यापारम्भवतीत्यर्थः । कण्ठाश्लेषप्रणयिनि कण्ठालिङ्गनार्थिनि जने दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति, किं पुनः विरहिणः किमुत वक्तव्यमित्यर्थः । विरहिणां मेघसन्दर्शनमुद्दीपनं भवतीति भावः । मेघादिदर्शने चित्तस्यौत्कण्ठा वर्द्धते तथाचाभिज्ञानशकुन्तले—रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्य्युत्सुको भवति यत् सुखितोऽपि जन्तुः ।

तच्चेतसा स्मरति नूनमबोधपूर्व्वं भावस्थिराणि जननान्तरसौहृदानि । अत्रार्थापत्त्यनुप्राणितोऽर्थान्तरन्यासोऽलङ्कारः । अर्थान्तरन्यासलक्षणं यथा ।

सामान्यं वा विशेषेण विशेषस्तेन वा यदि
कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ॥

अत्र विशेषस्य मेघालोके यद्दुःखानुभवस्य सामान्येन वैधर्म्येण सुखितादि तथाविधसमये दुःखानुभवेन समर्थनमित्यर्थान्तरन्यासः तस्य च सुखिनोऽपि यदा चित्तौत्कण्ठ्यं तदा विरहिणोऽवश्यं भवत्येवेत्यर्थापत्त्यनुप्राणनं, अर्थापत्तिलक्षणं च दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते इति ।

कौतुकञ्चाभिलाषे स्यादुत्सवे नर्म्महर्षयोरिति विश्वः ।

कथमपि—ज्ञान हेतुविवक्षायामप्यादि कथमव्ययम् । कथमादि तथाप्यन्तं (कथमपि) यत्न गौरववाढ्योरित्युज्ज्वलः । राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोरिति विश्वः ।

कौतुकाधानहेतोरित्यत्र केतकाधानहेतोरिति भरत, सनातन, रामनाथ, हरगोविन्द, कल्याणमल्लसम्मतः पाठः । अर्थस्तु केतकगर्भारोपणकारणस्य, केतकपुष्पगन्धो हि विरहिणामत्यन्त

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥४॥

শ্রাবণে বিরহবায়, বাঁচাইতে প্রেমদায়,
না হেরি উপায় কিছু আর,
বারতা কুশলময়, পাঠাইতে মনে লয়;
মেঘমুখে নিকটে তাহার।
নূতন কুরচি ফুলে, রচি অর্ঘ্য দেয় তুলে,
মেঘশিরে মুখে মৃদুহাসি,
প্রেমভরে পুলকিত জিজ্ঞাসে স্বাগত হিত
তুষি চিত, মধুর সম্ভাষি।

अथ समाहितान्तःकरणः सन् किं कृतवानित्याह प्रत्यासन्न-इति। यो यक्षश्चिरं दध्यौ स इत्यर्थः। नभसि श्रावणे प्रत्या-सन्ने आषाढस्यानन्तरं सन्निकृष्टे प्राप्ते सतीत्यर्थः। दयिताजीवि-तालम्बनार्थी सन् वर्षाकालस्य विरहदुःखजनकत्वात्तदुत्तरकार्यप्रती-कारादनर्थोत्पत्तिप्रतिबन्ध एव वरमिति न्यायेन प्रागेव प्रियाप्राण-धारणोपायं चिकीर्षुरित्यर्थः। जीवनस्योदकस्य मूतः पटबन्धो बन्धनं जीमूतः। पृषोदरादित्वात् साधुरिति। तेन जीमूतेन जलधरेण प्रयोज्येन स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्त्ताम् हारयिष्यन् प्रापयिष्यन्। लृट् शेषे चेति चकारात् क्रियार्थक्रियो

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।

भावः। [illegible] कर्म्मसंज्ञायाविकल्पात् पक्षे कर्त्तरि तृतीया। प्रत्यग्रैर्नवैः कुटजकुसुमैर्गिरिमल्लिकाभिः, कल्पितार्घाय कल्पितोऽनुष्ठितोऽर्घः पूजाविधिर्येन तस्मै, जीमूताय, क्रिया ग्रहणमपि कर्त्तव्यमिति सम्प्रदानत्वाच्चतुर्थी। प्रीतिप्रमुखानि प्रीतिपूर्व्वकाणि वचनानि यस्मिन् कर्म्मणि तत्प्रीतिप्रमुखवचनं यथा तथा शोभनमागतं स्वागतं वचनं प्रीतः सन् व्याजहार कुशलागमनं पप्रच्छेत्यर्थः।

नभः श्रावणिकश्च स इत्यमरः।

मूतः स्यात् पटवन्धेऽपीति रुद्रः।

वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः।

कुटजो गिरिमल्लिकेति हलायुधः।

मूल्ये पूजाविधावर्घ इत्यमरः।

[illegible] दयिताजी[illegible]र्थीमिति भरत, सनातन, रामनाथ सम्मतः पाठः। एतस्मिन् प्रवृत्ति-[illegible]। [illegible] दयितायाः प्रियायाः जीवितस्य प्राण-धारणस्य [illegible] स्थैर्य्यमिति यावत् तदेव अर्थः प्रयो-जनं [illegible]। दयिताजीविताल्बनार्थमिति हरगोविन्द [illegible] पाठः एतस्मिन् [illegible] क्रियाविशेषण

ইত্যৌৎসুক্যাদপরিগণয়ন্ গুহ্যকস্তং যয়াচে
কামার্ত্তা হি প্রকৃতিকৃপণাশ্চেতনাচেতনেষু ॥৫॥

ধূম, জ্যোতি, জলে আর, পবনে জনম যার,
কোথা সেই জড় জল ধর,
কোথা বা কুশল বাণী, লয়ে যায় সেই প্রাণী,
ইন্দ্রিয় যাহার পটুতর।
বিরহে কাতর যক্ষ, না করি এসব লক্ষ্য,
দৌত্য ভিক্ষা জলদে জানায়,
বিরহে আতুর মনে, অচেতনে সচেতন,
ভেদাভেদ বুঝা নাহি যায়।

ননু চেতনসাধ্যমর্থং কথমচেতনেন কারয়িতুং প্রবৃত্ত ইত্যপেক্ষায়াং কবিঃ সমাধত্তে ধূমেতি। ধূমশ্চ জ্যোতিশ্চ সলিলঞ্চ মরুদ্বায়ুশ্চ তেষাং সন্নিপাতঃ সঙ্ঘাতো মেঘঃ ক্ব অচেতনত্বাৎসন্দেশানর্হ ইত্যর্থঃ। পটুকরণৈঃ সমর্থেন্দ্রিয়ৈঃ। প্রাপণীয়াঃ প্রাপয়িতব্যাঃ সন্দিশ্যন্ত ইতি সন্দেশাস্ত এবার্থাঃ ক্ব ইত্যেবমৌৎসুক্যাদিষ্টার্থোদ্যুক্তত্বাৎ অপরিগণয়ন্ অবিচারয়ন্ দ্বয়মত্যন্তাসম্ভাবনায়াং তথাচ চেতন প্রাণিপ্রাপয়িতব্যাঃ সন্দেশার্থা অচেতনেন মেঘেন কথমপি নেতুং ন সম্ভাব্যন্ত ইতি অবিচারয়ন্নিত্যর্থ গুহ্যকো যক্ষস্তং মেঘং যয়াচে যাচিতবান্ প্রার্থয়ামাস। তথাহি কামার্ত্তাঃ মদনাতুরাশ্চেতনা অচেতনাশ্চ তেষু বিষয়ে প্রকৃতিকৃপণাঃ স্বভাবদীনাঃ কামান্ধানাং যুক্তাযুক্তবিবেকশূন্যত্বাদচেতনযাচ্ঞা ন বিরুদ্ধেত্যর্থঃ। অত্র মেঘসন্দেশয়োর্বিরূপয়োর্ঘটনাদ্বিষমালঙ্কারঃ। তদুক্তং বিরুদ্ধকার্য্যস্যোৎপত্তির্যত্রানর্থস্য বা ভবেৎ। বিরূপঘটনা চাসৌ বিষমালঙ্কৃতিস্ত্রিধা। সা চার্থান্তরন্যাসানুপ্রাণিতা তৎসমর্থকত্বে-

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाऽधमे लब्धकामा ॥६॥

পুষ্পক ও আবর্ত্তক, যেই বংশ প্রবর্ত্তক
ভুবনে বিদিত যাহা হয়।
সেই বংশে জন্ম লও, ইন্দ্রের প্রণিধি হও
ধর রূপ যে-বা মনে লয় ॥
জানি সব এনু তাই, ভিক্ষা কিছু মাগি ভাই,
ভাগ্যে প্রিয়া দূরদেশে আজ।
গুণীর নিকটে চাই, নাপেলেও ক্ষতি নাই,
পেলেও অধমে নাহি কায। ৬

प्राणी तु चेतनो जन्मीत्यमरः। उत्सुक—इष्टार्थोद्युक्त उत्सुक इत्यमरः।

अर्घस्योपकरणद्रव्याणि यथा देवीपुराणे "आपः क्षीरं कुशाग्राणि दधिसर्पिश्च तण्डुलाः। यवाः सिद्धार्थकं चैव अष्टाङ्गार्घं प्रकीर्त्तितम्।" अन्यत्र त्वन्यविधानि दृश्यन्ते—यथा "रक्त बिल्वाक्षतैः पुष्पैर्दधि दूर्व्वा कुशैस्तिलैः सामान्यः सर्व्वदेवानामर्घोऽयं परिकीर्त्तितः॥" अथैतेषामभावे तु विकल्पविधिर्यथा—"अभावे दधि दूर्व्वादिमात्रं वा प्रकल्पयेत्" इति ॥ ५ ॥

सम्प्रति याच्ञाप्रकारमाह जातमिति। हे मेघ! त्वां भुवनेषु विदिते भुवनविदिते। निष्ठेति भूतार्थे क्तः गतिबुद्ध्यादिना वर्त्त-

सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।

मात्समासो न स्यात् क्तेन च पूजायामिति निषेधात्। पुष्करावर्त्तकाश्च केचिन्मेघानां श्रेष्ठास्तेषां वंशे जातं महाकुलप्रसूतमित्यर्थः। कामरूपमिच्छाधीनविग्रहं दुर्गादिसञ्चारक्षममित्यर्थः। मघोनः इन्द्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि। तेन महाकुलप्रसूतत्वादिगुणयोगित्वेन हेतुना विधिवशाद्दैवायत्तत्वात्, दूरे बन्धुर्यस्य स दूरबन्धुः वियुक्तभार्य्योऽहं त्वय्यर्थित्वं गतः। ननु याचकस्य याच्ञायां याच्यगुणोत्कर्षः क्वोपयुज्यत इत्याशङ्क्य दैवाद्याच्ञाभङ्गेऽपि लाघवदोषाभावएवोपयोगइत्याह याच्ञेति। अधिगुणेऽधिककुणे पुंसि विषये याच्ञा मोघा निष्फलापि वरमीषत्प्रियं गुणाढ्यत्वात्प्रियत्वं याच्ञावैफल्यादोषत्प्रियत्वमिति भावः। अधमे निर्गुणे याच्ञा लब्धकामाऽपि सफलापि न वरमीषत्प्रियमपि न भवतीत्यर्थः। अर्थान्तरन्यासानुप्राणितः प्रेयोऽलङ्कारः। तदुक्तं दण्डिना। प्रेयः प्रियतराख्यानमिति। एतदाद्यपादत्रये चतुर्थपादस्थेनार्थान्तरन्यासेनोपजीवितमिति सुव्यक्तमेतत्॥

विधिर्विधाने दैवे चेत्यमरः। वरः देवाद्, ते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रिये इत्यमरः।

वंशभागे वंशमिक्षुप्रभेदयोरिति विश्वः।

पुष्करावर्त्तकः—पुष्कराश्च आवर्त्तकाश्च केचिन्मेघानां श्रेष्ठा इति मल्लिनाथोक्त्या पुष्करावर्त्तकानां भिन्नत्वं लक्ष्यते अन्यत्राऽपि तेषां भेदो दृश्यते पुराणसर्व्वस्वे तु तेषामैक्यं व्युत्पादितं, यथा

"पुष्करा नाम ते मेघाबृहतस्तोयमत्सराः।

गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्म्या ॥ ৭

সন্তপ্ত মানব চয়, তোমারে শরণ লয়
তাই বলি জলদ তোমায়।
ধন পতি ক্রোধভরে, বসি দুঃখে দেশান্তরে
সাধ কিছু জানাতে প্রিয়ায় ॥
ওহে নব জলধর, তুমি সে বারতা হর,
যাও যক্ষপুরী অলকায়।
সৌধ যার ধবলিত, বাহির উদ্যানস্থিত
শিবশিরোদ্গত চন্দ্রিকায় ॥ ৭

मरः। अनेन व्यावर्त्तकत्वमुक्तम्। अलका नाम अलकेति-प्रसिद्धा यक्षेश्वराणां वसतिः स्थानं ते तव गन्तव्या त्वया गन्तव्ये-त्यर्थः। क्तप्रत्ययानां कर्त्तरि षष्ठी ॥

सन्तप्तानामिति। हे पयोद! त्वं सन्तप्तानाम् आतपेन वा प्रवासविरहेण वा संज्वरितानाम्, शरणं पयोदानेनातपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोऽसि। तत्तस्मात्का-रणाद्धनपतेः कुवेरस्य क्रोधेन विश्लेषितस्य प्रियया वियोजितस्य मे मम सन्देशं वार्त्तां प्रियायाः हर, प्रियां प्रति नयेत्यर्थः। सम्बन्धसामान्ये षष्ठी। सन्देशहरणेनास्मयोः सन्तापं नुदेत्यर्थः। कुत्र स्थाने सा स्थिता तत् स्थानं वा कस्य तत्राह गन्तव्येति। वहिर्भवं वाह्यम्, वहिर्देवपञ्चजनेभ्यश्चेत्यण्। वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया धौतानि निर्म्मलानि हर्म्याणि

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८

তোমায় আকাশে হেরি, মনে করি নাহি দেরি,
পতি লাভ হইবে আবার।
বিরহিণী নারীগণ, দেখিবে তোমায় ঘন,
সরাইয়া অলকার ভার।
বিরহ-বিধুর-প্রিয়া রহে কেবা তেয়াগিয়া
নিরখিয়া উদয় তোমার।
না হলে আমার মত নির্ব্বাসিত ভাগ্য হত
পরাধীন জীবন তাহার॥

सन्तापः संज्वर इत्यमरः।
शरणं गृहरक्षित्रोरित्यमरः ॥ ७

मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनरूपानुषङ्गिकं फल-मित्याह त्वामिति। पवनपदवीमाकाशमारूढं त्वां पन्थानं गच्छन्ति ते पथिकाः, पथः ष्कन्निति ष्कन्प्रत्ययः, तेषां वनिताः प्रोषितभर्तृकाः प्रत्ययात्प्रियागमनविश्वासात् आश्वसत्यो विश्वस्ताः। श्वसिधातोः शतन्तादुगितश्चेति ङीप् तथोद्गृहीतालकान्ताः दृष्टिप्रसा-रार्थमुन्नमय्य धृतालकाग्राः सत्यः प्रेक्षिष्यन्ते अनुत्कटतया द्रक्ष्यन्तीत्यर्थः। तथाहि त्वयि सन्नद्धे व्यापृते सति विरहेण विधुरां विवशां जायां क उपेक्षेत न कोपीत्यर्थः अन्योपि मद्व्यतिरिक्तोपि यो जनोऽहमिव पराधीनवृत्तिः परायत्तजीवको न स्यात् स्वतन्त्रस्तु न

মন্দং মন্দং নুদতি পবনশ্চানুকূলো যথা ত্বাং
বামশ্চায়ং নদতি মধুরং চাতকস্তে সগন্ধঃ।
গর্ভাধানক্ষণপরিচয়ান্নূনমাবদ্ধমালাঃ
সেবিষ্যন্তে নয়নসুভগং খে ভবন্তং বলাকাঃ ॥৯॥

অতি মৃদু মৃদুভাবে, তোমায় লইয়া যাবে,
সমীরণ হয়ে অনুকূল।
আনন্দে গরবভরে, গাইবে মধুর স্বরে,
বামভাগে, চাতকের কুল।
গর্ভাধান মহোৎসব, মনে করি অনুভব,
দলে দলে মালার মতন।
আকাশে তোমার সঙ্গে, খেলিবে বলাকা রঙ্গে,
পেয়ে তোমা নয়ন রঞ্জন।

[illegible] বিপ্রলম্ভজীবী, কঃ সন্নদ্ধে ত্বয়ি [illegible] উপেক্ষণং প্রতিপরাধীনবৃত্তের্হেতুত্ব-কথনাৎ। ৮।

নিমিত্তান্যপি [illegible] মন্দং মন্দমিতি। অনুকূলঃ পবনো [illegible] অত্র [illegible]-ন্নিবীপ্সায়ামিব [illegible] তু কর্মধারয়বদ্ভাবে সুব্লুকি [illegible] মন্দং মন্দমিত্যাবাপ্রকারার্থে দ্বির্ভাব [illegible]। যথা [illegible]-

कश्चित्। ते तव वामो वामभागस्थः चातकः पक्षिविशेषश्च मधुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयं वर्त्तते वर्त्तिष्यति चापरं निमित्तमित्याह। गर्भेति। गर्भः कुक्षिस्थोजन्तुः। तस्या-धानमुत्पादनं तदेव क्षण उत्सवः सुखहेतुत्वादिति भावः। तस्मिन् परिचयादभ्यासाद्धेतोः खे व्योम्नि आबद्धमालाः गर्भाधानसुखार्थं रचितश्रेणयः [illegible] इत्यर्थः। उक्तञ्च कर्णोदये। गर्भं बलाकाद-धतेऽभ्रयोगान्नाके निबद्धमालयाः समुन्नतादिति। बलाकाः बलाका-ङ्गनाः नयनसुभगं दृष्टिप्रियं भवन्तं नूनं सत्यं सेविष्यन्ते। अनुकूल-मारुतवामचातकगर्जितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं विस्तरभयान्नालेखि।

यथा सादृश्ययोग्यत्ववीप्सा स्वार्थानतिक्रमे इति यादवः।
गन्धो गन्धक आमोदे लेशे सम्बन्ध सर्व्वयोरिति विश्वः।
वामस्तु वक्रे रम्ये स्यात् सव्ये वामगतेऽपि चेति शब्दार्णवः।
निर्व्यापारस्थितौ कालविशेषोत्सवयोःक्षण इत्यमरः।

चातकस्ते सगन्धः इत्यत्र चातकस्ते सगर्व्व इति भरतसनातन रामनाथहरगोविन्दसम्मतपाठः चातकस्तोयगृध्नुः। तोयगृध्नुः जलाभिलाषी। इति कल्याणमल्लधृत पाठः।

गर्भाधानक्षणपरिचयादित्यत्र गर्भाधानक्षमपरिचयम् इति भरतसनातनरामनाथहरगोविन्दसम्मतः पाठः गर्भस्य आधाने आरो-पणे क्षमः समर्थः परिचयः सम्बन्धो यस्य तादृशम्।

गर्भाधानस्थिरपरिचयम्। इति पाठान्तरम्।

मल्लिनाथमते श्लोकेऽस्मिन्-अनुकूलपवनस्य मन्दवहनं, वाम-भागस्थचातकस्य मधुरनदनं, भवतानाञ्च बलाकानां सेवनमिति त्री-ण्येव शुभसूचकानि। अन्ये तु वस्तुतस्तु आद्यं द्वयं निमित्तं, तृतीयं

नाङ्गानिष्यं दिवसगणनातत्परामेकपत्नी
मव्यापन्नामविहतगति र्द्रक्ष्यसि भ्रातृजायाम् ।
आशावन्धः कुसुमसदृशं प्रायशोह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥

না হবে বিফল গতি, তব ভ্রাতৃবধূ সতী,
অবশ্য হেরিবে সেই স্থানে ।
বিরহে মলিন ক্ষীণ, একে একে গণে দিন,
আশায় বাঁচিয়া আছে প্রাণে ॥
রমণীর প্রেমাকুল, হৃদয় কুসুমতুল,
শুকাইয়া বিরহে যখন ।
খসিয়া পড়িতে যায়, অমনি তখনি তায়,
আশাবৃন্ত করয়ে ধারণ ॥

चातको वामभागवर्त्ती सन् मधुरं नदति अतस्तर्कयामि वलाका बद्धपङ्क्तयोनयनसुभगं भवन्तं सेविष्यन्ते, भवांश्चेदलकां गन्ता, न केवलं मनोदकारी भवतोऽपि वलाकारूपनायिकासम्भोगः सम्पत्स्यते इति तेषां भावः। पूर्व्वोक्तेन शुभसूचकनिमित्तद्वयेन परार्द्धगतं वलाकासङ्गलाभरूपं शुभफलन्ते सद्यएवफलिष्यतीति प्ररोचनार्थमुक्तम्। अतएव गर्भाधानक्षणपरिचयादित्यपेक्षया गर्भाधानक्षम परिचयमितिपाठः समीचीनः। चातकानां वामतोऽवस्थानस्य शुभसूचकत्वं यथा।

वर्हिणश्चातकाश्चाषा ये च पुंसञ्ज्ञिताः खगाः ।

ऋतुसंहारेऽप्येतस्यानुरूपः श्लोकोऽस्ति ।

> कृपाकुलैश्चातकपक्षिणां कुलैः
> प्रयाचितास्तोयभरावलम्बिनः ।
> प्रयान्ति मन्दं नववारिधारिणो
> बलाहकाः श्रोत्रमनोहरस्वनाः ॥९॥

न च तस्यानाशात् व्रतस्खलनाद्वा निरर्थकस्त्वत्प्रयास इत्याह ताञ्चेति । हे मेघ दिवसानामवशिष्टदिनानां गणनाय संख्याने तत्परामासक्ताम् । अतएवाव्यापन्नाम् अमृतां शापावसाने मदागमनप्रत्याशया जीवन्तीमित्यर्थः । एकः पतिर्यस्याः सा एकपत्नी तां पतिव्रतामित्यर्थः । नित्यं सपत्न्यादिष्विति ङीप् नकारश्च । भ्रातुर्जायां भ्रातृजायां निःशङ्कं दर्शनीयामित्याशयः । तां सन्निपात अविहतगतिः सफलगतिः सन्नवश्यं द्रक्ष्यसि च आलोकयिष्यसे एव । तथाहि आशा अति तृष्णा । बध्यतेऽनेनेति बन्धोबन्धनं वृन्तमिति यावत् आशैव बन्धः आशाबन्धः कर्त्ता प्रणयि प्रेमयुक्तम् अतएव कुसुमसदृशं सुकुमारमित्यर्थः । अतएव विप्रयोगे विरहे सद्यःपाति सद्योभ्रंशनशीलम् अङ्गनानां हृदयं जीवितं हृदयं जीविते चित्ते इति शब्दार्णवः । प्रायशः प्रायेण रुणद्धि प्रतिबध्नातीत्यर्थान्तरन्यासः ॥

एतस्य श्लोकस्योपरि महामहोपाध्यायपण्डितश्रीमदीश्वरचन्द्र विद्यासागरेणैवं लिखितम्—

सप्तमे श्लोके सन्देशहरणार्थमलकागमनं याचित्वा अष्टमे विरहिणीसमाश्वासनरूपमानुषङ्गिकं फलं नवमे बहुनायिकासम्भोग सुखसमवायः एकादशे च सहायसम्पत्तिः सन्दर्शिता यथा पथिकवनिताः पवनपदवीमारूढं त्वां प्रेक्षिष्यन्ते बलाकाश्च बद्धपङ्क्तयो भवन्तं सेविष्यन्ते राजहंसा आकैलासाद्भवतः सहायाः सम्पतिष्यन्ते

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं **गर्जितं** मानसोत्काः
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः **सहायाः** ॥११

তব যে মধুর রবে, কন্দলী ফুটিলে, তবে-
ফলবতী বসুমতী হয়।
সে রব শুনিয়া কাণে, মানসসরসী পানে,
যেতে চাবে রাজহংসচয় ॥
মৃণালের কিসলয়ে, চঞ্চুপুটে তুলে লয়ে,
করি তাহে পথের সম্বল।
কৈলাস অবধি পথ, হবে তব অনুগত,
শোভাকরে আকাশ মণ্ডল ॥

त्वत्प्रिया मृता पातिव्रत्यस्खलिता वा स्यात् तर्हि निरर्थको मम गमनप्रयास इत्याशङ्कां परिहरन् मेघं प्रोत्साहयति ताञ्चावश्यमि-त्यादिना दशमेन। अतो दशमस्य श्लोकस्य एकादशस्थाने एकादशस्य दशमस्थाने सन्निवेशो युज्यते नवमैकादशयोर्मध्ये दशमस्य सन्निवे-शस्तु प्रामादिक एव। इति एतत्तु नास्मभ्यं रोचते। तथा सति दशमे भ्रातृजाया इत्यस्य न तादृशं सार्थक्यं स्यात्। यथास्थिते तु तस्य सार्थक्यं यथा एवं बलाकासम्बन्धेन प्रवृद्धभोगप्रवृत्ते स्तस्य मेघस्य यदि तां यत्नप्रेयसीं दृष्ट्वा काऽपि कुप्रवृत्तिरुदियात् ततस्तन्निवार-णाय भ्रातृजायेति कथनं एतेनात्मीयसम्बन्धस्तवानुपभोग्या च

स्यानौचितंत्र तदा पथ प्रसङ्गादनन्तरमेव तदुल्लेखस्य सङ्गतिः स्यात्, ततश्च पूर्व्वमेघस्य शेषभागएवाऽस्य (दशमश्लोकस्य) सन्निवेश उचितः नत्वेकादशस्थाने। वस्तुतस्तु, सप्तमादारभ्य दशम पर्य्यन्तेषु श्लोकेषु मेघेन तत्राऽवश्यं गन्तव्यमिति सूचयित्वा विस्तृतमार्गवर्ण-नस्य सङ्गत्यर्थमेकादशस्यावतरणमिति सर्व्वमवदातम् ॥ १० ॥

सम्प्रति सहायसम्पत्तिश्चास्तीत्याह कर्त्तुमिति। यद्गर्ज्जितं कर्त्तुं महीमुच्छिलीन्ध्रामुद्भूतकन्दलिकाम्। अतएव अवन्ध्यां सफलां कर्त्तुं प्रभवति शक्नोति शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः। तदुक्तं निमित्तनिदाने। कालाभ्रयोगादुदिताः शिलीन्ध्राः सम्पन्नशस्यां कथयन्ति धात्रीमिति। तत् श्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः। ते तव गर्ज्जितं श्रुत्वा मानसोत्काः मानसे सरसि उन्मनसः उत्सुका इति यावत्। उत्क उन्मना इति निपातात्साधु। कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छ-न्तीति प्रसिद्धिः। विसकिसलयानां मृणालाग्राणां छेदैः शकलैः पाथेयवन्तः पथि साधु पाथेयं पथि भोज्यम्। पथ्यतिथिवसतिस्वपे-र्ढञ्। तद्वन्तः मृणालकन्दशकलसम्बलवन्त इत्यर्थः। राजहंसा हंसविशेषाः। नभसि व्योम्नि भवतस्तव आ कैलासात् कैलास-पर्य्यन्तं पदद्वयञ्चैतत्, सहायाः सयात्राः। सम्पत्स्यन्ते सम्भविष्यन्ति कन्दल्याञ्च शिलीन्ध्रा स्यादिति शब्दार्णवः। राजहंसास्तु ते चञ्चु-चरणैर्लोहितैः सिता इत्यमरः।

सहायस्तु सयात्रा स्यादिति शब्दार्णवः। उच्छिलीन्ध्रा मव-न्ध्यामित्यत्र उच्छिलीन्ध्रातपत्रामिति भरतरामनाथहरगोविन्द-कल्याणमल्लधृत पाठः अर्थस्तु उद्गतानि शिलीन्ध्राणि भूमिस्फोटाएव आतपत्राणि यस्यां सा तथा ताम्।

मेघदूतम्

A few words on H. H. Wilsons translation.

मेघदूत टीकायां विलसन्महोदयकृतस्य मेघदूताङ्गरेजीभाषानुवादस्यापि समालोचनं कर्त्तव्यं, तेन हि ग्रन्थस्य सम्पूर्णता, यूरोपीयपण्डितानां संस्कृताभिज्ञता च व्यक्तीभूय पाठकानां सुमहद्धितं सम्भविष्यतीति कैश्चित् सहृदयबन्धुभिः समनुरुद्धा वयमष्टमनवमदशमैकादशश्लोकानां विलसन्महोदयकृतानुवादस्यालोचनं कुर्म्मः ।

विलसन्महोदयेन पद्यैरेव मेघदूतस्यानुवादः कृतः। ततश्च तत्कृतीरचयितुः काव्याभिज्ञजनैर्मुक्तकण्ठमाविष्कृत्य सर्व्वजनप्रशंसार्हत्वमापादयतीत्यत्र न कश्चित् सन्देहः। किञ्च सहनीयाश्च छन्दोनुरोधजनितकादाचित्काधिकन्यूनपदत्वाद्यपरिहार्य्यदोषाः। किन्तु तेन यत् बहुशो मूलश्लोकानां क्रममर्थांश्चान्यथाकृत्वाऽनुवादः कृत एतदेवाऽस्मान् सुभृशं दुःखाकरोति। दृश्यतां तावत् सप्तमश्लोकस्यानुवादानन्तरं तस्यानुवादः।

"There shalt thou find the partner of my woes.
True to her faith, and stranger to repose;
Her task to weep our destiny severe,
And count the moments of the lingering year;
A painful life she leads, but still she lives,
while hope its aid invigorating gives;

Are firm, when closed by hope's investing power.
Still, as thou mountest on thine airy flight,
Shall widowed wives behold thee with delight,
with eager gaze, long locks drawn apart,
Whilst hope re-animates each droping heart:
Nor less shall husbands as thy course they trace,
Expect at hand a faithful wife's embrace;
Unless, like me in servitude they bend,
And on another's lordly will depend.
The gentle breeze shall fan thy stately way,
In sportive wreathes the cranes around thee play;
Pleased on thy left the chataka along
Pursue thy path and cheer it with his song;
And when thy thunders sooth the porchihg earth,
And showers, expected raise her mushroom birth.
The swans for mount Kailasa shall prepare,
And track thy course attendant through the air.

अत्र प्रथमं दशमश्लोकस्यानुवादोवर्त्तते, ततः परमष्टमस्य, ततश्च नवमैकादशयोः। एवं कृते मूलानुवादयोः परस्परं सत्यपि महति व्युत्क्रमे अनुवादोऽयं पण्डितप्रवरस्य श्रीमतोविद्यासागर महोदयस्याभीप्सितमूलपाठव्यतिक्रमादधिकां प्रसङ्गसङ्गतिमावहति, यतस्त्वयाऽलका गन्तव्या इत्यतः परं तत्र प्रियादर्शनस्यावश्य

गमनमार्गनिर्देशस्य हि तादृशमार्गप्रसङ्गावतरणान्तरा प्रियादर्शन निश्चयापेक्षया रुचिरतरत्वमिति व्यतिक्रमश्चेत् कार्य्यस्तदानयैव-रीत्या नतु तथा दशमैकादशयोः। भवत्विदानीमनुवादस्य प्राक्त-तानुसारित्वं विचार्य्यते।

अनुवादो नाम भाषान्तरशब्दानां भाषान्तरैर्यथावदर्थप्रका-शनं न तु [illegible]। विल्सनमहोदयकृतानुवादस्त्वे तद्विपरीतस्तन्न [illegible]श्चेति प्रदर्शनार्थं वयमत्र तत्तच्छ्लोकानां [illegible] यथार्थमनुवादं प्रदर्शयामः। तदवलोक्यैव सहृदयैः कृतानुवादयोरन्तरं विदितं स्यादिति।

(OUR OWN TRANSLATION)

Your going to Alaka would not be fruitless, for you would find there your brother's wife (my wife,) true to her faith, counting the remaining days (of our separation), for hope like the stam of a flower supports the hearts of females which flower like are prone to drop down in the time of separation.

And when you are on your air flight, the wives expecting their absentee lords return home, shall behold you with eager gaze drawing their long locks apart, for there is no man so unfortunate as in this season of yours shall willinghy stay away from his faithfull wife unless like myself he depends on anothers lordly will.

The favourable breze shall carry yau gentley, On

pride. And the she cranes knowing you to be the joyous cause of their delecate state shall stred themselves in the form of a wreath and play with you along your path in the sky.

On hearing your sweet gentle rumble, which causes the Shilindra to spring forth and the earth to fructify, the geese, anxious to take aboard in the lake Manasa, shall acconpany you to kailasa having in their teeth fragments of the new leaves of lotus which serve as food during their long flight.

अनेनानुवादेन विलसन् कृतानुवादस्य तुलनयैव सर्व्वमवदातं भविष्यति, सत्यं गद्यानुवादो यथा मूलानुसारी भवति न तथा पद्यानुवादः; पद्यानुवादे हि छन्दःप्रतिपालनाय क्वचित् केषांचिद- [illegible] भवति क्वचिदपि मूले वर्त्त- [illegible] क्रियते। एवं करणेऽपि यदि मौलिकार्थस्या परिवर्त्तं न भवेत् तदा न दोषः मौलिकार्थस्यान्यथा करणन्तु दोष एव। यथा विलसनसाहेबेन [illegible] ताश्चावश्यमित्यादिश्लोके "and stranger to repose" नैति निद्रां कदाचित्, Her *task* to weep our destiny severe रोदितैव नियतमिह सा प्राप्य भाग्यं कठोरम् इत्यादीन्यधिकपदानि मूलस्य प्राकृतार्थबोधं स्थगयन्त्यपि न तथा दूषणमावहन्ति, यथा but still she lives while hope its aid invigorating gives अद्याप्येषा आशया [illegible] हस्तावलम्बा जीवतीत्यादि मूलस्यान्यथा करणं दोषमुत्पादयति। एवं च तामारूढमित्यादिश्लोके 'पथिकवनिता' इत्यस्य विधववनिताः (widowed wives) इत्यनुवादः कृतः अत्रैकस्य पदस्य

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो बाष्पमुष्णम् ॥१२॥

চির বিরহের পর, লভি তোমা জলধর
উষ্ণ বাষ্প করি বিমোচন ।
সময়ে সময়ে যেহ, তোমাতে আপন স্নেহ,
লোক মাঝে করয়ে সূচন ॥
মানবের পূজ্য অতি, বিরাজিছে রঘুপতি,
পদপাঁতি যার মেখলায় ।
সেই এই নগবরে, তব প্রিয় সহচরে,
আলিঙ্গিয়া মাঙ্গহ বিদায় ॥ ১২

आपृच्छस्वेति । प्रियं सखायं प्रियसखं राजाहःसखिभ्यष्टजिति टच् समासान्तः । तुङ्गमुन्नतं पुंसां वन्द्यैः नराराधनीयैर्रघुपतिपदैरामपादन्यासैर्मेखलासु कटकेषु, अङ्कितं चिह्नितम्, इत्थं सखित्वात् महत्त्वात् पवित्रत्वाच्च सम्भावनार्हममुं शैलं चित्रकूटाद्रिमालिङ्ग्य आपृच्छस्व साधो यामीत्यामन्त्रणेन सभाजय । आङि नु पृच्छ्योरित्यात्मनेपदम् । सखित्वं निर्व्वाहयति काले काले प्रतिप्रावृट्कालं सुहृत्समागमनकालस्य कालशब्देनोच्यते, वीप्सायां द्विरुक्तिः । भवतः संयोगं सम्पर्कमेत्य चिरविरहजम् उष्णं

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसाञ्चोपभुज्य ॥१३॥

গমনের অনুকূল, প্রথমেতে স্থূল স্থূল,
পথ সব কহি বিবরিয়া ।
বারতা তাহার পর, বলিব হে মনোহর
জলধর শুন কান দিয়া ।
যাইতে সে দূর দেশ, যখন পাইবে ক্লেশ,
গিরি শিরে বসিবে তখন ।
দেহের কৃশতা হ'লে বিশুদ্ধ স্রোতের জলে
পান করি করিবে পোষণ ॥ ১৩

तीति भावः। मेखला—श्रोणि, स्थानेऽद्रिकटके कटिबन्धे भवन्धने इति यादवः। आप्रच्छनं—आमन्त्रणसभाजने आप्रच्छनमित्यमरः बाष्पनेत्र जलोष्मणोरिति विश्वः॥ १२॥

सम्प्रति तस्य मार्गं कथयति

मार्गमिति। हे जलद तावदिदानीं कथयतोमत्तइति शेषः, त्वत्प्रयाणस्यानुरूपमनुकूलं मार्गमध्वानम्, शृणु तदनुमार्गश्रव-णान्तरं श्रोत्राभ्यां पेयं पानार्हम अतितृष्णया श्रोतव्यमित्यर्थः।

अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभि
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः ।

পর্ব্বতের উচ্চশির, উড়াইছে কি সমীর,

মনে হেন করিয়া বিচার ।

ঊর্দ্ধমুখে সচকিত, সিদ্ধবধূ মুগ্ধচিত,

নিরখিবে তোমার সঞ্চার ॥

नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः, शिखरिषु पर्वतेषु पदं न्यस्य निधाय पुनःपुनःखेदार्थं क्वचित्क्वचित्खिन्नस्तत्र क्षीणः क्षीणोऽभीक्ष्णं कृशाङ्गः सन् अत्रापि छेदन्तत्वात्पूर्ववत् द्विरुक्तिः, स्रोतसां परिलघु गुरुत्वदोषरहितमुपलास्फालनखेदितत्वात्पथ्यमित्यर्थः । तथाच वाग्भटः । उपलास्फालनक्षेपविच्छेदैः खेदितोदकाः । हिमवन्मलयोत्पन्नाः पथ्या नद्यो भवन्त्यमूरिति । पयः पानीयमुपयुज्य शरीरपोषणार्थमभ्यवहृत्य च गन्तासि गमिष्यसि गमेर्लुट् मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणे ध्वनीति यादवः सन्देशवाग्वाचिकं स्यादित्यमरः । अनुरूपमित्यत्र अनुकूलमिति पाठान्तरम् । उभयत्रैक एवार्थः ॥ १३ ॥

अद्रेरिति । पवनोवायुरद्रेश्चित्रकूटस्य शृङ्गं हरति किंस्वित्, किंस्विच्छब्दोविकल्पवितर्कार्थादिषु पठितः, इति शङ्कया उन्मुखीभिरुन्नतमुखीभिः स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीष् । मुग्धाभिर्मूढाभिः, सिद्धानां देवयोनिविशेषाणामङ्गनाभिः चकितचकितं चकितप्रकारं यथा प्रकारे गुणवचनस्येति द्विर्भावः । दृष्टोत्साहः दृष्टसंरम्भः सन् सरसाः आर्द्राः निचुलाः स्थलवेतसा

स्थानादस्मात्सरसनिचुला दुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥१४

সরসনিচুলদলে, শোভমান এই স্থলে,
উঠি নভে চলহ উত্তর।
দিঙ্‌নাগের করাঘাতে, না করে ব্যাঘাত যাতে,
পথে হেন হইবে তৎপর ॥ ১৪

नावलेपान् परिहरन् उदङ्मुखः सन् अलकाया उदीच्यत्वादित्याशयः। खमाकाशम् उत्पत उद्गच्छ। अत्रेदमप्यर्थान्तरं ध्वनयति। रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन् स्थाने तस्मात् स्थानादुदङ्मुखो निर्दोषत्वादुन्नतमुखः सन् दिङ्नागाचार्य्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान् हस्तविन्यासपूर्व्वकाणि दूषणानि परिहरन् अद्रेरद्रिकल्पस्य दिङ्नागाचार्य्यस्य शृङ्गं प्राधान्यम्। हरतीति हेतुना सिद्धैः सारस्वतसिद्धैः महाकविभिरङ्गनाभिश्च दृष्टोत्साहः सन् समुत्पत उच्चैर्भव इति स्वप्रबन्धमात्मानं वा प्रति कवेरुक्तिरिति। संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि। स्थितानुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगादि-त्येतत्श्लोकनिर्म्माणात्तस्य कवेर्निचुलसंज्ञेति हस्तो नक्षत्रभेदे स्यात् करे करभयोरपीति अवलेपस्तु गर्व्वे स्यात् लेपणे दूषणेऽपि चेति विश्वः। शृङ्गं प्राधान्यसान्वोश्चेत्यमरः।

अद्रेः शृङ्गं हरति पवन इत्यत्र अद्रेः शृङ्गं वहति पवन इति हरगोविन्द सम्मतः पाठः। दृष्टोत्साह इत्यत्र दृष्टोच्छ्राय इति

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता—
वल्मीकाग्रात् प्रभवति धनुः खण्डमाखण्डलस्य ।

রৌদ্রে মেঘ কি শোভা পায়, আবার তাহার গায়,
দেখ ! দেখ ! ইন্দ্র শরাসন ! ।
যেমন রতন পাঁতি, হ'তে আভা নানা জাতি,
একত্রেতে হয়েছে মিলন ॥

रत्नेति। रत्नच्छायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणमिव प्रेक्ष्यं दर्शनीयमाखण्डलस्येन्द्रस्य धनुःखण्डमेतदिति हस्तेन निर्देशः, पुरस्तादग्रे वल्मीकाग्राद्वामलूरविवराग्रात्, प्रभवति आविर्भवति। येन धनुःखण्डेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वलकान्तिना वर्हेण पिच्छेन गोपवेशस्य विष्णोर्गोपालस्य कृष्णस्य श्यामं वपुरिवातितरां कान्तिं शोभामापत्स्यते प्राप्स्यते। वल्मीकः—सातपे मेघे इति कश्चित्। वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमित्यमरः।

वर्हं—पिच्छवर्हे नपुंसके इत्यमरः।

कान्तिमापत्स्यते इत्यत्र—कान्तिमालप्स्यते इति सनातन, रामनाथ, हरगोविन्द, कल्याणमल्लसम्मतः पाठः। वल्मीकाग्रात् प्रभवति धनुः खण्डमाखण्डलस्येत्यस्य व्याख्यानावसरे वल्मीकाग्रादिन्द्रधनुष आविर्भावे मल्लिनाथः स विस्तरं न किञ्चिदुवाच,

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
वर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥ १५ ॥

তোমার শ্যামল অঙ্গ, লভিলে উহার সঙ্গ,
হবে রূপ অতিমনোহর ।
যেমন ময়ূর পাখে, বাঁধি চূড়া পাকে পাকে
শোভিতেন শ্যাম নটবর ॥

वल्मीकाग्रात् रामगिरिशृङ्गात्—वाम्लूरे गिरेः शृङ्गे वल्मीक-पद मिष्यते इति शब्दार्णव इति सनातनः ।

वल्मीकाग्रात्—सूर्य्यात् मेघप्रतिफलिता हि सूर्य्यरश्मयो धनु-राकारेण दृश्यन्ते वल्मीकः सातपो मेघो वल्मीकः सूर्य्य इत्यपीति कोषान्तरमिति रामनाथः ।

वल्मीकाग्रादिति वल्मीकं वाम्लूरः—वासुकिफणमणिगणद्युति वल्मीकरन्ध्रान्निःसृत्य नभसि मेघे शक्रधनुराकारमापद्यत इत्या-गमः । मतान्तरे–वल्मीकाग्रात् सूर्य्यात् सूर्य्यकराहि वाताक्षिप्ता धनुरूपा इन्द्रधनु रुच्यते तथाच ज्योतिषे सूर्य्यस्य विविधा वर्णा पवनेन विघट्टिताः । विहायसि धनुः संस्था दृश्यन्ते जलदागमे । इति वल्मीकात् रामगिरि शृङ्गात्-वाम्लूरे गिरेः शृङ्गे वल्मीकपद मिष्यते इति शब्दार्णवः । वल्मीकः सातपे मेघ इति कश्चित् अभिधानं पठति । वल्मीकः सूर्य्य इति कश्चिदिति भरतः । इत्येवं वहुव्याख्यानेषु सत्स्वपि मल्लिनाथकृतव्याख्यानमेव कालि-दासस्याभिप्रेतमित्यवगम्यते, अन्यथाग्रपदाभिधानस्य—वैयर्थ्यं स्यात् । सातपमेघपक्षो यद्यपि न केनापि प्राचीनव्याख्या-तृषु समाश्रितस्तथापीदानीन्तनैः सभै [illegible]

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।

তোমার অধীন হয়, কৃষিফল সমুদয়,
তাই আজ গ্রাম্যবধূগণে।
হাব ভাব নাহি জানে, কেবল তোমার পানে
চেয়ে রবে সপ্রেম নয়নে॥

पमेघस्य अयं शेखरं प्राप्य प्रभयति गच्छति इत्येवं व्याख्यानं कर्त्तव्यम्। अत्रापि वर्हेणेव स्फुरित रुचिना गोपवेशस्य विष्णोरित्युपमानुसारतोऽयपदस्य सार्थक्यमस्ति ॥ १५ ॥

त्वयीति। कृषेर्हलकर्म्मणः फलं शस्यं त्वयि अधिकरणविवक्षायां सप्तमी आयत्तमधीनम्, इति हेतोः प्रीतया स्निग्धैः रक्तस्निग्धप्रेमार्द्रैरित्यर्थः, भ्रूविलासानां भ्रूविकाराणामनभिज्ञैः पामरत्वादिति शेषः। जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमानः सन् मालं मालाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलम्। सद्यस्तत्कालमेव सीरैर्हलैः उत्कर्षणेन सुरभिर्घ्राणतर्पणं यथा तथा आरुह्य तत्राभिरुह्येत्यर्थः। किञ्चित्पश्चाद्व्रज गच्छ। लघुगतिस्तत्र निर्वृष्टत्वात् क्षिप्रगमनः सन्। भूयः पुनरपि उत्तरेणैव उत्तरमार्गेणैव व्रज। तृतीयाभिधाने प्रकृत्यादिभ्यः उपसंख्यानमिति तृतीया। यथा कश्चिद्बहुवल्लभः पतिः कुत्रचित् क्षेत्रे कलत्रे गूढं विहृत्य दाक्षिण्यभङ्गभयाल्लोचमार्गेण निर्गत्य पुनः सर्व्वाध्वगं सञ्चरति तद्वदिति ध्वनिः।

आयत्तः—अधीनो निघ्न आयत्त इत्यमरः।

সদ্যঃ সীরোৎকষণসুরভি ক্ষেত্রমারুহ্য মালং
কিঞ্চিৎপশ্চাদ্‌ব্রজ লঘুগতির্ভূয় এবোত্তরেণ ॥ ১৬ ॥

অচির কর্ষণোত্থিত, সৌরভেতে আমোদিত,
আরোহণ করি মালভূমি।
কিঞ্চিৎ পশ্চাতে যেয়ে, আবার চলিবে ধেয়ে
হইয়া উত্তর মুখ তুমি ॥

লঘু—লঘুক্ষিপ্রমরং দ্রুতমিত্যমরঃ।

ক্ষেত্রং ক্ষেত্রং শরীরে কেদারে সিদ্ধস্থানকলত্রয়োরিতি বিশ্বঃ।

ভ্রূবিলাসানভিজ্ঞৈরিত্যত্র ভ্রূবিকারানভিজ্ঞৈরিতি ভরত, সনাতন, রামনাথ, হরগোবিন্দ, কল্যাণমল্লসম্মতঃ পাঠঃ। এবঞ্চ কিঞ্চিৎ পশ্চাদ্ ব্রজ লঘুগতি র্ভূয় এবোত্তরেণ ইত্যত্র কিঞ্চিৎপশ্চাদ্ ব্রজ লঘুগতিঃ কিঞ্চি দেবোত্তরেণেতি ভরত, সনাতন, রামনাথ সম্মতঃ পাঠঃ। অস্যার্থস্তু—লঘুগতিঃ সন্ কিঞ্চিৎ পশ্চাৎ পশ্চিমেন কিঞ্চিদুত্তরেণ ব্রজ গমিষ্যসি আশংসায়াং লোট্। ইতি ভরতঃ কিঞ্চিৎ পশ্চাৎ প্রবলয়গতির্ভূয় এবোত্তরেণেতি চ পাঠান্তরম্।

সদ্যঃ সীরাৎ কষণ সুরভীত্যস্য মল্লিনাথকৃত ব্যাখ্যা ন সমীচীনা যতঃ সদ্যঃ সীরাৎকষণসুরভীত্যস্য ক্রিয়াবিশেষণত্বং ন সঙ্গচ্ছতে। তথাত্বে উৎকষণ ক্রিয়া কর্তৃত্বং মেঘে কল্পনীয়ং মেঘস্য তু তৎ কর্ত্তৃত্বং ন সম্ভবতি। ভরত, সনাতন, রামনাথ, হরগোবিন্দমতে সদ্যঃ সীরাৎকষণ সুরভীতি মালস্য বিশেষণং। বয়মপ্যনুবাদে তথা কৃতবন্তঃ। কল্যাণমল্লমতে তু সদ্যঃ সীরাৎ কষণ সুরভি ক্ষেত্রং ইত্যেকং পদং তচ্চ মালস্য বিশেষণং যথা—

সদ্যঃ সীরাৎকষণেন তৎকালহলকর্ষণেন সুরভীণি ক্ষেত্রাণি যত্র তত্তথা, সদ্যঃ সীরোৎখাতা হি [illegible]

चेत्रमारुह्य मालम् इत्यनेन किम् उन्नतक्षेत्रसामान्येऽर्थे कतमस्य उक्ति रथवा माल नाम्नाप्रसिद्धस्य कस्यचित् जनपदविशेषस्येति सन्देहे—जनपदविशेषस्यै वाऽत्रोक्तिरित्यस्मन्मतं। अथ कुत्र तद्विशेषस्थानं वर्त्तते?—विल्फोर्ड-साहिव-निर्म्मित-पौराणिकस्थान संख्यानविषयकपुस्तके हि मेदिनीपुरप्रदेशे मालभूमेरुल्लेखो दृश्यते। तच्चात्र न सङ्गच्छते। अध्यापक-विलसन् महोदयस्तु मालचेत्रस्यास्यैवं निर्णीतवान्

The easterly progress of the Cloud, and the subsequent direction by which he is to reach the mountain Amarakuta, prove that the place here mentioned must be some where in the immediate vicinity of Ruttanpoor, the Chleif town of the northern half of the Province of Cheteesgarh, and described in Captain Blunt's tour, Asiatic Research. vol vii, and also in that of Mr: Colebrook, published in the Asiatic Annual Register for 1806. The only modern traces that can be found of it are in a place Called Malda a little to the north of Ruttanpoor. Iu Ptolemy's map there is a town called Maleta and situated, with respect to the Vindhya mountains similarly with the Mala of our poet.

मेघस्य पूर्व्वाभिमुखगमनेन तथा येन पथाऽस्य: आम्रकूटगमनं निर्द्दिष्टं तदालोचनेन च मालचेत्रमिदं छत्तिशगड़ प्रदेशोदीच्यभागीयप्रधाननगररत्नपुरस्य समीपवर्त्तीतानुमीयते। कापेन ब्लण्टनामकस्य यात्रायां तथा कुलब्रुक महोदयस्य यात्रायामप्येत द्वर्णितमस्ति तच्च षडुत्तराष्टादशशतखृष्टशताब्दीयआसियाटिक्

त्रेत्रमासीदिति प्रतीयते । टलोमिकृतभूमाणचित्रेष्वपि विन्ध्याद्रि सन्निहितभूमिषु मालितानामकस्य स्थानस्य समुल्लेखो दृश्यते। ततश्च स्थानमिदं छत्तिशगड़ान्तर्गतरत्नपुरसमीपवर्त्तीति प्रत्ययस्यैव दृढ़ता भवति।

ततश्च विलसन्साहिवमहोदयेन पुराणोल्लिखितमालशब्दस्य कालिदासलिखितेन मालशब्देनैक्यं खण्डितम्। वस्तुतोमेघस्य गन्तव्याध्वानुशीलनेन कालिदासोल्लिखितस्य मालक्षेत्रस्य छत्तिश गड़प्रदेशान्तर्गतत्वमेव सम्भाव्यते न तु मेदिनीपुरान्तर्गतत्वम्।

रजनीकान्तगुप्तमहोदयेन स्वकृतकालिदासग्रन्थीयभौगलिक तत्त्वविषयके प्रस्तावे मालशब्देनाऽत्र छत्तिशगड़ान्तर्गतसमुन्नत कृषियोग्यक्षेत्रविशेष एवाभिप्रेतो न तु जनपदविशेषोऽतश्च "त्वय्यायत्तं कृषिफलमिति भ्रु विलासानभिज्ञै" रित्यादिभिः श्लोकैरस्यैव विवृतिः कृता इति निर्द्धारितम्।

ततश्च विलसन महोदयेन रत्नपुरसमीपवर्त्तिना मालदाभि- धेयेन टलोमिकृतभूचित्रे मालिता इति प्रसिद्धेन केनापि जनपद- विशेषेण यदस्यैक्यमुद्भावितम् तदपि रजनीकान्तगुप्तमहोदयेन खण्डितमेव। परन्तु तत् खण्डनं नास्मभ्यं सम्यक् रोचते। तस्य प्रधानयुक्तिस्तु महाभारतपुराणादौ मालदशब्दस्य जातिवा- चकत्वदर्शनान्न तस्य जनपदविशेषवाचित्वं सम्भवतीति। तथाहि

युध्यमानान् वलात् संख्ये विजिग्ये पाण्डवर्षभः।
ततोमत्स्यान् महातेजा मालदांश्च महावलान्॥ इति महाभारतं।

श्लोकेऽस्मिन् मत्स्यशब्देन यथा तद्देशवासिनामाक्षेपो मालद- शब्देन तथैव मालदवासिनामाक्षेपोभवितुमर्हत्येव, दृश्यते च संस्कृते- तिहास पुराणादिषु देशवाचकैस्तत्तत्याधिवासिनां वहुशः समाक्षेपः। अस्ति च तदाक्षेपसाधनं वैयाकरण मत । [illegible]

ত্বামাসারপ্রশমিতবনোপপ্লবং সাধু মূর্দ্ধ্না
বক্ষ্যত্যধ্বশ্রমপরিগতং সানুমানাম্রকূটঃ ।
ন ক্ষুদ্রোঽপি প্রথমসুকৃতাপেক্ষয়া সংশ্রয়ায়
প্রাপ্তে মিত্রে ভবতি বিমুখঃ কিং পুনর্যস্তথোচ্চৈঃ ॥১৭॥

তোমার ধারার জল, নিবাইলে দাবানল;
নিরখিয়া শ্রান্ত কলেবর—
তোমায় মাথায় করে, রাখিবে আমোদভরে,
আম্রকূট নামে গিরিবর ।
উপকারী মিত্রবর, আশ্রয়ার্থ এলে পর,
স্মরি তার পূর্ব্ব উপকার ।
অতি ক্ষুদ্র নীচাশয় কদাপি বিমুখ নয়,
মহতের আনন্দ অপার ॥

ত্বামিতি । আম্রাশ্চূতাঃ কূটেষু শিখরেষু যস্য স আম্রকূটো নাম সানুমান্ পর্ব্বতঃ । আসারো ধারাবৃষ্টিঃ, তেন প্রশমিতো বনোপপ্লবো দাবাগ্নির্যেন তং কৃতোপকারমিত্যর্থঃ । অধ্বশ্রমেণ পরিগতং ব্যাপ্তং ত্বাং সাধু সম্যক্ মূর্দ্ধ্না বক্ষ্যতি বোঢ়া । বহের্লৃট্ । তথাহি ক্ষুদ্রঃ কৃপণোঽপি সংশ্রয়ায় সংশ্রয়ণায় মিত্রে সুহৃদি প্রাপ্তে আগতে সতি প্রথমসুকৃতাপেক্ষয়া পূর্ব্বোপকারপর্য্যালোচনয়া বিমুখো ন ভবতি যস্তথা তেন প্রকারেণোচ্চৈরুন্নতঃ স আম্রকূটঃ কিং পুনঃ বিমুখো ন ভবতীতি কিমু বক্তব্যমিত্যর্থঃ । এতেন প্রথমাবসথে সৌখ্যলাভাত্তে কার্য্যসিদ্ধিরস্তীতি সূচিতম্ । তদুক্তং নিমিত্তনিদানে, প্রথমাবসথে যস্য সৌখ্যং তস্যাখিলেষ্বপি । শিবং ভবতি যাত্রায়ামন্যথা ত্বশুভং ধ্রুবমিতি ।

স্থিত্বা তস্মিন্‌ বনচরবধূভুক্তকুঞ্জে মুহূর্তং
তোয়োৎসর্গদ্রুততরগতিস্তৎপরং বর্ত্ম তীর্ণঃ।

যে ভূধর কুঞ্জবনে, ভুঞ্জে বনচরী গণে,
মুহূর্ত্তেক বসি শিরে তার।
ইচ্ছামত বরষিয়া, দেহভার খসাইয়া,
দ্রুতগতি হয়ে পথ পার।

তথোক্তঃ। আষাঢ়ে বনচূতাঃ ফলন্তি, পচ্যন্তে চ মেঘবাতেনেত্যা-শয়ঃ। কাননাম্রৈর্বনচূতৈশ্ছন্নোপান্তঃ আবৃতপার্শ্বোঽচল আম্রকূ-টাদ্রিঃ স্নিগ্ধবেণীসবর্ণে মসৃণকেশবন্ধচ্ছায়ে শ্যামবর্ণে, ইত্যর্থঃ। ত্বয়ি শিখরং শৃঙ্গমারূঢ়ে সতি, যস্য চ ভাবেন ভাবলক্ষণ-মিতি সপ্তমী, মধ্যে শ্যামঃ শেষে মধ্যাদন্যত্র বিস্তারে পরিতঃ পাণ্ডুঃ হরিণঃ, ভুবঃ স্তন ইব অমরমিথুনানাং খেচরাণামিতি ভাবঃ। প্রেক্ষণীয়াং দর্শনীয়ামবস্থাং নূনং যাস্যতি। যথা পথি ক্লান্তঃ কশ্চিৎকামী কামিনীনাং কুচকলশে বিশ্রান্তঃ সন্‌ স্বপিতি তদ্বদ্ভবানপি ভুবো নায়িকায়াঃ স্তনে ইতি ধ্বনিঃ॥

বেণী—বেণী তু কেশবন্ধে জলস্রুতৌ ইতি যাদবঃ।

হরিণঃ—হরিণঃ পাণ্ডুরঃ পাণ্ডুরিত্যমরঃ।

অধ্বক্লান্তং প্রতিমুখগতং সানুমানাম্রকূট
স্তুঙ্গেন ত্বাং জলদ শিরসা বক্ষ্যতি শ্লাঘমানঃ।

रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥१९॥

বিন্ধ্যাচল ধারে ধারে, প্রবাহিত শত ধারে,
নর্ম্মদা করিবে দরশন।
কে যেন কৌশল করে, সাজায়েছে গজবরে
আঁকি অঙ্গে ভূতি বিভূষণ ॥

प्रक्षिप्तोऽयं श्लोक इति विभाव्यते सप्तदशेन सह सर्व्वथा समानार्थात्। ततश्च मल्लिनाथेन परित्यक्तोऽयं सनातनहरिगोविन्दाभ्यान्तु व्याख्यातः ॥१८॥

स्थित्वेति। हे मेघ वने चरन्तीति वनचराः, तत्पुरुषे कृतिबहुलमिति बहुलग्रहणादलुग्भवति, तेषां वधूभिर्भुक्ता कुञ्जा लतागृहा यत्र तस्मिन्। तत्र ते नयनविनोदोऽस्तीत्यर्थः। तस्मिन्नाम्रकूटे मुहूर्त्तमल्पकालं न तु चिरं स्वकार्य्यविरोधादिति भावः, स्थित्वा विश्रम्य तोयोत्सर्गेण आसारवृष्टिवर्षणेन द्रुततरगतिर्लाघवाद्धेतोरतिक्षिप्रगमनः सन् तस्मादाम्रकूटात्परम् अनन्तरं तत्परं वर्त्म मार्गं तीर्णोऽतिक्रान्तः उपलैः पाषाणैः विषमे विन्ध्यस्याद्रेः पादे प्रत्यन्तपर्व्वते, विशीर्णां समन्ततो विस्तृताम् एतेन कस्याश्चित् कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते, रेवां नर्म्मदाम् गजस्याङ्गे शरीरे भक्तयो रचनाः रेखा इति यावत् तासां छेदैर्भङ्गिभिर्व्विरचितां भूतिं शृङ्गारमिव। द्रक्ष्यसि अयमपि महांस्ते नयनकौ-

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।

উগারি স্বজলভর, করি পূর্ণ কলেবর,
যেও সেই জলে নর্ম্মদার ।
বন্যগজনিষ্কাসিত, তীব্রমদে সুবাসিত,
জম্বুবনে রুদ্ধগতি যার ।

मुहूर्त्तमल्पकाले स्याद् घटिकाद्वितयेऽपि च ।

पादाः प्रत्यन्तपर्व्वता इत्यमरः ।

रेवा—तु नर्म्मदा, सोमोद्भवा, मेखलकन्यका इत्यमरः ।

भक्तिः—निःश्रेणी, भागे, रचनायामिति शब्दार्णवः ।

भूति मातङ्गशृङ्गारे, जातौ, भस्मनि, सम्पदीति विश्वः ।

तोयोत्सर्गद्रुततरगतिरित्यत्र — तोयोत्सर्गादद्रुततरगतिरिति भरत, सनातन, रामनाथ, कल्याणमल्लसम्मतः पाठः ।

तोयोत्सर्गाल्लघुतरगतिरितिहरगोविन्दोसम्मतः पाठः। विन्ध्य पर्व्वतस्तु प्रसिद्ध एव, आर्य्यावर्त्तदाक्षिणात्ययोर्मध्यवर्त्ती पर्व्वतोऽयं हिमालय इव पूर्व्वापरसमुद्रावगाढ़ी । विन्ध्यपर्व्वतस्य माहात्म्यं पुराणादिषु विवृतमस्ति । चरणाद्रिः (Chunar, चण्डालगड़समीपस्थ पर्व्वतविशेषः) अस्य पादरूपेण प्रसिद्धः । वर्त्तमानकृजापुर नामक जनपदस्य समीपेऽस्मिन् विन्ध्यवासिनीति प्रसिद्धा देवी वर्त्तते । तद्दर्शनार्थं भारतस्य नानादिग्देशात् यात्रिणः सर्व्वदैव समायान्ति । रेवा, नदीयं आम्रकूटपर्व्वताद्विनिःसृता पश्चिमे तमसानद्यां

অন্তঃসারং ঘন তুলয়িতুং নানিলঃ শক্ষ্যতি ত্বাং
রিক্তঃ সর্ব্বো ভবতি হি লঘুঃ পূর্ণতা গৌরবায় ॥২০

অন্তরে হইলে ভার, তোমায় পবন আর
উড়াতে নারিবে ইচ্ছামত।
জগতে যে শূন্য হয়, তাহারেই লঘু কয়,
পূর্ণতায় গৌরব নিয়ত ॥

সহ বিনির্গতাঽপি ক্বচিৎ ক্বচিৎ বিন্ধ্যাচলনিঃসৃততয়া প্রসিদ্ধা। তৎ কারণন্তু নদীয়ং ক্বচিৎ বিন্ধ্যাচলোপান্তবর্ত্তিভূমৌ সমন্তাৎ পর্ব্বতাবৃতে কস্মিংশ্চিৎ বিস্তৃতকুণ্ডে নিপতন্ত প্রতিরুদ্ধপ্রসরা হ্রদত্বমাপন্না বহ্বীঃ ক্ষুদ্রনদীঃ সমুৎপাদ্য পুনরেব নির্গতেতি। ক্বচিচ্চেয়ং রুদ্রদেহসমুদ্ভবতয়া প্রসিদ্ধাঽস্তি। তথাহি

নর্ম্মদা সরিতাং শ্রেষ্ঠা রুদ্রদেহাদ্বিনিসৃতা।
তারয়েৎ সর্ব্বভূতানি স্থাবরাণি চরাণি চ ॥
সর্ব্বপাপহরা নিত্যং সর্ব্বদেব নমস্কৃতা
সংস্তুতা দেবগন্ধর্ব্বৈরপ্সরোভিস্তথৈবচ ॥

অস্যা বাহুদেতি নামান্তরমস্তি। তৎকারণন্তু কদাচিৎ লিখিতনাম্ন ঋষের্ভ্রাতুঃ শূন্যাশ্রমে ফলভক্ষণাৎ রাজ্ঞা বাহূ চ্ছিন্নৌ। তৌ চাস্যাং তপস্যতস্তস্য জাতাবিতি। অমরকোষটীকায়াং ভরতঃ। নর্ম্মদায়াস্তীরে মাহীষ্মতী নাম কার্ত্তবীর্য্যস্য

नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढ़ै
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।

আধ্‌কোটাকেশর—ভার, হরিত—কপিশাকার,
নিরখিয়া কদম্বের বন ।
শোভিত সজলস্থলে, নবীন মুকুল দলে,
কন্দলী করিয়া আস্বাদন ।

तस्याद्रिति । हे मेघ वान्तवृष्टिरुद्गीर्णवर्षः सन् ज्ञातवमनश्च व्यज्यते तिक्तैः सुगन्धिभिस्तिक्तरसवद्भिश्च वनगजमदैर्वासितं सुरभितं भावितञ्च । विन्ध्यस्य गजप्रभवत्वादिति भावः । जम्बूकुञ्जैः प्रतिहतरयं प्रतिबद्धवेगं सुखपेयमित्यर्थः । अनेन लघुत्वं कषायभावना च व्यज्यते । तस्या रेवायाः तोयमादाय गच्छेः व्रज । हे घन मेघ अन्तःसारोबलं यस्य तं त्वामनिलः आकाशवायुः शरीरस्थश्च गम्यते तुलयितुं न शक्ष्यति शक्तो न भविष्यति । तथाहि रिक्तोऽन्तःसारशून्यः सर्व्वोऽपि लघुरगुरुः प्रकम्प्योभवतीत्यर्थः । पूर्णता सारवत्ता गौरवायाकम्प्यत्वाय भवतीत्यर्थः । अयमत्र ध्वनिः आदौ वमनशोधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्तकषायाम्बुपानाल्लब्धबलस्य वातप्रकम्पोन स्यादिति । तिक्तः रसे सुगन्धौ चेतिविश्वः ॥ २० ॥

नीपमिति । सारङ्गा मतङ्गजाः कुरङ्गा वा । अर्द्धरूढ़ैरेकदेशोद्गतैः केशरैः किञ्जल्कैर्हरितं पालाशवर्णं कपिशं कृष्णपीतञ्च ।

जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः

सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२१॥

নব বরষার জলে, অভিষিক্ত বনস্থলে,
আঘ্রাণিয়া গন্ধমনোহর ।
তোমার গমন পথ, লোকমাঝে অবিরত
জানাইবে সারঙ্গনিকর ॥

ऽव्ययीभावः । आविर्भूताः प्रथमाः प्रथमोत्पन्ना मुकुला यासां ताः, कन्दलीर्भूमिकदलीः जग्ध्वा भक्षयित्वा, अदोजग्धिरिति जग्धा-देशः । अरण्येष्वधिकसुरभिं दग्धारण्येष्विति पाठे दग्धमित्यधि-कविशेषणम् अर्थवशात्कन्दलीश्च दृष्ट्वेत्यन्वयो द्रष्टव्यः । उर्व्या भू-मेर्गन्धमाघ्राय जललवमुचो मेघस्य ते तव मार्गं सूचयिष्यन्ति अनुमापयिष्यन्ति । यत्र यत्र कन्दलीमुकुलनीपकुसुमादिकं दृश्यते तत्र तत्र त्वया दृष्टमित्यनुमीयत इति भावः ॥

हरितः पलाशोहरितोहरित् इति अमरः ।

कपिशः—श्यावः स्यात् कपिश इति चामरः ।

कच्छः—जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः ।

कन्दली—द्रोणपर्णी स्निग्धगन्धा कन्दली भूकदल्यपीति शब्दा-र्णवः ।

तत्रभवता श्रीमतेश्वरचन्द्रविद्यासागरमहोदयेन तु मल्लि-नाथाहृत जग्ध्वेति पाठं प्रति एवं भ्रूभङ्गी कृता दग्ध्वेति पाठमना-दृत्य जग्ध्वेतिपाठ कल्पनं प्रामादिकम् । नीपं दृष्ट्वा, कन्दलीर्जग्ध्वा,

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्व्वते पर्व्वते ते।

সাধিতে আমার কায, যাইতে না করি ব্যাজ,
যদিও তোমার ইচ্ছা ভাই।
প্রফুল্ল কুটজ ফুলে, সুগন্ধি পর্ব্বতকুলে,
দেরি হয় পাছে ভাবি তাই॥

पाठपक्षेतु नीपं कन्दलीश्च दृष्ट्वा इतरन्वये द्वितीयपादस्थचकारस्य सार्थक्यमस्त्येव। अपिच दग्धारण्येष्विति पाठे दग्धमित्यधिक विशेषणं इतीतदपि प्रमाद मूलकमेव दग्धमिति नाधिकं विशेषणं, तदभावे उर्व्वरां अधिक सौरभत्वासम्भवात्। दग्धेष्वेव भूभागेषु नवजलपाते सौरभमधिकं सम्भवति, नान्यथा। जललवमुच इतयत्र नवजलमुच इति पाठान्तरम्। स एव पाठः सम्यक् रोचतेऽस्म-भ्यमपि। नवजलस्यैव नीपाद्यङ्कुरप्रभवत्वात्।

अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्द्दिशन्तोवलाकाः।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि॥

प्रक्षिप्तोऽयं श्लोकः। प्रक्षिप्तोपि भरतसनातन रामनाथ हर-गोविन्द कल्याण मल्लैर्व्याख्यातः। व्याख्या यथा

अम्भोबिन्दूनां वर्षोदबिन्दूनां ग्रहणे सर्व्वसहापतितमम्बु, न चातकस्य हितमिति शास्त्रात् भूस्पृष्टोदकस्य तेषां रोगहेतुत्वा-दन्तराले एव स्वीकारे चतुरांश्चातकान् वीक्षमाणाः कौतुकाद् पश्यन्तः श्रेणीभूताः बद्धपङ्क्तीः अभूततद्भावे च्विः। बलाकाः

शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् २२

আবার ময়ূরদল, ফেলিয়া আঁখির জল,
কেকারবে জিজ্ঞাসি কুশল।
তোমায় আগুয়া লবে, কিরূপে ত্বরিত তবে,
যেতে তুমি পার ভাই বল॥

तत्काले सोत्कम्पानि उत्कम्पानि उत्कम्पपूर्व्वकाणि प्रियसहचरीणां सम्भ्रमेणालिङ्गितानि आसाद्य स्वयं ग्रहणाश्लेषसुखमनुभूयेत्यर्थः, त्वां मानयिष्यन्ति त्वन्निमित्तलात् सुखलाभस्येति भावः॥२१

उत्पश्यामीति। हे सखे मेघ मत्पियार्थं यथा तथा द्रुतं क्षिप्रम् यियासोः यातुमिच्छोरपि यातेः सनन्तादुप्रत्ययः, ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि पर्व्वते पर्व्वते प्रतिपर्व्वतम्। वीप्सायां द्विरुक्तिः, कालक्षेपं कालविलम्बम्, उत्पश्यामि उत्प्रेक्षे। विलम्बहेतुं प्रतिकारणान्तरं दर्शयति ते शुक्लेति। सजलानि सानन्दवाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैर्मयूरैः। केकाः स्ववाणीः स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः कृतातिथ्य इत्यर्थः। कथमपि यथाकथञ्चित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत। आशंसायां लिङ् द्रुतं यियासुरपि भवान् मयूराणां प्रेम्णा विमोहितचेताः कथमपि महता कृच्छ्रेण आशु गन्तुं व्यवस्येत् इति च उत्पश्यामि अवकल्पे शेषे प्रथम इति प्रथमपुरुषः। शेषत्वायं भवच्छब्दोयुष्मदस्मच्छब्दव्यतिरेकात्। स्वागतीकृता केका इतयत्र केकास्वारोप्यमाणस्य स्वागतवचनस्य

कपोलदेशा विमलोपलप्रभा
सभृङ्गयूथैर्मदवारिभिः श्रिताः ॥

२२ श्लोकस्यानुरूपश्लोको यथा घटकर्परे—

नवाम्बुमत्ताः शिखिनोनदन्ति ।
मेघागमे कुन्दसमान दन्ति ॥ इति

अपिच

[illegible]कलिकाकारावरम्या वनान्ताः ।
सुखिनमद्याध्वन्[illegible]ति ।

शृङ्गारशतकम् ।

पाण्डुच्छायेति । हे मेघ त्वय्यासन्ने सन्निकृष्टे सति, दशार्णा नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैर्विकसितैः, केतकैः केतकीकुसुमैः पाण्डुच्छायाः हरिणवर्णाः उपवनानां हृतयः कण्टकशाखावरणा येषु ते तथोक्ताः, तथा गृहबलिभुजां काका दिग्रामपक्षिणां नीडारम्भैः कुलायनिर्म्माणैः, आकुलानि सङ्कीर्णानि ग्रामेषु चैत्यानि रथ्यावृक्षाः येषु ते तथोक्ताः, तथा परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि, तदन्ताः रम्याः, तथा कतिपयेष्वेव दिनेषु स्थायिनो हंसा येषु ते, तथोक्ताः एवंविधाः सम्पत्स्यन्ते भविष्यन्ति ॥

सूचिः—मुकुलाग्रेषु सूचिः स्यादिति शब्दार्णवः ।

वृतिः—प्राकारोवरणः सालः प्राचीरं प्रान्ततोवृतिरित्यमरः ।

नीडः—कुलायो नीडमस्त्रियां इत्यमरः ।

[illegible] इत्यादय इति विश्वः । अन्तः—मृता-

[illegible] वसाने इत्यर्थे । इति शब्दार्णवः ।

परिणतफलश्यामजम्बूवनान्तादिताख्य   मल्लिनाथकृतव्याख्या

घोना, शब्दार्णवानुसारेण अन्तशब्दस्य रम्यार्थवाचकत्वेऽपि तस्य तदर्थे प्रयोगस्य प्रायेणादर्शनात्। परिणतफला पक्वफला अत-एव श्यामा जम्बू वनान्ता: जम्बूवनभूमयो येषु, ते तादृशा: इत्येवं [illegible] । [illegible] इत्यादि वनान्त शब्दस्य वन-भूम्यर्थे प्रयो[illegible] —

विदधाति [illegible]

स्वमति पवनवृत: [illegible]

[illegible] ॥ १।२८

इति। अस्माकं वङ्गानुवाद एतदर्थानुसृतोऽपि न वयमिममर्थं समीचीनं मन्यामहे, अन्तशब्दस्य रम्यार्थे प्रयोगबाहुल्याभावेऽपि नाप्र-युक्तत्वदोष: सम्भवति, क्वचिदपि महाकविषु तदर्थस्य प्रयुक्तत्वात्। वनान्तशब्दस्य वनभूम्यर्थानुगाऽनुशिष्ट स्तन्तदर्थेऽस्य प्रयोगोऽवाच-कत्वदोषमावहति ततश्चास्मन्मते परिणतानि परिपक्वानि फलानि तै: श्यामं जम्बूवनं अन्ते अवसाने सीमाप्रदेशे येषां, ते इत्येवमर्थे कृते तु न काचिद्दोषशङ्काऽस्ति। तत्प्रदर्शितोदाहरणेष्वपि वना-न्तशब्दस्य वनपर्य्यन्तभूमिरूपोऽर्थ: सङ्गतएव। इत्यलं बहुवागा-ड़म्बरेण, अत्र फलपरिणतिश्यामजम्बूवनान्ता इति भरतसना-तन रामनाथहरगोविन्दसम्मत: पाठ:। फलानां परिणत्या पाकेन श्यामा: कृष्णा जम्बूवनानि येषु ते तथा। इति रामनाथ:।

दशार्णाभिधजनपदोऽयमतिप्राचीनकालतएव प्रसिद्धस्तथा बहु-वचनान्ततया प्रयुक्तश्च। तथाहि "सप्त व्याधा दशार्णेषु मृगा: कालाञ्जरे गिरौ" इत्यादि। विलसन्साहिबेनाप्येवमुक्तम्—दशा र्णाभिधोजनपदोऽयं क्वासीदिताधुनातनमानचित्रेभ्यो न ज्ञायते। लेसनसाहिवमते वर्त्तमानदोशाननामको देश: प्राचीनदशार्णेन

देश: टलोमि परिकल्पितनामकाभ्यां निर्दिष्टेन दशार्णनामक स्थाने-नाभिन्न एव। टलोमिकृतभूचित्रे दशारा—नामकोप्यपरोऽपि देश-विशेषो लक्ष्यते। पौराणिकनदीसंख्यानपुस्तके तु चित्रकूट पर्व्वतनि:सृता दशार्णा नाम्न काचिन्नदो चास्ति। तस्यान्तिम वाक्यं यथा।

"It may possibly correspond at least in part with the modern district of Choteesgorh as the etymology of both words refers to similar circumstances, Cheteesgerh is so named from its being supposed to comprise thirty six forts; and according to Bharata, the commentator on our text Dasarna is derived from dasa (दश) Ten' and Rina (ऋण) a strong hold or Durga, and thence means the district of ten citadels."

दशार्णदेशोऽयं छत्तिशगड़नामकस्थानस्याभिन्न इत्यनुमीयते यत: छत्तिशगड़, दशार्ण इतिएतयो: शब्दयोर्व्युत्पत्ति-गतसाम्यमस्ति, तथाहि षट्‌धिक त्रिंशत् दुर्गशालित्वात् छत्तिशगड़ इति नाम, दशार्णस्यापि भरतेन दश ऋण, दशदुर्गयुक्तदेश इति व्युत्पत्तिलभ्यार्थ: प्रदर्शित: ततश्च दशार्णछत्तिशगड़देशयो-रङ्गाङ्गि भाव इति।

दश ऋणानि दुर्गाणि, जलधारा वा यत्र इति वाचस्पत्यप्रद-र्शितव्युत्पत्त्या तु दशार्णशब्देन दशदुर्गान्वितो, दशनदीप्रवा-हान्वितोवा देश इति लभ्यते। स च देशोविन्ध्याचलस्य पूर्व्व दक्षिणयोर्दिशि वर्त्तते इति शब्दार्थकल्पतरु:। वृहत् संहितायां कूर्म्म विभागे १४ अध्याये स हि देश आग्नेय्यामुक्त:। यथा आ-ग्नेय्यां दिशि कोसला इत्युपक्रमे निषादराज्यानि पुरिकद-शार्णा इति ततश्च शब्दार्थकल्पतरुणा वृहत् संहितया ऐक्यमस्ति। महाभारते पूर्व्वदिग्विभागस्थितेषु तथा पश्चिमदिग्विभागस्थितेषु

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा ।

দশার্ণের রাজধানী, বিদিশা নামেতে জানি,
ভুবনে বিখ্যাত অতিশয় ।
সেথা গিয়া জলধর, ঠিক যেন নটবর,
হ'য়ে বিহারিবে মনে লয় ।

"विजित्याल्पेन कालेन दशार्णानजयत् प्रभुः । तत्र दशार्णको राजा सुधर्म्मा लोमहर्षणम् । कृतवान् भीमसेनेन महद्युद्धं निरायुधमिति ॥

नकुलस्य प्रतीचीजयेऽपि दशार्णस्य उल्लेखो दृश्यते । तथाहि—

"तान् दशार्णान् स जित्वा च प्रतस्थे पाण्डुनन्दनः"

अपिच

"उत्तमाश्च दशार्णाश्च मेकलाश्चोत्कलैः सह"

किन्तु विराटपर्व्वणि पाण्डवानां काम्यकवनात् विराट नगर प्रवेशाध्वा एवं वर्णितः—

उत्तरेण दशार्णांस्ते पाञ्चालान् दक्षिणेन च ।

अन्तरेण यकृल्लोमान् शूरसेनांश्च पाण्डवाः ॥

वस्तुतो दशार्ण शब्दस्य देशार्थे बहुवचनान्तत्वेन प्रयोगात् दशार्णाख्यप्रदेशस्य बहुत्वं, बहुविस्तृतत्वं वा प्रतीयते । मेघदूतोक्तदशार्णस्य तु राजधानी विदिशेति कविना स्वयमुक्तम् । विदिशेत्यस्य वर्त्तमानसमये भिलसेत्यपभ्रंशोजातः । अस्ति च भिलसानाम काचिन्नगरी उज्जयिनीरूजपुरराजमार्गस्य पार्श्वे मालव (Malwa) प्रदेशे इति ॥ २२ ॥

तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्मि ॥२४॥

শুন বলি হেতু তায়, বেত্রবতী কিনারায়
বসে করি মধুর স্তনিত।
উহার তরঙ্গময়, আস্বাদিবে স্বাদু পয়
মুখ যেন ভ্রূকুটি কম্পিত ॥

धीयन्ते यस्यामिति राजधानी, कालाधिकरणयोश्चेति ल्युट्, कृद्योगलक्षणा षष्ठी समस्यत इति वक्तव्यात् समासः। तां राजधानीं प्रधाननगरीम्। गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः, अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते, त्वयेति शेषः कर्म्मणि लुट्। कुतः ? यस्मात् कारणात् स्वादु मधुरम् ? चला ऊर्म्मयो यस्य तच्चलोर्म्मि तरङ्गितं वेत्रवत्या नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुक्तं दशनपीडयेति भावः। मुखमिवाधरमित्यर्थः। तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्ज्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि व्यपदिश्यते। अर्द्धमुकुलितकण्ठ नासिकं हुङ्कृतं स्तनितमप्रोतमपाङ्गिति लक्षणात्। पास्यसि पिबतेर्ल्लृट्। कामिनामधरास्वादः सुरतादप्यतिरिच्यत इति भावः।

लक्षणं नाम्नि चिह्ने चेति विश्वः।

राजधानी—प्रधाननगरी राज्ञां राजधानीति कथ्यत इति शब्दार्णवः।

कामुकः—विलासी कामुकः कामी स्त्रीपरोरतिलम्पट इति शब्दार्णवः। फलमविकल मितात्वफलमतिमहत् इति भरत-

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः ।

অদূরে তাহার কাছে, নীচ নামে গিরি আছে,
ক'র গিয়া বিশ্রাম তথায়।
প্রফুল্ল কদম্ববনে, যেন তব পরশনে,
পুলক উঠেছে যার গায়।

नीचकनायिकाख्या पञ्चदालिवयोस्त्वनुप्रासिता इति तयोरङ्काङ्किभाव-सङ्कर । स च सजातीयाङ्किरत्न, काम्यवाल्खेति निर्द्देशात् ।

वेत्रवती नदीयं प्राचीन समये प्रसिद्धा पुण्यनदीषु च परिगणिता चासीत् । तथा च "महानदी- वेत्रवती, चन्द्रभागा, सरस्वती" इत्यादि क्रमेण पुण्यनदीनां संख्यानात् ।

वेत्रवती विषये विलसन् साहेबेनोक्त यथा—

"The Vetravati is the modern Betuah. It rises on the north side of the Vindhya Chain ; and pursuing a north easterly course of 340 miles traverses the province of Malwa and the south west corner of Allahabad and falls into the Jamna (Jamuna) below Kalpee .In the early part of its course it passes through Bhilsa or Vilisa "

वेत्रवती नदी हि विन्ध्याचलस्योत्तरभागान्निर्गत्य ऐशान्या गत्या ३४० मीलपरिमितमध्वानमतिक्रम्य मालवदेशं प्रयागस्य च नैर्ऋतभागमाप्लाव्य काल्पिनामस्थानसमीपे यमुनया सह मिलिता । वेत्रवत्या आदित एव भिलसा (विदिशा) नगरी तिष्ठति ॥ २४ ॥

नीचैरिति । हे मेघ तत्र विदिशासमीपे विश्रामः खेदापनयः, भावे घञ्प्रत्ययः, तस्य हेतोः विश्रामार्थमित्यर्थः (षष्ठी हेतु-

तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्मि ॥२४॥

শুন বলি হেতু তায়, বেত্রবতী কিনারায়
বসে করি মধুর স্তনিত।
উহার তরঙ্গচয়, আস্বাদিবে স্বাদু পয়
মুখ যেন ভ্রূকুটি কম্পিত ॥

धीयन्ते यस्यामिति राजधानी, करणाधिकरणयोश्चेति ल्युट्, कृद्योगलक्षणा षष्ठी समस्यत इति वक्तव्यात् समासः। तां राजधानीं प्रधाननगरीम्। गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः, अविकलं सकलं फलं प्रयोजनं लब्धा लप्स्यते, त्वयेति शेषः कर्म्मणि लृट्। कुतः? यस्मात् कारणात् स्वादु मधुरम्? चला ऊर्म्मयो यस्य तच्चलोर्म्मि तरङ्गितं वेत्रवत्या नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुक्तं मुखमधरमिवेति भावः। मुखमिवाधरमिवेत्यर्थः। तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्ज्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि व्यञ्जयति। ऊर्द्ध्वमुच्चलितकण्ठनालिकं हुङ्कृतं मणितमिति लक्षणात्। पास्यसि पिबतेर्लृट्। कामिनामधरास्वादः सुरतादतिरिच्यते इति भावः।

लक्षणं नाम्नि चिह्ने चेति विश्वः।

राजधानी—प्रधाननगरी राज्ञां राजधानीति कथ्यत इति शब्दार्णवः।

कामुकः—विलासी कामुकः कामी स्त्रीपरो रतिलम्पट इति शब्दार्णवः। फलमविकलमित्यत्र फलमतिमहत् इति भरत-सनातन रामनाथ हरगोविन्दसम्मतः पाठः।

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः।

অদূরে তাহার কাছে, নীচ নামে গিরি আছে,
ক'র গিয়া বিশ্রাম তথায়।
প্রফুল্ল কদম্ববনে, যেন তব পরশনে,
পুলক উঠেছে যার গায়।

[illegible] सङ्कर:। स च [illegible] कामुकालयेति निर्देशात्।

वेत्रवती [illegible] प्रसिद्धा पुराणादिषु च [illegible]। तथा च "इरावती, वेत्रवती, चन्द्रभागा, सरस्वती" इत्यादि [illegible] संख्यानात्।

वेत्रवत्या विषये विवरणं [illegible] यथा—

"The Vetravati is the modern Betwa. It rises on the north side of the Vindhya Chain; and pursuing a north easterly course of 340 miles traverses the province of Malwa and the south west corner of Allahabad and falls into the Jamna (Jamuna) below Kalpee. In the early part of its course it passes through Bhilsa or Vidisa."

वेत्रवती नदी [illegible] निर्गता ऐशान्या गतया ३४० मीलपरिमितमध्वानमतिक्रम्य [illegible] प्रयागस्य च नैऋतभागमाप्लाव्य [illegible] यमुनया सह मिलिता। वेत्रवत्या आदित एव भिलसा (विदिशा) नगरी तिष्ठति ॥ २४ ॥

नीचैरिति। हे मित्र तत्र [illegible] विश्रामः खेदापनयः, [illegible] तस्य हेतोः [illegible] (षष्ठी हेतु-प्रयोगे इति षष्ठी) प्रौढपुष्पैः [illegible] कदम्बैर्नीपवृक्षैः त्वत्-

यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-

मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५॥

যার রম্য গুহাস্থল, বেশ্যা অঙ্গপরিমল

অবিরত করিয়া উদ্গার।

তথায় নাগরচয়, যৌবনে উন্মাদ হয়,

লোকে ইহা করিছে প্রচার ॥

तमुत्तरमिव श्लिनम् (तारकादित्वादितच्प्रत्ययः) नीचैरित्याख्या यस्य, तं नीचैराख्यं गिरिमधिवसेः गिरौ वसेत्यर्थः (उपान्वध्याङ्वस इति कर्म्मत्वम्) यो नीचैर्गिरिः पण्याः क्रीताः स्त्रियः पण्यस्त्रियः वेश्याः, तासां रतिषु यः परिमलो गन्धविशेषः, तमुद्गिरन्त्याविष्कुर्व्वन्तीति तथोक्तानि तैः शिलावेश्मभिः कन्दरैः नागराणां पौराणामुद्दामान्युत्कटानि यौवनानि प्रथयति प्रकटयति। उत्कटयौवनाः कश्चिदनुरक्ताः वाराङ्गना विश्रब्धविहाराकाङ्क्षिणो मात्रादिभयान्निशीथसमये कञ्चन विविक्तं देशमाश्रित्य रमयति-तच्चात्र बहुलमस्तीति प्रसिद्धिः।

एवंविधभावार्थस्तु नास्मभ्यं सम्यक् रोचते पण्यस्त्रीति पदस्य वैयर्थापत्तेः। वेश्यानामनुरक्तिस्तु दुर्लभैव। सति वाऽनुरागे तासां न किञ्चिदप्येवं विधं भयस्थानमस्ति यस्मात् सङ्गोप्य निशीथे तादृशनिभृतस्थानागमनस्यावश्यकता भवेत्। वस्तुतो वेश्यानां सहस्रेष्वेकस्या इदृग्अवस्था सम्भवति न वा, न ततो सर्व्वेषां गिरिकन्दराणां परिमलोद्गारित्वम्। वयन्तु नागरा स्तत्र विलासिन आसन् ततश्च स्वमूपरिणीतस्त्रीसम्भोगेनातृप्ता वेश्याभिः सहापि प्रत्यहं रमणीयासु गिरिगुहासु यथाकामं विहृतवन्त इति ब्रूमः। एतेनहि पण्यस्त्रीपदस्य, उद्दामेति विशेषणस्य, नागराणामिति सामा-